April 1932.

THE

CHOWKHAMBÂ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 412.

न्यायलीलावती

श्रीवल्लभाचार्यविरचिता।

श्रीभगीरथठक्कुरकृतविवृतिसनाथेन श्रीवर्धमानोपाध्यायकृत-
प्रकाशेन समुद्भासिता
श्रीशङ्करमिश्ररचितकण्ठाभरणेन च समन्विता।

काशीस्थ नित्यानन्दवेदविद्यालयप्रधानाध्यापकेन
पण्डित ढुण्ढिराजशास्त्रिणा
टिप्पण्यादिभिः सम्पादिता।

NYĀYA LILĀVATI

BY

VALLABHĀCHĀRYA

With the Commentaries of Vardhamānopādhyāya,
S'aṅkara Miśra and Bhagīratha Ṭhakkura.

Editd by Nyāyopādhyāya Pt. Dhundhirāja S'āstri
[Princ]ipal N. V. Vidyalaya, Benares.

FASCICULUS VIII-८.

[PRINT]ED & SOLD BY THE SECRETARY
[CHOW]KHAMBA SANSKRIT SERIES OFFICE,
Benares City

1933

णजन्यं तन्निरपेक्षकारणजन्यं वा ? आद्ये रजतसामग्रीविरहिणि कनककलशे नास्त्येव रजतकलशत्वमिति परापरभाव एव। द्वितीये तु स्वतन्त्रसामग्रीप्रसूतयोः रजतकलशयोर्वैजात्यमेव तन्तुपटवत्। उभयथापि न नियमविरोधः । अस्तु वा परापरव्यतिरिक्तमपि तृतीयम्, तथापि न काचित्क्षतिः । तथा च समुच्चये चकारः

न्यायलीलावतीकण्ठाभरणम्

कर्मजत्वादिना परापरभावानुपपत्तिस्तदवस्थैव, अन्यतरकर्मजत्वादिव्याप्यनानाकर्मसत्ताङ्गीकारेऽपि तु रजतत्वादिव्याप्यतैव स्वीक्रियतां तेन रूपमहत्त्वादिसामानाधिकरण्यधीरप्युपपादिता स्यात्। यद्वा संस्थानविशेषैकार्थसमवायि द्रव्यत्वमेव घटत्वम्। न नियमविरोध इति। परापरभावापन्न एव जाती समाविशत इति यो नियमस्तद्विरोधो नास्तीत्यर्थः। तृतीयमिति। सामान्यमिति शेषः। तथा भूतत्वमूर्त्तत्वे अपि जाती एवेति भावः। नन्वनभ्युपगमवादोपि युक्त्याभासमपेक्षत इत्यत आह तथाचेति। समुच्चयार्थ इत्यतो समुच्चयार्थ इत्यर्थः।

न्यायलीलावतीप्रकाशः

तर्हि संस्थानवृत्त्येवान्यतरकर्मजत्वादिव्याप्यं नानैव घटत्वमस्तु तन्नानात्वस्यावश्यकत्वात्, एवं संस्थानविशेषान्वयव्यतिरेकानुविधानमपि घटत्वव्यवहारस्य संगच्छत इति चेन्न। महान्नीलो घटश्चलतीति परिमाणरूपविशेषकर्मसामानाधिकरण्येन घटत्वानुभवात्। न च गुणात्मकसंस्थाने तत्सम्भवः। यद्वा संस्थानविशेषैकार्थसमवायिद्र-

न्यायलीलावतीप्रकाशविवृतिः

व्यविपक्षबाधकस्य समानत्वादिति भावः। तथाच महान्नीलो घटश्चलतीतिप्रतीतेर्द्रव्यवृत्ती एव ते जाती इति रहस्यम्। ननु घटत्वस्वीकारे मानाभावः अनुगतमतेरन्यथैवोपपादनीयत्वादत आह यद्वेति। संस्थानस्यावयववृत्तित्वादाह एकार्थसमवायीति। कपालरूपादावतिप्रसङ्गवारणाय द्रव्यपदम्। संस्थाने च विशेषो वैजात्यमेवानुभवसिद्धम्। न चान्यतरकर्मजत्वादिना तत्रापि सङ्करः। अन्यतरकर्मजत्वादेरेव नानाभूतस्य स्वीकारात्, अनुगतव्यवहारस्तु तेष्वन्यतरकर्मजत्वोपाधिनैव। नचैवं तदेव वैजात्यं घटत्वमस्त्विति वाच्यम्। महत्त्वादि-

परमपरं चेति ॥

इति न्यायलीलावत्यां सामान्यविचारः ।

समानजातिगुणकर्मकार्याः परमाणवोऽन्योन्यव्यावर्तकधर्म-

न्यायलीलावतीकण्ठाभरणम्

समानजातिगुणकर्मकार्य्या इति बहुव्रीहिस्तत्र कार्य्यपदं गोबृषन्यायेन द्रव्यपरम् । एकदोत्पन्नपाकजाः पार्थिवपरमाणवः पक्षः । तत्र रूपादिभिरर्थासम्भवात् न व्यावृत्तेषु पच्यमानेषु परमाणुषु समानगुणकर्मसामान्यवत्सु विशेषानन्तरेण योगी व्यावर्तकं पश्यति । न चाव्या-

न्यायलीलावतीप्रकाशः

व्यत्वमुपाधिर्घटत्वम् । समुच्चय इति । अनुक्तसमुचय इत्यर्थः ।

समानजातीति । गोबृषन्यायेन कार्यपदं कार्यद्रव्यपरम् । ननु विजातीयानां जातिभिरेव व्यावृत्तत्वात् सिद्धसाधनवारणार्थं समानजातिग्रहणमस्तु, गुणकर्मकार्याणां व्यर्थमुपादानम् एकस्य परमाणोः पार्थिवस्य विजातीयैः पाकजैः विजातीयेन कर्मणाऽप्यभेदेन सिद्धसाध-

न्यायलीलावतीप्रकाशविवृतिः

सामानाधिकरण्यप्रतीतिविरोधादिति दिक् । अनुक्तेति । नचैवं गोत्वाश्वत्वयोरपि सामानाधिकरण्यं स्यादिति वाच्यम् । प्रतीतिबलेन क्वचित्सामानाधिकरण्यस्य क्वचिदसामानाधिकरण्यस्य च कल्पनात्, अन्यथोपाध्योरपि तथाभूतयोः क्वचिदविरोधो न स्यादिति भावः । यत्तूपाध्योः परम्परासम्बन्धः, तेन च सम्बन्धेन परस्परात्यन्ताभावसमानाधिकरणयोर्जात्योरपि सामानाधिकरण्यमेव, साक्षात्सम्बन्धेन तु तथाभूतयोः सामानाधिकरण्यं विरुद्धमिति विनिगमकमिति । तन्न । एवं संयोगयोः सामानाधिकरण्याभावापत्तेः । यदि च घटत्वपृथिवीत्वादेः सामानाधिकरण्ये घटत्वपटत्वादेः सामानाधिकरण्यं प्रतीयते, तत्र च 'सति सम्भव' इतिन्यायेन परस्परात्यन्ताभावसामानाधिकरण्यमेव जात्यसामानाधिकरण्यनियामकं कल्प्यत इति न तादृग्जातिस्वीकार इति मतम्, तदाभ्युपगमवादपर एव ग्रन्थः ।

सिद्धसाधनासम्भवादिति । गुणादिकमादायेति शेषः । पृथिवीत्व-

सम्बन्धिनः व्यावृत्तज्ञानविषयत्वात्(१) द्रव्यत्वाद्वा गवादिवत्(२)। व्यावृत्तज्ञानविषयाश्च द्रव्यत्वाद्घटादिवत्। अणवश्च संशयविष-

---

न्यायलीलावतीकण्ठाभरणम्

वृत्तानामारम्भकसंयोगाधारतामन्तरेण घटशरावोदञ्चनादिनिष्प-त्तिर्न च तामन्तरेण विलक्षणरूपरसगन्धस्पर्शानुभव इति भावः। अन्योन्येत्यभिधानान्न घटादिव्यावर्त्तककिञ्चिद्धर्म्मवत्तया सिद्धसा-धनम्। सम्बन्धिन इति। समवायिन इत्यर्थः। तेन न परम्परासम्बन्धेन केनचिद्व्यभिचारः। समवेतविशेषसिद्धिः—व्यावृत्तज्ञानविषयार्थत्वा-दिति हेत्वर्थः, तेन न सामान्यादौ व्यभिचारः। अत एव हेत्वन्तर-माह द्रव्यत्वादिति। हेतुं साधयति व्यावृत्तेति। प्रकारान्तरेण विशेषा-

न्यायलीलावतीप्रकाशः

नासम्भवात्, एकस्य पार्थिवपरमाणोर्भिन्नजातीयद्रव्यारम्भक-त्वेऽप्यभेदाच्च। अत्राहुः-समानजातीयत्वेन समानगुणत्वेन समान-कर्मत्वेन वा पृथगेव पक्षत्वं, साध्यं च परस्परव्यावर्तकधर्मवत्त्वमतो न घटादिभ्यो व्यावर्त्तकधर्मेण सिद्धसाधनम्, हेतुरपि परस्परव्यावृ-त्तत्वज्ञानविषयत्वम्। अग्रे साध्यमपि तदेव। यश्च व्यावर्त्तको धर्मः स एव विशेषः। विशेषसाधकं मानान्तरमाह अणवश्चेति। परस्परा-भेदसंशयविषयत्वं साध्यमतो न सिद्धसाधनम्। ननु तावतापि

न्यायलीलावतीप्रकाशविवृतिः

जलत्वादिकमादाय सिद्धसाधनमिति समानजातीयत्वेनेति। गन्ध स्नेहादिकमादाय सिद्धसाधनमिति समानगुणत्वेनेति। तिर्यग्गम-नोर्ध्वज्वलनादिना तद्वारणाय समानकर्मत्वेनेति। इदमुपलक्षणम्, समानद्रव्यत्वेनापि पक्षतासम्भवादिति न सिद्धसाधनमिति। यद्यपि साधनदशायां यथाश्रुते न सिद्धसाधनमन्यथा तु विवक्षि-तेऽपि, तथापि संशयमात्रस्य विशेषदर्शननिवर्त्यत्वेन विशेषसिद्धिर-भेदसंशयस्यैव व्यावर्त्तकधर्मदर्शननिवर्त्यतया सिद्धेरिति प्रकृतोप-युक्तत्वे तात्पर्यम्। परस्परव्यावर्त्तकेत्यादिविवक्षितसाध्ये व्यभिचार-

---

(१) ज्ञानविषयार्थत्वादिति मिश्रसंमतोऽत्र पाठो बोध्यः।

(२) त्वाद घटादिवत्-अणव इति प्रा० पु० पाठः।

याः द्रव्यत्वात्। स च सन्देहो विशेषदर्शनान्निवर्तते सन्देहत्वात्, स्थाणुपुरुषसन्देहवत्(१)। ते च निश्चयविषयाः द्रव्यत्वात्। स च निश्चयो विशेषदर्शनाधीनो निश्चयत्वात्।

न पृथक्त्वेन सिद्धसाधनात्। व्यावृत्तबुद्धिश्च किमन्योन्याभावविशिष्टबुद्धिः व्यावर्तकधर्मविशिष्टबुद्धिर्वा? नाद्यः। अन्योन्याभावेनैवोपपत्तेः। न द्वितीयः। स्वगतसंख्यापरिमाणादिभिरेवोपपत्तेः। संशयविषयाश्च योगिनोऽयोगिनो वा? नाद्यः। सर्वज्ञत्वेन त-

न्यायलीलावतीकण्ठाभरणम्

नेव साधयितुं पीठमारचयति अणवश्चेति। स च सन्देह इति। भिन्नत्वाभिन्नत्वकोटिकसन्देह इत्यर्थः। सन्देहत्वादिति। विषयान्तरसञ्चारानाश्यसन्देहत्वादित्यर्थः। विशेषसाधकं मानान्तरमाह—ते चेति। चन्द्रमःपरभागेऽपि योगिनिश्चयविषयत्वान्न व्यभिचारः। स च निश्चय इति। सन्देहविपर्ययोत्तरकालीनो निश्चय इत्यर्थः। निश्चयत्वादित्यत्रापि तन्नेवविवक्षिता(?) अनुगतेति तेषामपि कथञ्चिद् व्यावृत्तबुद्धिजनकत्वादित्यर्थः

न्यायलीलावतीप्रकाशः

न विशेषसिद्धिरित्यत आह स चेति। विशेषदर्शनादिति। परस्परव्यावर्त्तकधर्मदर्शनादित्यर्थः। सन्देहत्वात् परस्पराभेदसन्देहत्वादित्यर्थः। यद्यपि विषयान्तरसंचारेणापि सन्देहो निवर्त्तत इत्यनैकान्तिकम्, तथापि पार्थिवपरमाणूनामन्योन्याभेदसन्देहविषयत्वेनान्योन्यव्यावर्त्तकधर्मदर्शननिवर्त्यसंशयविषयत्वं विशिष्यैव साधनीयम। मतान्तरमाह ते चेति। स च निश्चय इति। अत्र विशेषदर्शनाधीन-

न्यायलीलावतीप्रकाशविवृतिः

माशङ्कयाह परस्पराभेदेति। यद्यपीति। एवंसत्यपीति शेषः। तथापीति। यद्यप्येवमप्युत्पन्नविनष्टे क्वचिद्व्यभिचार एव, तथापि नित्यत्वमपि हेतौ विशेषणमिति भावः। यथाश्रुतहेतोः संशयविपर्ययानुत्तरभाविप्रत्यक्षे व्यभिचारादन्यथा व्याचष्टे अत्रेति। ननु तथापि प्रत्यक्षविष-

(१) स्थाणुसंशयवत्–प्रा० पु० पाठः।

स्य सन्देहाभावात् । न द्वितीयः । अयोगिनां परमाणुदर्शनस्यैवाभा-वात् । प्रमेयत्वेन समवायस्यापि संशयविषयत्वेन विशेषव-त्त्वप्रसङ्गात् । निश्चयत्वं च विशेषनिश्चयेनैव व्यभिचारीति न विशेषसिद्धिः ।

मैवम् । समानजातिगुणकर्मकार्याणामणूनां द्रव्यत्वेना-न्योन्यव्यावर्तकसमवायिधर्मविशिष्टबुद्धिविषयत्वस्य साधना-त् । न च पृथक्त्वादिकमेव(१) परमाण्वन्तरात्परमाणोर्व्यावृ-त्ति(२)बुद्धिजनकमस्तु । तस्य परमाण्वन्तरवृत्ति(३)पृथक्त्वादिना

न्यायलीलावतीकण्ठाभरणम्

अप्रयोजकत्वमाह प्रमेयत्वेनेति । विशेषनिश्चयेनैवेति । अन्यथा अन-वस्थानादित्यर्थः ।

समवायिधर्मेति वर्त्तमानायाऽन्योन्याभावव्यावर्त्तनाय । या ही-

न्यायलीलावतीप्रकाशः

निश्चयविषयत्वादिति हेतुरतो गुणवदिन्द्रियजन्यज्ञानविषयत्वज्ञान-स्यापि निश्चयहेतुत्वान्न व्यभिचारः ।

अप्रयोजकत्वमाह प्रमेयत्वेनेति । निश्चयत्वं चेति । विशेषेऽपि वि-शेषाभ्युपगमे अनवस्थानादित्यर्थः ।

समवायिधर्मेति । तथाच नान्योन्याभावेन सिद्धसाधनमिति भावः । या

न्यायलीलावतीप्रकाशविवृतिः

यद्घटादौ व्यभिचारः, नहि तन्निश्चयस्य विशेषदर्शनजन्यत्वनियमः । न चानुमितिमादायैव तत्र साध्यम् , अनुमितेरप्यनावश्यकत्वादित्य-त आह गुणवदिति । गुणवदिन्द्रियजन्यज्ञानविषयत्वमेव विशेष इति तज्ज्ञानमपि विशेषदर्शनमिति तदधीननिश्चयविषयस्य तत्रासत्त्वा-न्नोक्तदोष इति भावः । केचित्तु गुणवदिति दृष्टान्तः । इन्द्रियजन्यत्वं भूयोऽवयवेन्द्रियसन्निकर्षजन्यत्वं विशेषोऽन्यच्च पूर्ववदेवेति वद-न्ति । उभयमतेऽपि योग्यतागर्भं साध्यमतो न व्यभिचारशङ्का । अत्र च परस्परव्यावर्त्तकनिश्चयाधीननिश्चयविषयत्वं साध्य(परस्परव्यावृ-

(१) दिकमपि-प्रा० पु० पाठः । (२) व्यावृत्त-प्रा० पु० पाठः ।

(३) वर्ति-प्रा० पु० पाठः ।

सदृशत्वात् । या हि यतो व्यावृत्तबुद्धिः सा च न तत्सदृशधर्मकार्या यथाऽश्वात्कुञ्जरस्य । तदणोरपि नाण्वन्तराद्व्यावृत्तबुद्धिस्तत्सदृशधर्मकार्या । सत्ता वा सामान्यसमवायव्यतिरिक्तभावा-

न्यायलीलावतीकण्ठाभरणम्

ति । यद्यपि गोत्वाश्वत्वयोरपि जातित्वेन सादृश्याद् व्यावर्त्तकत्वमेवंसति न स्यात्, विशेषा अपि परस्परं विशेषत्वेन सदृशा एव, न च सादृश्यं जात्या विवक्षितम्, नीलपीतादीनामपि गुणत्वरूपत्वादिजात्या समानानामपि व्यावर्त्तकत्वदर्शनात्, अन्यथा पक्षविशेषणे गुणकर्म्मेति व्यर्थं स्यात्, तथाप्ययमनारब्धद्रव्यपरमाणुः एतत्परमाणुनिष्ठजातिगुणकर्म्मभिन्नधर्म्मसमवायी परमाणुत्वादन्यपरमाणुवदिति विवक्षितत्वात् । न च विशेषेष्वपि विशेषान्तरापेक्षा, स्वत एव व्यावर्त्तकत्वात् प्रदीपवत्, नहि प्रदीपः स्वप्रकाशे प्रदीपान्तरमपेक्षते । विपक्षबाधकस्योक्तत्वमभिप्रेत्यानुमानान्तरमाह सत्ता वेति ।

न्यायलीलावतीप्रकाशः

हीति । ननु कुञ्जरत्वाश्वत्वयोरपि जातित्वेन सादृश्याद्व्याप्त्यसिद्धेः, विशेषाणामपि विशेषत्वेन समानत्वाच्च । न च जात्याऽसमानत्वं विवक्षितं, गुणादिनापि तादृशेन व्यावृत्तधीदर्शनाद्व्यभिचारात् । मैवम् । गुणानामपि स्वाश्रयव्यावृत्त्यसिद्धौ व्यावृत्त्यसिद्धेः, अन्यथाऽन्योन्याश्रयापत्तेः । न च विशेषेष्वेव व्यभिचारः, सिद्ध्यसिद्धिव्याघातात् । व्यावृत्तबुद्धिश्च तेषु स्वाश्रयवत् स्वस्मिन्नपि व्यावृत्तधीजनकस्वभाव

न्यायलीलावतीप्रकाशविवृतिः

तत्वनिश्चयविषयत्वं साध्यं)मतो न द्रव्यत्वादिकमादाय सिद्धसाधनमिति ।

गुणानामिति । पृथक्त्वादीनामित्यर्थः । अन्यथेति । गुणव्यावृत्त्यैवाश्रयव्यावृत्तिस्तद्व्यावृत्तिश्च गुणव्यावृत्त्यैव तत्राभेदेन व्यावर्तकतया वास्तवव्यभिचाराभावादिति भावः । अत अन्योन्याश्रय इत्यर्थः । नचेति । तेषु परस्परं व्यावृत्तबुद्धिर्न परस्परव्यावृत्तधर्मकार्येति व्यभिचारो नेत्यर्थः । सिद्ध्यसिद्धीति । न च तथापि याऽनुमितिः स्वहेतुपरामर्षविरोधिनमर्थं साधयति सा न प्रमाणमिति न्यायेनानुमितेरप्रामाण्यं दुःपरिहरमिति वाच्यम् । विशेषे विशेषान्तराभावेऽपि तस्यैव तत्राभेदेन व्यापकतया वास्तवव्यभिचाराभावादिति भावः । अत एवाह

संसर्गिणी जातित्वात् गोत्ववत् ॥

इति लीलावत्यां विशेषविचारः ।

न्यायलीलावतीकण्ठाभरणम्

सत्ताव्याप्यजातिमत्त्वं च नोपाधिर्गुणादौ साध्याव्यापकत्वात् । जातिमन्निष्ठात्यन्ताभावप्रतियोगित्वमपि नोपाधिः, उक्तविपक्षबाधकेन हेतावेव साध्यव्याप्यत्वग्रहादुपाधेः साध्याव्यापकत्वसिद्धेः । जाति-

न्यायलीलावतीप्रकाशः

त्वात् । सत्ता वेति । न च जातिमन्निष्ठात्यन्ताभावप्रतियोगित्वमत्रोपाधिः, उक्तविपक्षबाधकाद्धेतोः साध्यव्याप्यतयोपाधेः साध्याव्यापकत्वात् । यद्वा अयमनारब्धद्रव्यः परमाणुः एतत्परमाणुनिष्ठजातिगुणकर्मभिन्नधर्मसमवायी परमाणुत्वात् अन्यपरमाणुवत् । विपक्षबाधकं चोक्तमेव । यद्यतो व्यावृत्तत्वेन प्रतीयते तत्ततो व्यावर्त्तकनिःसामान्यधर्मवत् यथाऽश्वात् गौः निःसामान्यगोत्ववती । कार्यद्रव्यगुणकर्मादौ च परम्परासम्बन्धिना विशेषेणैव व्यावृत्तधीसिद्धेर्न तत्कल्पनम् । न चैकपरमाणुवृत्तिनीलरूपयोरेव कथं व्यावृत्तिरिति वाच्यम् । असमवायिकारणाग्निसंयोगेनैव तदुपपत्तेः, तत्रापि तेजः-

न्यायलीलावतीप्रकाशविवृतिः

व्यावृत्तबुद्धिश्चेति । अयमनारब्धद्रव्य इति । न चात्रैतत्परमाणुनिष्ठेतिव्यर्थं तद्विनाप्यारब्धद्रव्यपरमाणौ व्याप्तिग्रहसम्भवादिति वाच्यम् । अनारब्धद्रव्यत्वस्य साध्यविशेषणात, तथा चानारब्धद्रव्यत्वे सति जातिगुणकर्मभिन्नधर्मसमवायित्वमप्रसिद्धमेवेति परमाण्वन्तरे व्याप्तिग्रहार्थं तद्विशेषणमिति भावः । परमाणुत्वादिति । परम्परासम्बन्धेनाश्रयत्वमेव हेतुरतो न व्यर्थविशेषणतेति ध्येयम् । ननु विशेषभिन्नताद्धिश्चेति विशेषणादेवमनन्तसिद्ध्यापत्तिरत आह विपक्ष इति । व्यावृत्तबुद्ध्यभावलक्षणमित्यर्थः । मतान्तरमाह यद्यत इति । व्यावर्त्तकपदेन सामान्यसमवाययोः निस्सामान्यपदेन द्रव्यादित्रिकस्य भावपरेण धर्मपदेनाभावस्य व्युदासः । ननु घटादिना व्यभिचारस्तत्र विशेषाभावादपरघटप्रतियोगिकव्यावर्त्तकधर्माभावाच्चात आह कार्यद्रव्येति । साक्षात्परम्परासाधारणसम्बन्धेनैतादृशधर्मवत्त्वं साध्यमिति भावः । असमवायिकारणेति । एकेनाग्निसंयोगेन नानारूपजननं न भवत्येवेति भावः ।

सदृशत्वात् । या हि यतो व्यावृत्तबुद्धिः सा च न तत्सदृशधर्म-कार्या यथाऽश्वात्कुञ्जरस्य । तदणोरपि नाण्वन्तराद्व्यावृत्तबुद्धिस्तत्सदृशधर्मकार्या । सत्ता वा सामान्यसमवायव्यतिरिक्तभावा-

न्यायलीलावतीकण्ठाभरणम्

ति । यद्यपि गोत्वाश्वत्वयोरपि जातित्वेन सादृश्याद् व्यावर्त्तकत्वमेवंसति न स्यात्, विशेषा अपि परस्परं विशेषत्वेन सदृशा एव, न च सादृश्यं जात्या विवक्षितम्, नीलपीतादीनामपि गुणत्वरूपत्वादिजात्या समानानामपि व्यावर्त्तकत्वदर्शनात्, अन्यथा पक्षविशेषणे गुणकर्म्मेति व्यर्थं स्यात्, तथाप्ययमनारब्धद्रव्यपरमाणुः एतत्परमाणुनिष्ठजातिगुणकर्म्मभिन्नधर्म्मसमवायी परमाणुत्वादन्यपरमाणुवदिति विवक्षितत्वात् । न च विशेषेष्वपि विशेषान्तरापेक्षा, स्वत एव व्यावर्त्तकत्वात् प्रदीपवत्, नहि प्रदीपः स्वप्रकाशे प्रदीपान्तरमपेक्षते । विपक्षबाधकस्योक्तत्वमभिप्रेत्यानुमानान्तरमाह सत्ता वेति ।

न्यायलीलावतीप्रकाशः

हीति । ननु कुञ्जरत्वाश्वत्वयोरपि जातित्वेन सादृश्याद्व्याप्त्यसिद्धेः, विशेषाणामपि विशेषत्वेन समानत्वाच्च । न च जात्याऽसमानत्वं विवक्षितं, गुणादिनापि तादृशेन व्यावृत्तधीदर्शनाद्व्यभिचारात् । मैवम् । गुणानामपि स्वाश्रयव्यावृत्त्यसिद्धौ व्यावृत्त्यसिद्धेः, अन्यथाऽन्योन्याश्रयापत्तेः । न च विशेषेष्वेव व्यभिचारः, सिद्ध्यसिद्धिव्याघातात् । व्यावृत्तबुद्धिश्च तेषु स्वाश्रयवत् स्वस्मिन्नपि व्यावृत्तधीजनकस्वभाव

न्यायलीलावतीप्रकाशविवृतिः

तत्वनिश्चयविषयत्वं साध्यं)मतो न द्रव्यत्वादिकमादाय सिद्धसाधनमिति ।

गुणानामिति । पृथक्त्वादीनामित्यर्थः । अन्यथेति । गुणव्यावृत्त्यैवाश्रयव्यावृत्तिस्तद्व्यावृत्तिश्च गुणव्यावृत्त्यैव तत्राभेदेन व्यावर्तकतया वास्तवव्यभिचाराभावादिति भावः । अत अन्योन्याश्रय इत्यर्थः । नचेति । तेषु परस्परं व्यावृत्तबुद्धिर्न परस्परव्यावृत्तधर्मकार्येति व्यभिचारो नेत्यर्थः । सिद्ध्यसिद्धीति । न च तथापि याऽनुमितिः स्वहेतुपरामर्षविरोधिनमर्थं साधयति सा न प्रमाणमिति न्यायेनानुमितेरप्रामाण्यं दुःपरिहरमिति वाच्यम् । विशेषे विशेषान्तराभावेऽपि तस्यैव तत्राभेदेन व्यापकतया वास्तवव्यभिचाराभावादिति भावः । अत एवाह

संसर्गिणी जातित्वात् गोत्ववत् ॥

इति लीलावत्यां विशेषविचारः ।

न्यायलीलावतीकण्ठाभरणम्

सत्ताव्याप्यजातिमत्त्वं च नोपाधिर्गुणादौ साध्याव्यापकत्वात् । जा· तिमन्निष्ठात्यन्ताभावप्रतियोगित्वमपि नोपाधिः, उक्तविपक्षबाधकेन हे तोरेव साध्यव्याप्यत्वग्रहादुपाधेः साध्याव्यापकत्वसिद्धेः । जाति·

न्यायलीलावतीप्रकाशः

त्वात् । सत्ता वेति । न च जातिमन्निष्ठात्यन्ताभावप्रतियोगित्वमत्रो· पाधिः, उक्तविपक्षबाधकाद्धेतोः साध्यव्याप्यतयोपाधेः साध्याव्याप· कत्वात् । यद्वा अयमनारब्धद्रव्यः परमाणुः एतत्परमाणुनिष्ठजाति· गुणकर्मभिन्नधर्मसमवायी परमाणुत्वात् अन्यपरमाणुवत् । विपक्षबा· धकं चोक्तमेव । यद्यतो व्यावृत्तत्वेन प्रतीयते तत्ततो व्यावर्त्तकनिःस· मान्यधर्मवत् यथाऽश्वात् गौः निःसामान्यगोत्ववती । कार्यद्रव्य· गुणकर्मादौ च परस्परासम्बन्धिना विशेषेणैव व्यावृत्तधीसिद्धेर्न तत्कल्पनम् । न चैकपरमाणुवृत्तिनीलरूपयोरेव कथं व्यावृत्तिरिति वाच्यम् । असमवायिकारणाग्निसंयोगेनैव तदुपपत्तेः, तत्रापि तेजः–

न्यायलीलावतीप्रकाशविवृतिः

व्यावृत्तबुद्धिश्चेति । अयमनारब्धद्रव्य इति । न चात्रैतत्परमाणुनिष्ठेतिव्यर्थं तद्विनाप्यारब्धद्रव्यपरमाणौ व्याप्तिग्रहसम्भवादिति वाच्यम् । अनार· ब्धद्रव्यत्वस्य साध्यविशेषणात, तथा चानारब्धद्रव्यत्वे सति जातिगु· णकर्मभिन्नधर्मसमवायित्वमप्रसिद्धमेवेति परमाण्वन्तरे व्याप्तिग्रहार्थं तद्विशेषणमिति भावः । परमाणुत्वादिति । परस्परासम्बन्धेनाश्रयत्वमेव हेतुरतो न व्यर्थविशेषणतेति ध्येयम् । ननु विशेषभिन्नताद्धेश्चेति विशेषणादेवमनन्तसिद्ध्यापत्तिरत आह विपक्ष इति । व्यावृत्तबुद्ध्यभाव· लक्षणमित्यर्थः । मतान्तरमाह यद्यत इति । व्यावर्त्तकपदेन सामान्य· समवाययोः निस्सामान्यपदेन द्रव्यादित्रिकस्य भावपरेण धर्मपदेना· भावस्य व्युदासः । ननु घटादिना व्यभिचारस्तत्र विशेषाभावादपर· घटप्रतियोगिकव्यावर्त्तकधर्माभावाच्चात आह कार्यद्रव्येति । साक्षात्पर· स्परासाधारणसम्बन्धेनैतादृशधर्मवत्त्वं साध्यमिति भावः । असम· वायिकारणेति । एकेनाग्निसंयोगेन नानारूपजननं न भवत्येवेति भावः ।

किं पुनः समवायासिद्धौ मानम्, प्रत्यक्षमनुमानं वा? नाद्यः। तदभावात्। इह तन्तुषु पट इत्यत्र प्रत्यक्षमस्ति इति चेन्न। विचारासहत्वात्। समवायो ह्याधारबुद्धिं वा कुर्यात्, आधेयबुद्धिं वा, उभयबुद्धिं वा? नाद्यः। उभयत्रापि (१)इहेतिप्रतीतिप्रसङ्गात्। न द्वितीयः। उभयत्राप्याधेयबुद्धिप्राप्तेः। न तृतीयः। उभयत्राप्युभयबुद्धिप्रसक्तेः। जातिजातिमन्तौ सम्बद्धौ इत्यनुभवोऽस्तीति चेत्। न, अत्रानुभवे हि समवायस्तदीयत्वेन वाऽनुभूयते, अन्यदीयत्वेन वा, सम्बन्धस्वरूपमात्रेण वा(२)? नाद्यः। तदीयत्वस्य सम्बन्धान्तरत्वेनानवस्थापातात्। नेतरः(३)।

न्यायलीलावतीकण्ठाभरणम्

गुणकर्मादौ व्यावृत्तधीः क्वचिदाश्रयवैलक्षण्यात् क्वचित् परंपरासम्बद्धधर्मान्तरादिति।

समवायसिद्धाविति। द्रव्यादिपञ्चकव्यतिरिक्तभावसिद्धावित्यर्थः। उभयत्रापीति। समवायस्योभयनिरूप्यत्वादित्यर्थः। तदीयत्वस्येति। तदी-

न्यायलीलावतीप्रकाशः

परमाणुवृत्तिविशेषेण परम्परासम्बन्धिना व्यावृत्तव्यवहारादित्यन्ये।

किम्पुनरिति। जात्यादिविशिष्टधीर्विशेषणविशेष्यसम्बन्धानिमित्तिकेत्यत्र किं मानमित्यर्थः। इह तन्तुष्विति। असम्बद्धस्वरूपयोस्तथाबुद्ध्यभावादित्यर्थः। जातिजातिमन्ताविति। न ह्यसम्बद्धस्य रूपद्वये विशिष्टधीव्यपदेशावित्यर्थः। अत्रेति। सम्बद्धानुभवे हि सम्बन्धो न

न्यायलीलावतीप्रकाशविवृतिः

विशेषणस्य परम्परासम्बन्धघटकेनेति शेषः। तदेवोत्तरत्र विभावयति तत्रापीति। अन्य इत्यरुचौ, तद्बीजं तु पक्षधर्मताबलादेवोक्तरीत्या विशेषसिद्धौ किं गुरुसाध्योपादानेनेति। यत्तु अनित्येषु परम्परासम्बन्धविशेषसिद्धौ व्यभिचार इत्यरुचिबीजम्। तत्तुच्छमसिद्धावपि पक्षसमत्वेन व्यभिचाराभावादिति।

सिद्ध्यसिद्धिव्याघातादाह जात्यादीति। समवायिनाविमाविति

---

(१) इहेतिबुद्धिप्रसङ्गात्-प्रा० पु० पाठः। (२) सम्बन्धरूपत्वमात्रेण-प्रा० पु० पाठः।
(३) द्वितीयः-प्रा० पु० पाठः।

अन्यत्रैव सम्बन्धबोधप्रसङ्गात् । न तृतीयः(१) । क्वचिदपि सम्बन्धप्रत्ययानुपपत्तेः । असत्येव सम्बन्धे तदीयत्वमनुभूयत इति चेत् । न । जात्यादेरप्यसत्येव सम्बन्धे तदीयत्वानुभवप्रसङ्गात्, असत्ख्यातिप्रसङ्गाच्च । सम्बन्ध(स्व)रूपमात्रमेव प्रथते(२) तस्य च जातिव्यक्तिभ्यां निरूपणात्तदीयत्वव्यपदेश इति चेन्न । जातेरपि व्यक्तिनिरूपणीयत्वात्तदीयत्वेन व्यपदेशोपपत्तेः(३),

न्यायलीलावतीकण्ठाभरणम्

यत्सम्बन्धमन्तरेण तदीयबुद्धेरभावात् । अन्यत्रैवेति । यदीयत्वेन सम्बन्धो भासते तत्रैवेत्यर्थः । क्वचिदपीति । यदि सम्बन्धः स्वरूपेण भासते तदा कुत्रापि विशिष्टप्रतीतिं न कुर्यादित्यर्थः । असत्येवेति । समवायसम्बन्धेऽसत्येवेत्यर्थः । जात्यादेरिति । तर्हि असत्यपि जात्यादौ तदीयत्वव्यवहारसम्भवादित्यर्थः । असदिति । सम्बन्धमन्तरेणापि तत्प्रत्ययस्य भ्रमत्वापत्तेरित्यर्थः । असम्बद्धोऽपि समवायो येन निरूप्यते तत्रैव स्वोपरक्तप्रत्ययं करोतीत्ययमस्य स्वभाव इत्यत आह– सम्बन्धरूपेति । जातेरपीति । सम्बन्धमन्तरेणैव निरूपकस्वोपरक्तप्रत्ययाधान-

न्यायलीलावतीप्रकाशः

विशेषणत्वेन भासते तस्य प्रथममज्ञानात्, संयुक्ताविमावितिवत् समवायिनाविमावित्यननुभवाच्च । नापि विशेष्यत्वेन, अनयोः समवाय इत्यननुभवात् । नापि स्वरूपेण, समवायं जानामीति विषयतयाऽननुभवादिति । तदीयत्वमिति । समवायस्येति शेषः । जातेरपीति ।

न्यायलीलावतीप्रकाशविवृतिः

एतादृशी प्रतीतिरुभयसिद्धा नास्त्येव. या चास्ति रूपवानित्याकारा तस्यां विशेषणत्वेन समवायस्य विषयत्वे समवायिनाविमावित्युल्लेखापत्तिरिति भावः । एवमग्रेऽपि न स्वरूपेणास्य न विशेषणत्वेन नापि विशेष्यत्वेनेति शङ्कितुरभिप्रायस्तथा भानञ्चासम्भवि उभयथैव भानानभ्युपगमादिति । स्वरूपेणेत्यस्यान्यानुपधानेनेत्यर्थं कल्पयित्वा दूषयति समवायमिति । ननु समवायरूपसम्बन्धान्तरमभ्युपेयत एवं

(१) नेतरः—प्रा० पु० पाठः । (२) प्रतीयते० प्रा०पु०पाठः । (३) व्यपदेशापत्तेरिति मु०पु०पाठः ।

सम्बन्धे च दृश्यसम्बन्धानुपलम्भे नायमेतदीयः सम्बन्ध इति प्रतीतिप्रसङ्गाच्च । सत्ता(नीलत्व)नीलगुणद्रव्याणां च समवायेनैकसंवेदनगोचराणां कस्य केन समवाय इति व्यवस्थानुपपत्तेः । नानुमानम्, लिङ्गाभावात् । इहेतिबुद्धिर्लिङ्गमिति चेत् । न । समवायाप्रत्यक्षत्वे इहेतिबुद्धेर्निर्विषयाया अनुपपत्तेः(१) । आधाराधेयभावाख्यं सम्बन्धान्तरमेव तद्गोचर इति चेत् । न । दूषितत्वात्, पदार्थान्तरस्वीकारप्रसङ्गाच्च । अत एवेहेति प्रत्ययोपपत्तौ समवायाननुमानप्रसङ्गाच्च । जात्यादिवि-

---

न्यायलीलावतीकण्ठाभरणम्

स्वाभाव्यं यदि समवायस्य कल्प्यते, तदा जात्यादावप्येवमस्तु किं समवायेनापीत्यर्थः । किञ्च समवाये सम्बन्धश्चेन्नास्ति तदा नायमेतदीय इत्येवं कथं न स्यादित्याह—सम्बन्ध इति । स नीलो घट इत्यत्र समवायश्चेदेक एव तदा सत्ताया नीलगुणस्य घटस्य च घटनिष्ठतयैव भानमिति नियमो न स्यादन्यथा भानं स्यादित्याह सत्तेति । इहेतिबुद्धिरिति । इह तन्तुषु पट इति बुद्धिः सम्बन्धनिमित्ता इहेतिबुद्धित्वादिह कुण्डे बदरमिति बुद्धिवदित्यर्थः । समवायेति । वैशेषिकमते इहेतिबुद्धेर्विषय एव दुर्वच इत्यर्थः । दूषितत्वादिति । आधारे वा इहबुद्धिराधेये उभय एव वेत्यादिना दूषितत्वादित्यर्थः । पदार्थान्तरेति । इहबुद्धेर्विषयस्य समवायभिन्नस्य पदार्थान्तरस्य स्वीकारप्रसंगादित्यर्थः । जात्यादीति । विशिष्टप्रत्ययस्य विशेषणविशेष्यसम्बन्धमन्तरेणानुपपत्तेरित्यर्थः । यथा अभावभूतलयोर्ज्ञानज्ञेययोर्वा विशेषणविशेष्यभावः सम्बन्धस्तथा जात्यादावप्यवश्यमभ्युप-

न्यायलीलावतीप्रकाशः

तथाच न तद्विशिष्टज्ञाननिमित्तया समवायः सिद्ध्येदित्यर्थः । इहेतिबुद्धिः समवायविषयत्वेन तत्र लिङ्गम्, अन्यविषयत्वेन वा? आद्यं निराकरोति समवायेति । अन्त्यमाशङ्क्य निराकरोति आधाराधेयेति ।

---

(१) अनुत्पत्तेरिति प्रा० पुं० पाठः ।

शिष्टप्रत्ययो लिङ्गमिति चेन्न । विशेषणविशेष्यभावस्य सम्बन्धान्तरस्य स्वीकारप्रसङ्गात् । तत एव विशिष्टबोधोत्पत्तौ(१) समवायानुमानप्रसङ्गाच्च । उभयाश्रयस्य च सम्बन्धस्याभिन्नरूपस्यैकत्र विशेषणमन्यत्र विशेष्यमिति विलक्षणप्रत्ययजनकत्वानुपपत्तेः । प्राधान्यं विशेष्यत्वं गुणत्वं विशेषणत्वमिति चेन्न । तयोरनिर्वचनात्(२) । असत्येव सम्बन्धे विशेषणविशेष्यप्रत्ययगोचरत्वं तत्त्वमिति चेत् । न । असत्ख्यातिप्रसङ्गात् । विशिष्टव्यवहारजननयोग्यं ज्ञानमेव विशेषणविशेष्यभाव इति चेत् । कः पुनर्विशिष्टव्यवहारः प्रतीतिर्वा व्यपदेशो वा ? नाद्यः । तस्या असद्विषयत्वे(न)(३) असत्ख्यातिप्रसङ्गात् । सद्विषयत्वे तु सम्बन्धान्तरस्वीकारप्रसङ्गात् । न द्वितीयः । स हि

न्यायलीलावतीकण्ठाभरणम्

गन्तव्य इत्याह—विशेषणेति । अन्यथासिद्धिमाह ततएवेति । सम्बन्धस्योभयाश्रितत्वेऽपि गुणप्रधानभावकृतो विशेषणविशेष्यभाव इत्याह प्राधान्यमिति । तयोरिति । गुणप्रधानभावयोरित्यर्थः । ज्ञानमेवेति । ज्ञानविशेषणं विशेष्यं च तत्सम्बन्धफलार्पकमित्यादिनोक्त इत्यर्थः । असद्विषयत्व इति । असत्सम्बन्धविषयत्व इत्यर्थः । स हीति । व्यपदेश इ-

न्यायलीलावतीप्रकाशः

विशेषणेति । दण्डी पुरुष इत्यादौ समवायानङ्गीकारे विशेषणविशेष्यसम्बन्धपूर्वकत्वदर्शनादित्यर्थः । तथाच सति तेनैवार्थान्तरमिति समवायो न सिद्ध्येदित्याह तत एवेति । सम्बन्धान्तरेति । वैशिष्ट्याख्येत्यर्थः । अथ शब्दजातिरूपादिरिन्द्रियसम्बद्धः प्रत्यक्षत्वादित्यनुमानात्

न्यायलीलावतीप्रकाशविवृतिः

त्वत आह वैशिष्ट्याख्येति । समवायस्यानियामकत्वादिति भावः ।

---

(१) प्रत्ययोत्पत्तौ–प्रा० पु० पाठः । (२) उभयोरनिर्वचनात्–प्रा० पु० पाठः ।
(३) सप्तम्यन्त एव पाठो मिश्रेन व्याख्यातः किन्तु गु० प्रा० पुस्तकद्वये तृतीयान्त एव दृश्यते ।

विशिष्टाकारप्रत्ययजनको न वा ? न चेत्, नानर्थकव्यपदेशेन सह विषयविषयिभावः विशेषणविशेष्ययोः । जनकश्चेत्, प्रत्ययस्य सदसत्प्रकाशनशीलत्वेन पूर्वदोषानतिवृत्तेः । कुतश्चैकैव (१)प्रतीतिर्निमित्तभेदमन्तरेणैकत्र विशेषणव्यवहारमन्यत्र विशेष्यव्यवहारमर्पयति ।

अत्रोच्यते । जात्यादिगोचरो विशिष्टव्यवहारः (२)सम्ब-

न्यायलीलावतीकण्ठाभरणम्

त्यर्थः । व्यपदेशो हि शब्दप्रयोगः, स विशिष्टप्रत्ययजनको न वेत्यर्थः । विशिष्टप्रतीत्यजनकत्वे व्यपदेशानर्थक्यमित्याह न चेदिति । प्रत्ययस्येति । व्यपदेशेन यः प्रत्ययो जननीयः तस्यासत्सम्बन्धविषयत्वेऽसत्ख्यातिः, सत्सम्बन्धविषयत्वे सम्बन्धान्तरस्वीकारापत्तिरित्याह—जनकश्चेदिति । एकैव बुद्धिरिति । जात्यादिविशिष्टबुद्धिरित्यर्थः ।

जात्यादिविशिष्टव्यवहार इति । इह गवि गोत्वमिह तन्तुषु पट इत्यादि

न्यायलीलावतीप्रकाशः

संयोगबाधे इन्द्रियसम्बन्धघटकतया समवायसिद्धिः इन्द्रियस्य सम्बद्धग्राहकत्वात्, अत एव समवायो नाध्यक्षः इन्द्रियेणासम्बद्धत्वात् । न च सम्बन्धत्वेन तत्सिद्धिः, अनवस्थानात् स्वभावादेव सम्बन्धव्यवहारकारित्वाच्चेति । तन्न । समवायस्वीकारेऽपि स्वरूपसम्बन्धस्यावश्यकतया ज्ञानघटयोरिव गुणजात्यादिभिरपीति तेनार्थान्तरत्वात्, तथाच शब्दस्येन्द्रियविशेषणतया रूपजात्यादेरिन्द्रियसम्बद्धविशेषणतया रूपत्वादेरिन्द्रियसम्बद्धविशेषणविशेषणतया स्वभावसम्बन्धरूपया ग्रहणसम्भवात्किं समवायेन । पूर्वदोषानतिवृत्तेरिति । आद्ये सम्बन्धान्तरस्वीकारप्रसङ्गः, द्वितीये त्वसत्ख्यात्यापत्तिरित्यर्थः ।

जात्यादिगोचर इति । यद्यपि विशिष्टं तत्तद्विशेष्यतत्तद्विशेषणानतिरेका-

न्यायलीलावतीप्रकाशविवृतिः

इन्द्रियप्रत्यासत्तिघटकतया समवायसिद्धिर्नाशङ्कितेति न्यूनत्व-

(१) बुद्धि-प्रा० पु० पाठः मिश्रसम्मतो ज्ञेयः ।
(२) जात्यादिविशिष्टव्यवहार-इति मिश्रसम्मतोऽत्र पाठः ।

न्धनियतः भावमात्रविषयाबाधितविशिष्टव्यवहारत्वात् सघटं

न्यायलीलावतीकण्ठाभरणम्

व्यवहार इत्यर्थः । सम्बन्धनियत इति । अत्र संयोगासिद्धौ बाधस्तेन समवायसिद्धिरेव पर्यवसन्ना । सम्बन्धत्वं च द्रव्यगुणकर्मसामान्यविशेषान्यत्वे सति संयोगान्यगुणान्यत्वमेव संयोगसमवायसाधारणम् । भावमात्रेति । इतरानिरूपणानिरूप्यविशेषणकविशिष्टबुद्धित्वात्

न्यायलीलावतीप्रकाशः

न्नैकं,तथापि पक्षस्याननुगमेऽपि न दोष इत्यन्यत्र विस्तरः । सम्बन्धनियत इति । यद्यपि सम्बन्धत्वं न संयोगसमवायसाधारणमेकमिति संयोगसाधने बाधः, समवायसाधने चाप्रसिद्धिः, तथापि द्रव्यगुणकर्मसामान्यविशेषान्यत्वे सति संयोगान्यगुणान्यत्वमेव सम्बन्धत्वम् । अबाधितेति । निर्विषयकभावविशेषणकविशिष्टबुद्धित्वादितरानिरूपणा·

न्यायलीलावतीप्रकाशविवृतिः

भिया पूरयति पक्षस्येति । तथाच घटत्वविशिष्टघटज्ञानत्वादिनैव पक्षतेति भावः । न चान्यत्र सन्दिग्धानैकान्तिकता साध्याभावसन्देहस्यादोषत्वादित्यभिप्रेत्याह अन्यत्र विस्तर इति । यद्यपीति । विशिष्टप्रत्ययजनकत्वं सम्बन्धत्वं यद्यप्यनुगतमेव तथापि तादृशसाध्ये स्वरूपसम्बन्धेनैवार्थान्तरमिति तद्व्यावृत्तमेव साध्यं तादृशं चानुगतं नास्तीति भावः । तथापीति । संयोगसङ्ग्रहाय संयोगान्येति गुणविशेषणम् । न चाभावात्मकस्वरूपसम्बन्धेऽतिव्याप्तिरन्योन्याभाववत्त्वस्य निरुक्तस्याभावोऽभावाभावत्वेन विशेषणं वा । यद्यपि प्रकृते तत्साधारण्येपि न दोषः,जात्यादिविशिष्टबुद्धौ तेनार्थान्तरशङ्काया अभावात्,तथापि हेतौ भावपदोपादानात्तन्मात्राभिप्रेतम् । मूलोक्तहेतोर्जातः कृत इत्यादौ व्यभिचारमाशङ्क्याह निर्विषयेति । अबाधितपदविमुक्तं हेतोरेवार्थकथनमित्यबाधितपदं मूलस्थमेव योज्यमतो न भ्रमे व्यभिचारः । भावविशेषणत्वेत्यस्य च भावमात्रविषयकेत्यर्थोऽतो नाभावादिविशेष्यकप्रतीतौ व्यभिचारः । इतरेति । अत्रापि तद्विशेषणकत्वं तन्मात्रविषयकत्वम्, इदं च ज्ञानादिविशिष्टबुद्धिव्यावृत्त्यर्थमुक्तम् । न चात्र समवायाविषयतयाऽसिद्धिः, तद्विषयताभ्युपगमात् । न चोभयत्र हेतौ वने सिंहनाद इति प्रतीतौ व्यभिचारः, बुद्धिपदस्य लौकिकसाक्षात्कारपरत्वात्, लौ·

भूतलमिति व्यवहारवत् । असति सम्बन्धावभासे विशिष्टव्यवहारः कुत इति चेत् । गुणद्रव्यविषयात् बुद्धिविशेषादिति ब्रूमः ।

न्यायलीलावतीकण्ठाभरणम्

निर्विषयकभावबुद्धित्वादिति वा हेत्वर्थः । न च ज्ञानवानात्मेत्यादौ हेत्वसत्त्वाद् भागासिद्धिः, तादृशबुद्धीनामपक्षीकरणात् । न च तत्र समवायासिद्धिप्रसङ्गः, ईदृशबुद्धिं पक्षीकृत्य सम्बन्धोपादानविशेषणकविशिष्टबुद्धित्वादिना तत्साधनात् । गुणद्रव्येति । सम्बन्धिद्वयो-

न्यायलीलावतीप्रकाशः

निरूप्यविशेषणकविशिष्टबुद्धित्वाद्वित्यर्थः । अतो नाभावज्ञानादिविशिष्टबुद्धौ व्यभिचारः । न च स्वरूपसम्बन्धेनार्थान्तरम्, लाघवादेकस्यैव सम्बन्धस्य सिद्धेः, स्वरूपसम्बन्धस्याननुगतत्वादनन्तत्वाच्च । न चाप्रयोजकत्वं, विशिष्टप्रत्यक्षस्य सम्बन्धानियम्यत्वे गवाश्वादावप्यापत्तेः, गोत्वसमवायवानित्यत्र त्वारोपितः समवायः प्रतीयते । विशेषणविशेष्ययोः सम्बन्धज्ञानं विशिष्टव्यवहारजनकमिति मन्यमान आह असतीति । बुद्धिविशेषादिति । बुद्धौ च विशेषोऽप्रकाशमान-

न्यायलीलावतीप्रकाशविवृतिः

किकत्वं चानागतसाक्षात्कारजनकप्रत्यासत्त्यजन्यत्वम् । उदाहृतप्रतीतिश्च यदि शाब्दी तदा साक्षात्कारपदेन, यदि प्रत्यक्षादिः लौकिकपदेन व्यावृत्ता । न च शाखायां संयोग इति प्रतीतौ व्यभिचारः, प्रत्यक्षयोः पक्षसमत्वादन्यादृश्यां च हेत्वभावादिति भावः । यद्यपि विशिष्टव्यवहारस्तद्विशिष्टव्यपदेश इति मूलकृद्वक्ष्यति, तथाच बुद्धित्वं तत्रासिद्धं, तथापि तन्मूलं प्रत्यक्षबलादेव समवायसिद्धाविव्याशङ्कानिराकरणमात्रपरमिति प्रकाश एव व्यक्तम् । न तु पक्षनिर्वचनपरमिति ध्येयम् । अतो नाभावेति । अभावविशिष्टबुद्धौ मूलोक्तहेतोरपि यद्यपि न व्यभिचारः, तत्पदकृत्यमपि प्रसङ्गादुक्तं, यथाश्रुतमेव साध्यं, हेतुरपि विशिष्टबुद्धित्वादित्येवं मनसि मतान्तरं निधाय तत्रार्थान्तरं निराकरोति नचेति । विशिष्टप्रत्यक्षस्येत्युपलक्षणं, विशिष्टव्यपदेशस्येत्यपि द्रष्टव्यम् । ननु यदि विशिष्टव्यपदेशः सम्बन्धनियतस्तदा कथं गोत्वसमवायवानिति व्यपदेश इत्यत आह गोत्वसमवायेति ।

अघटं भूतलमित्यत्र घटाभावभूतलविषयाद्बुद्धिविशेषादिव । कुतस्तर्हि सम्बधानुमानम्, बुद्धिविशेषादेव विशिष्टव्यवहारोपपत्तेः। न हि तथासति(१) विशिष्टव्यवहारजनकत्वेन सम्बन्धानुमानम्, अपि तु तद्व्यापकत्वेन । व्यापकत्वं च तस्य दृष्टान्तप्रतीतमेव(२) तदभावेऽपि तद्बलेन सम्बन्धानुमानम् । तथासति ध्वंसस्य

न्यायलीलावतीकण्ठाभरणम्

पलक्षणम् । कुत इति । बुद्धिविशेषणे वा अन्यथासिद्धेरिति । व्यापकत्वेन तत्सिद्धिर्न तु विशिष्टप्रत्ययविषयत्वेन तज्जनकत्वेन वेत्याह नहि तथासतीति । एतादृशानिष्टप्रसंगभयेन तदन्यविशिष्टबुद्धित्वेन हेतुर्विशेष्यस्तेन न व्यभिचार इति भावः । पूर्वविकल्पपक्षं परिगृह्णाति

न्यायलीलावतीप्रकाशः

संसर्गप्रकाशत्वमेव। न चैवं घटव्यवहारोऽपि तत एव स्यादिति घटोऽपि न सिद्ध्येदिति वाच्यम्। घटस्य प्रत्यक्षत्वेन प्रत्याख्यातुमशक्यत्वात्, समवायस्य चातीन्द्रियत्वात्। दृष्टान्तेति । सघटं भूतलमित्यादौ तथादर्शनादित्यर्थः । तद्बलेन-विशिष्टव्यवहारबलेन, भूतलाभावयोरपि समवायः सम्बन्धोऽनुमीयत इत्यर्थः। ध्वंसस्येति । अन्येषामभावानामजन्यत्वादित्यर्थः । समवायिकारणवत्त्व इत्यत्र पाठे समवायिकारणं यस्य तत्त्व इत्यर्थः। ननु विशिष्टव्यवहारो विशिष्टविषयकं

न्यायलीलावतीप्रकाशविवृतिः

यद्यप्यारोपिततत्त्वेऽपि समवायस्य तन्नियतत्वं साध्यं नास्ति, तथापि सम्बन्धात्मक एव तत्र सम्बन्धस्तत्र नियामक इत्यत्र तात्पर्यम्। केचित्तु गोत्वसमवायवानिति प्रतीतौ निर्विषयकेत्यादिहेतौ व्यभिचार इत्यत आह गोत्वसमवायेति । तथाच हेतौ बुद्धिपदेन लौकिकसाक्षात्कारत्वं विवक्षितमारोपस्य चातथात्वान्न तत्र व्यभिचार इति भाव इत्याहुः। तदयुक्तम्, समवायस्य तन्मते विशिष्टबुद्ध्यविषयत्वेनारोपासम्भवात् । विशेषोपादानतात्पर्यमाह अन्येषामिति । यद्यपि

---

(१) तथासतीति पुस्तकद्वये यद्यपि नास्ति किन्तु मिश्रसम्मतत्वान्मुद्रितम् ।

(२) दृष्टान्तेतिदृष्टमेव-प्रा० पु० पाठः ।

समवायिकारणवत्त्वे(न) भावत्वापत्तेः । विशिष्टव्यवहारस्तु विशिष्टव्यपदेशः । कस्तस्य विषयः ? विशेषणविशेष्यस्वरूपम् । कुतस्तर्हि तयोः सम्बन्धावभासः ? विशेषणविशेष्यपदवाचकपदसन्निधानादारोपितसम्बन्धगोचरः । कुतः पुनरनारोपितसम्बन्धगोचरो न स्यात्? समवायस्याप्रतीतेः तदितरस्या(१)भावात् । वि-

न्यायलीलावतीकण्ठाभरणम्

विशिष्टेति । कुतस्तर्हीति । विशेषणविशेष्यभानमेवंसति स्यान्न तु सम्बन्धभानमित्यर्थः। बुद्धिविशेषणविशेष्ययोर्ग्रहे वैशिष्ट्यमारोप्यत इत्यर्थः। कुतः पुनरिति । वास्तव एव सम्बन्धः कथं न तद्विषय इत्यर्थः । समवायस्येति । अतीन्द्रियत्वात्तस्येत्यर्थः। ननु वैशिष्ट्यमेव प्रतीयमानं तत्र सम्बन्धः स्यादित्यत आह अन्यस्येति । वैशिष्ट्यस्य भावाभावसाधारण्यं चेत्तदा तदेकमनेकं वा ? यद्येकं तदा स्वास्मिन् स्ववैशिष्ट्यप्रत्ययं न कुर्य्यादनेकत्वे त्वानन्त्यमित्यर्थः । समवायबन्दीग्रहस्तु सिद्ध्यसिद्धिपराहतः, प्रामाण्यप्राधान्यं चाननुगतमित्याह—विशेषणत्वमिति ।

न्यायलीलावतीप्रकाशः

ज्ञानं, तथाचानुभवबलादेव सम्बन्धः सिद्ध्येदित्यत आह विशिष्टेति । तथापि तत्कारणत्वेन विशिष्टविषयकं ज्ञानं सिद्ध्येदित्यत आह कस्तस्येति । नन्विमौ विशिष्टावित्युक्तेऽस्येदं विशेषणमिदं चास्य विशेष्यमिति भासते, तथाचानुभवबलादेव सम्बन्धसिद्धेः कानुमेयतेत्यत आह कुतस्तर्हीति । आरोपितेति । यथार्थानुभवाद्वस्तुसिद्धिरिति भावः ।

न्यायलीलावतीप्रकाशविवृतिः

समवेतत्वेन सकलाभावसाधारणं भावत्वापादनं, तथापि समवायित्वेन जन्यभावत्वेन कारणकार्यभावात्मकप्रतीत्यर्थं कारणत्वग्रहणम् । अस्येदमिति । अत्र षष्ठ्यर्थोऽनुभवविषयः स एव सम्बन्ध इति भावः । यथार्थानुभवादिति । यद्यप्यारोपितत्वेऽपि समवायस्य तत्सिद्धिरप्रत्यूहा, तथाप्यलीक एव सम्बन्धः प्रतीतिविषयः, संयोगादिकमेव वारोप्यमिति मूलार्थ इति भावः । ननु भासमानसम्बन्धानुयोगित्वं प्राधान्यं तत्प्रतियोगित्वं चाप्राधान्यमिति तदनुभवबलादेव सम्बन्धासिद्धि-

(१) अन्यस्येति-मिश्राभिमतोऽत्र पाठः ।

शेषणत्वं चाप्रधानत्वं, प्राधान्यं च विशेष्यत्वम् । तच्च दण्डी पुरुष इत्यत्र पुरुषस्य दण्डाधारत्वम् दण्डपतनप्रतिबन्धकत्वम् (च)। आधेयत्वं च दण्डस्य प्रतिबद्धगुरुत्वाधिकरणत्वमप्राधान्यम् । समवायिकारणत्वं च तन्त्वादेर्विशेष्यत्वं समवायिकार्यत्वं च पटादेर्विशेषणत्वम् । समवायित्वे सति व्यञ्जकत्वं च व्यक्तीनां विशे-

---

न्यायलीलावतीकण्ठाभरणम्

तच्चेति । प्राधान्यमित्यर्थः । दण्डाधारत्वमेव किमित्यत आह दण्डेति । प्रतिबध्यपतनानाश्रयत्वे सति पतनप्रतिबन्धकसंयोगवन्मूर्त्तत्वमित्यर्थः । आधेयत्वं चेति । दण्डस्याप्रधानत्वमिति सम्बन्धः । तदेकमित्याह प्रतिबद्धेति । गुरुत्वप्रतिबन्धः कार्य्याजनकत्वम् । पटवन्तस्तन्तव इति प्रतीतौ विशेष्यत्वविशेषणत्वे विवेचयति समवायिकारणत्वमिति । एवंसति विशेषणत्वमतीन्द्रियं स्यादिति चेत् । सत्यं, नहि तदपि तत्प्रतीतौ भासते, तन्तुषु पट इत्यत्र वैपरीत्येन विशेषणविशेष्यभावो द्रष्टव्यः । व्यंजकत्वं चक्षुरादीनामत उक्तं समवायित्वे सतीति ।

न्यायलीलावतीप्रकाशः

प्राधान्यमप्राधान्यं च नैकमिति दर्शयन्नाह दण्डीति । समवायिकारणत्वमिति । यद्यपि समवायातीन्द्रियत्वे समवायिकारणत्वं प्रत्येतुमशक्यं, तथाप्यप्रतीयमानासंसर्गित्वमनेन विवक्षितम् । व्यञ्जकत्वमिति । यद्यपि व्यक्तिज्ञानजन्यज्ञानविषयत्वं न जातेः तयोः समानसंवित्संवेद्यत्वात्, नापि व्यक्तीनां जातिज्ञानजनकत्वम्, अतीन्द्रिये तदभावात्, तथापि व्यञ्जकत्वमत्र जातिज्ञाने व्यक्तिप्रवेशावश्यम्भावमात्रं विवक्षितम् । एतावन्मात्रं विशुद्धमातापितृयोनिजत्वेप्यस्तीत्यत उक्तम् समवायि-

न्यायलीलावतीप्रकाशविवृतिः

रित्याशङ्कानिराकरणायान्यत्प्राधान्यादिकं दर्शयतीत्याह प्राधान्यमिति । ताथाप्यप्रतीयमानेति । यद्यप्येतदपि न प्रत्ययविषयः उपनीतस्य च विषयत्वं तुल्यं समवायिकारणत्वेऽपि, तथापि यत्रेदमेवोपनीतं तत्रेदमेव विशेष्यत्वादिप्रतीतिविषय इत्यभिप्रायेणेदमुक्तम् । न च पूर्वापरोदाहरणेपीदं वर्त्तत इति तत्रान्यनिर्वचनव्यर्थता, एतदप्रतीतितत्प्रती-

ष्यत्वं, व्यङ्ग्यत्वं च विशेषणत्वम् । नित्येषु च द्रव्यत्वं विशेष्यत्वं, गुणत्वं (च) विशेषणत्वम् । अभावेऽपि(१) तत्प्रतियोग्य-धिकरणत्वं विशेष्यत्वम् , अभावत्वं च विशेषणत्वम् ।

न्यायलीलावतीकण्ठाभरणम्

विशेषणत्वमिति । जातेरिति शेषः । यद्यपि व्यक्तिज्ञानजन्यज्ञानविषयत्वं जातीनां न व्यङ्ग्यत्वं, समानसम्वित्संवेद्यत्वात् , न वा व्यक्ति जन्यज्ञानविषयत्वम् , अतीन्द्रिये तदसत्त्वात् , तथापि विशिष्टज्ञान-जनकज्ञानविषयत्वं जातीनां विशेषणत्वम् , प्रत्ययव्यावृत्त्यधिकरणत्वं च विशेष्यत्वं व्यक्तीनाम् । यद्वा समवायित्वे सतीति श्रोत्रियत्वव्यं-जकविशिष्टमातापितृयोनिजत्वादिव्यावर्त्तनाय । यद्यपि समवायित्वम तीन्द्रियं तथापि जात्या सममगृहीतासंसर्गत्वमयुतसिद्धत्वं वा द्रष्टव्य-म् । द्रव्यत्वमिति । समवायित्वमित्यर्थः । गुणत्वमिति । समवेतत्वमित्यर्थः । तेन न सप्रतियोगिकविशेषणविशेष्यभावत्वविरोधः । तत्प्रति-योग्यधिकरणत्वं तत्प्रतियोग्यधिकरणत्वेन प्रतीयमानत्वम् , अन्यो-न्याभावे च तदभिन्नत्वेन प्रतीयमानत्वं आरोप्य निषिध्यत इति सि द्धान्तात् । अभावत्वमिति । एतच्च घटाभाववद् भूतलमित्यत्र द्रष्टव्यम् ।

न्यायलीलावतीप्रकाशः

त्वे सतीति । तच्चायुतसिद्धत्वं, जात्या सममगृहीतासंसर्गत्वं वा । द्रव्यत्वमिति । यद्यपि द्रव्यत्वगुणत्वयोर्निःप्रतियोगिकयोः सप्रतियोगि-कविशेषणविशेष्यात्मकत्वाविरोधस्तथापि तयोः समवायिकारणत्वाव-च्छेदकं (च) यद्रूपं तस्य सप्रतियोगिकत्वात्तथात्वम् । अभावे चेति । प्रति योग्याधारत्वेन प्रतीयमानत्वम् , अन्योन्याभावे च प्रतियोग्यभिन्न-त्वेन प्रतीयमानत्वं विवक्षितम् , सर्वत्रारोप्य निषिध्यत इति सिद्धा-न्तात् । अभावत्वमिति । यद्यपि घटाभावद्भूतलमित्यत्राभावत्वं घटप्रति-

न्यायलीलावतीप्रकाशविवृतिः

तिस्थल एतदुपन्यासादिति भावः । यद्रूपमिति । यद्यपि तदपि द्रव्य-त्वादिकमेवेत्युक्तदोषतादवस्थ्यम् , तथापि समवायिकारणतावच्छेद-काविशिष्टं तत् सप्रतियोगिकमिति भावः । यथाश्रुतस्य रूपात्यन्ताभाव-

---

(१) अभावे चेति प्रा० पु० पाठः प्रकाशकृत्संमतः ।

(१)तन्तुमान्पटः समवायिनाविमावित्यादौ तु विशेषणविशेष्यसा-दृश्यनिबन्धनोऽयमुपचरितो विशेषणविशेष्यव्यपदेशोऽग्निर्माणवक इतिवत्। प्रतीते च समवायेऽयं विशेषणविशेष्यव्यवहारः।

न्यायलीलावतीकण्ठाभरणम्

भूतले घटाभाव इत्यत्र तु वैपरीत्येन योजनीयम्। ननु यत्र समवाय एव विशेषणत्वेन विशेष्यत्वेन वा भासते तत्र किन्निबन्धनो विशेषणविशेष्यभाव इत्यत आह—तन्तूनामिति। तन्तुमानित्यर्थः। अत्र विशेषणविशेष्यभाव एव पारमार्थिको नास्ति येन विशिष्टबुद्धित्वा-दिति हेतुः सम्बन्धसाधकान् व्यभिचरेदित्यर्थः। इतोऽपि समवा-यिनाविमाविति विशेषणविशेष्यभावव्यवहारो न वास्तव इत्याह—प्रतीते चेति। अयमिति। तन्तुमान् पटः, समवायायिनाविमाविति वि-शेषणविशेष्यभावव्यवहार इत्यर्थः। समवायातीन्द्रियत्वेऽन्यथा तदनुपपत्तेरिति भावः। ननु यत्र समवायाप्रतीतिस्तत्र कथमित्यत

न्यायलीलावतीप्रकाशः

योगिकं भूतलप्रतियोगिकं च विशेषणत्वं, तथापि भूतलवर्त्तिप्रति-योगिनिरूप्यत्वमभावस्य भूतलविशेषणत्वम्। ननु यत्र समवायो वि-शेषणं तत्र विशिष्टव्यवहारोऽस्ति, न च तत्र सम्बन्ध इत्यनैकान्तिक-मित्यत आह तन्तुमानिति। तन्तुमत्वं तन्तुसमवायः, पूर्वमत्राबाधि-तत्वेन हेतुर्विशेषितः समवाये च समवायाङ्गीकारे बाधकमेवास्तीति तु परमार्थः। प्रतीते चायमिति। चकारो हेतौ, यस्मात्प्रतीते समवायेऽयं-व्यवहारस्तस्मादुपचरितोऽयं, वास्तवत्वे समवायप्रतीतिरेव न स्या-

न्यायलीलावतीप्रकाशविवृतिः

विशेष्येऽसत्त्वादन्यथा व्याचष्टे प्रतियोग्याधारत्वेनेति। भूतलवर्त्तीति। भूत-लारोपणीयेत्यर्थः। इत्यनैकान्तिकमिति। यद्यपि स्वरूपसम्बन्धस्यापि तत्र समवायात्मकत्वेन निरुक्तसाध्यमस्त्येव, तथापि सम्बन्धिभिन्नसम्ब-न्धसाध्यताभिप्रायेण शङ्क्यम्। हेतुर्विशेषित इति। मूलकृतेति शेषः। वा-

---

(१) अत्र 'तन्तूनां पट' इति मिश्रसम्मतः पाठो बोध्यः

तत्प्रतीतेश्च पूर्वमयुतसिद्धिसाहश्यादसम्बन्धानुपलम्भनिबन्धनः।
विशेषणविशेष्यशब्दौ च गवादिशब्दवदनेकार्थौ, नतु सर्वसा-

न्यायलीलावतीकण्ठाभरणम्

आह तत्प्रतीतेश्चेति। ननु विशेषणविशेष्याननुगमे सङ्केतोऽपि कथं ग्राह्य इत्यत आह--विशेषणेति। तथाच गवादिपद इव सङ्केतोऽपि तद्धर्मावच्छेदेनैवेत्यर्थः। वस्तुतस्तु प्रत्याय्यव्यावृत्त्यधिकरणतावच्छेदकं यदन्विततया ज्ञाते तात्पर्यविषयान्वयधीस्तद्भेदकं व्यवच्छेदकं वाऽनुगतमेव विशेषणत्वमेवं प्रत्याय्यव्यावृत्त्यधिकरणत्वं विशेष्यत्वमप्यनुगतमेव। प्राभाकरमते तु समवायोऽतीन्द्रियो ना-

न्यायलीलावतीप्रकाशः

तु हेतोरनैकान्तिकत्वात्। अयं-पूर्वोक्तः समवेतत्वादिरूपः। ननु समवायसिद्धेः पूर्वं यस्तन्तुमत्त्वव्यवहारस्तेनानैकान्तिकं स्यादित्यत आह तत्प्रतीतेश्चेति। समबायस्य चातीन्द्रियत्वमतीन्द्रियसम्बन्ध-

न्यायलीलावतीप्रकाशविवृतिः

त्तवत्व इति। अबाधितत्व इत्यर्थः। हेतोरिति। अबाधितत्वगर्भहेतुसत्त्वे साध्यस्य चानवस्थाया असत्त्वाङ्गीकारे इत्यर्थः। इदं च सम्बन्धिभिन्नसम्बन्धसाध्यतापक्षे इति प्रागुक्तमेव स्मर्त्तव्यम्, तदपि मूलोक्तहेत्वभिप्रायेण। वस्तुतः समवायस्यातीन्द्रियत्वेन तत्प्रतीतौ लौकिकत्वगर्भहेत्वभाव एवेति भावः। ननु समवायसिद्धेरिति। यद्यपि समवायप्रतीतिपूर्वकमपि सम्बन्धनियतत्वसाध्यसत्त्वान्न व्यभिचारः, न वाऽसम्बन्धानुपलम्भनिबन्धनत्वेन तत्परीहार इत्यसंगतमेतत्तथापि पटे यस्तन्तुव्यवहारस्तन्तुविशेषणत्वव्यवहारः समवायिकार्यत्वनिबन्धन इति प्रागुक्तं मूले तत्र च समवायिकार्यत्वनिबन्धनत्वं न सम्भवति समवायसिद्धिप्राक्कालिकपटविशेषणत्वप्रतीत्या व्यभिचार इति शङ्कार्थः। तत्रासम्बन्धानुपलम्भनिबन्धन एव विशेषणत्वव्यवहारः अननुगमस्याग्रे समाधेयत्वादिति परिहाराभिप्रायः। इममेव मूलार्थं पूर्वं प्रकाशकृदुक्तवानिति ध्येयम्। विशेष्याकाङ्क्षायामाह(१) अयं पूर्वोक्त इति। स एव कीदृश इत्याकाङ्क्षायामाह समवे-

---

(१) इदं प्रकाशव्यतिक्रमेण व्याख्यानं बोध्यम्।

णारणं विशेषणत्वं विशेष्यत्वं वाऽस्तीति ।

न्यायलीलावतीकण्ठाभरणम्

ना चोत्पादविनाशशीलः, कथमन्यथा श्यामादिरूपानां नित्यत्वे श्यामं नष्टं रक्तमुत्पन्नमिति प्रतीतिव्यवहारौ, तथाच तयोः सम-वायोत्पादविनाशावेव विषयः । तदेतदनुपपन्नम्-ताभ्यां समवाया-नुल्लेखात्, अन्यथा गन्धादयोऽपि नित्याः समवायस्त्वनित्य इत्यपि वक्तुं सुकरं स्यात्। भट्टमते तु वैशिष्ट्यं भावाभावसाधारणं सम्ब-न्धः, समवायस्तु नास्त्येवेति । तदपि घटवति पटाभाववति घटा-भावव्यवहारापत्तेः वैशिष्ट्यस्य एकत्वात् । समवायप्रतिबन्दिग्रहस्तु प्रत्यक्षमानमयूखे द्रष्टव्यः ।

न्यायलीलावतीप्रकाशः

त्वेनैव वायुमनः संयोगवत् साधनीयम्, लाघवाच्चैक एव समवायः विशेषणविशेष्यशब्दौ चेति अयमभ्युपगमवादः । व स्तुतो (१)यदन्विततया ज्ञात एव विशेष्ये तात्पर्यविषयीभूते-तरान्वयधीस्तद्व्यवच्छेदकं विशेषणम् उपलक्षणन्तु नैवम्, उप लक्षणानवच्छिन्नेऽप्युपलक्ष्ये तात्पर्यविषयीभूतान्वयबोधात् । इदमेव कार्यान्वयि विशेषणम् अतदन्वय्युपलक्षणम्, एतस्यार्थः यद्व्यावर्त्तकं विशेष्यान्वयिनाऽन्वीयते तद्विशेषणम्, यन्नान्वीयते तदुपलक्षणम्।

प्राभाकरास्तु एकत्र घटादावामपाकदशायां श्यामरक्तरूपोपल म्भोऽस्ति स न तद्द्वयनिबन्धनः रूपस्य नित्यत्वेनैकत्वेन चैकदोप लम्भापत्तेः, तस्मात्तयोः सम्बन्धस्यैवोत्पत्तिविनाशौ, स एव सम-

न्यायलीलावतीप्रकाशविवृतिः

तत्वादीति । समवेतत्वासमवेतत्वादिनिबन्धन इत्यर्थः । आदिपदेन च समवायिकारणत्वनिबन्धनविशेष्यत्वव्यवहारसङ्ग्रहः । वस्तुतः प्र-तीतित्यादिफक्किका अत एवारभ्य कदाचित् समवायनिबन्धनः कदा चिदभिसम्बन्धानुपलम्भनिबन्धनो विशेषणविशेष्यत्वव्यवहार इत्ये-वमर्थकत्वेन मूलव्याख्या सम्यगिति । ननु पटरूपयोः समवायो ना-तीन्द्रिय इत्यत आह लाघवाच्चेति । लाघवसहकृतानुमानादित्यर्थः। शाब्द एव ज्ञाने विशेषणत्वादिविचारस्य प्रायिकत्वात्तदभिप्रेत्याह प-

(१) अत्र पदार्थतया ज्ञाते पाठो विवृत्तिकर्तुरभिमतः।

न्यायनये तु प्रत्यक्ष एव समवायः जातिव्यक्तिभ्यां सह स्वरूपेणानुभूयते । अननुभवे गौरयमिति गोत्वपुरोवर्तित्वयोः सामानाधिकरण्यबोधो न स्यात् । द्वयोः समानेनाधिकरणेन सम्बन्धः सामानाधिकरण्यम् । अयमयं गोत्वं च गोत्वमिति व्यधिकरणोऽनुभवः स्यात् । गोत्वसमवायीति सामानाधिकरण्यप्रत्ययवद्भिनैव सम्बन्धावभासं गोत्वसम्बन्धीति प्रत्ययो

न्यायलीलावतीकण्ठाभरणम्

समानतन्त्रसिद्धान्तं दर्शयति न्यायेति । जात्यादिविशिष्टधीः सम्बन्धविषया विशिष्टधीत्वात् दण्डीतिधीवत् । अभावादिविशिष्टबुद्धेरपि स्वरूपसम्बन्धविषयत्वेन न व्यभिचारः । न च तत्रापि स एवास्त्विति वाच्यम् । लाघवादेकस्यैव सिद्धेः स्वरूपाणान्त्वनन्तत्वादिति भावः । स्वरूपेणेति । न विशेषणत्वेन नवा विशेष्यत्वेनेत्यर्थः । समवायप्रत्यक्षे प्रमाणमाह अननुभव इति । गोत्वसम्बन्धीति । अयं गौरिति प्रत्ययोऽपी-

न्यायलीलावतीप्रकाशः

वाय इत्याहुः ।

तन्न । श्यामं रूपं नष्टं रक्तमुत्पन्नमित्यबाधितानुभवात् समवायस्योत्पत्तिविशेषानुल्लेखाच्च, तन्मतेऽपि तस्यातीन्द्रियत्वात्, अन्यथाऽवयविज्ञानगन्धादयो नित्याः समवायस्योत्पत्तिविनाशाविति स्यात् ।

न्यायनये त्विति । गुणक्रियाजातिविशिष्टबुद्धयो विशेषणविशेष्यसम्बन्धविषयाः विशिष्टबुद्धित्वात् दण्डीतिविशिष्टबुद्धिवत् । न च व्यभिचारः, अभावादिविशिष्टबुद्धेरपि स्वरूपसम्बन्धविषयत्वात् । न चात्रापि तेनैवार्थान्तरं, यतो गुणक्रियाजातिबुद्धीनां पक्षधर्मताबलात्सम्बन्धः सिद्ध्यल्लाघवादेक एव सिद्ध्यति, स एव समवायः, नतु स्वरूपसम्बन्धः तत्स्वरूपाणामननुगतत्वादित्युक्तमिति भावः ।

न्यायलीलावतीप्रकाशविवृतिः

दार्थतया ज्ञात एवेति । तन्मतेपीति । तथाच साक्षात्काररूपायामुत्पादविनाशप्रतीतौ समवायविषयकत्वकल्पनमयुक्तमिति भावः ।

केन रूपेण भासत इत्याद्यनन्तरं क्वचिदनुभव इति मूलप्रतीक-

भविष्यतीति चेत्। न, तत्रापि सम्बन्धप्रतिभानात्। तर्हि अनवस्था? न, तत्र सम्बन्धप्रतीतेरारोपितत्वात्। जाताव-प्यारोपितास्त्विति चेन्न। बाधकाभावात्। तत्र किं बाधकम्? अनवस्था। इष्यत एव सम्बन्धानन्त्यमिति चेत्। इष्यतामस्त्वा-नन्त्यम्। सर्वत्र चारोपे आरोपानुपपत्तेः, आरोप्यस्य सम्बन्धस्या भावात्(१)। संयोग एवारोप्यतामिति चेन्न। तद्व्यावर्तकस्याद्र-व्यत्वस्यायुतसिद्धत्वस्य वोपलम्भात्। संयुक्तावुभाविति(२) प्रत्य-यापत्तेश्च। असम्बद्धरूपत्वे समवायस्य नियतसम्बन्धि-

---

न्यायलीलावतीकण्ठाभरणम्

त्यर्थः। तत्रापीति। गोत्वसमवायीत्यत्रापीत्यर्थः। आरोपितत्वादिति। आरो-परूपत्वादित्यर्थः। स्वरूपसम्बन्धाभिप्रायेणाह—अस्त्वानन्त्यमिति। बाधकाभावादित्यत्र हेत्वन्तरं समुच्चिनोति सर्वत्र चेति। समवाय-वज्जात्यादावपीत्यर्थः। आरोप्यस्यैवेति। प्रमितस्यैवान्यत्रारोप्यत्वादि-त्यर्थः। जातिगुणकर्मादिविशिष्टप्रत्ययेनाह अद्रव्यत्वस्येति। इह तन्तुषु पट इत्यत्राह अयुतसिद्धत्वस्येति। द्वयोरसम्बद्धयोरविद्यमानत्वस्येत्यर्थः। उभयसाधारणमाह संयुक्ताविति। नन्वारोपश्चेत्तदा घट एव गोत्वस-मवायः कथं नारोप्यत इत्याह—असम्बद्धेति। ननु गौरयमिति प्रतीते-रपि गोत्वसमवायवानयमित्याकारः स्यात्, समवायारोपस्य समवाय-

न्यायलीलावतीप्रकाशः

केन रूपेण भासत इत्यपेक्षायामाह स्वरूपेणेति। सर्वत्रेति। समवायवज्जा-त्यादावपीत्यर्थः। अयुतसिद्धत्वस्येति। असम्बद्धयोरविद्यमानत्वस्येत्य-

न्यायलीलावतीप्रकाशविवृतिः

लिखनम्। तत्र भासत इति। केन रूपेण केन प्रमाणेन नाङ्गीकार्यमिति शेष इति योजना। यदा तु स्वरूपेणेति प्रतीकलिखनं तदा सुगम तथाच। एव गोत्वेति। गौरितिप्रत्ययस्य एवमाकारकत्वापत्तिरित्यर्थः। पूर्वत्रोपनीतस्येति। यद्यपि मानसे उपनीतस्यापि विशेष्यत्वं तथाप्युभ-योरुपनीतत्वे तथा, अत्र तज्ज्ञानस्योपनीतत्वादिति भावः। मानसज्ञा-

---

(१) आरोप्यस्यैवाभावादिति मिश्रसमतोऽत्र पाठो बोध्यः।

(२) संयुक्ताविमाविति प्रा० पु० पाठः।

(१)समवायारोपनियमः कथम् । आरोपजनकशक्तिवैचित्र्यात्स्वशरीरे आत्मारोपवत्, अभिन्न एव चन्द्रमसि द्वैतारोपवत्। संसृष्टासंसृष्टत्वजिज्ञासायां सत्यां भेदारोप एव सम्बद्धत्वारोपः(२)। ज्ञातोऽयं घट इत्यत्रापि सामानाधिकरण्यबोधबलेन [सम्बन्धवशेन] सम्बन्धप्रसक्तिरिति चेत्। न । अतीतानागतयोरसत्त्वेन सम्बन्धविरोधात् । तन्मर्यादया वर्तमान-

---

न्यायलीलावतीकण्ठाभरणम्

तन्त्रत्वादित्यत आह संसृष्टेति । ननु यत्र समवायो भासते स एव स्वस्मिन् कथमारोप्यत इत्यत आह भेदेति। प्रथमं समवायः समवायाभिन्न इत्यारोपस्तदन्तरं तत्र समवायारोप इत्यर्थः । तथा च भेदारोप एवेति सप्तमी। यद्वा प्रथमान्त एवायं, य एव भेदारोपः स एव सम्बन्धारोप इत्यर्थः । नन्वेवं सामानाधिकरण्यानुभवबलात् ज्ञानार्थयोरपि सम्बन्धान्तरं स्यादित्याह ज्ञातोयमिति । यद्यपि समवायवन्नायं सम्बन्धः प्रत्यक्षो भवितुमर्हति ज्ञानार्थयोरेकेन्द्रियावेद्यत्वात्, तथाच प्रतिबन्दिरियमुन्मोचनीयैवेति भावः । ननु आत्मा ज्ञात इत्यादौ मानसप्रत्यक्षात् सम्बन्धः सिध्येदित्यर्थः । ननु वर्त्तमाने विषये प्रतीतिबलादयं सम्बन्धः स्वीक्रियतामित्यत आह तन्मर्यादयेति । यथा अती-

न्यायलीलावतीप्रकाशः

र्थः । नियतसम्बन्धिनीति । सम्बन्धशून्यत्वाविशेषाद्गोव्यक्तौ गोत्वसमवायारोपो न घटव्यक्तावपीत्यर्थः । ननु यदि समवायस्वरूपाधीनः समवायारोपस्तदा गौरयमित्यत्रापि समवाये समवायारोपः स्यादत आह (३)संसृष्टेति। ननु बाधकाभावात् वर्तमानेऽर्थे ज्ञातता सिध्येदित्यत

न्यायलीलावतीप्रकाशविवृतिः

नरूपं विशेषणमादाय घटविशेष्यकचाक्षुषज्ञानसम्भवेऽपि सिद्धान्त

---

(१) नियतसम्बन्धिनीति सप्तम्यन्तपाठः प्रकाशकर्तुरभिमतः ।

(२) सम्बन्धारोपे इति मु० पु० पाठः ।

(३) अत्र 'तथाच' 'पूर्वत्रोपनीतस्ये'त्यादिविवृतौ प्रतीकदर्शनात् कश्चित्पाठो भ्रष्ट इति ज्ञायते । 'रोपः स्यायं ग्रन्थः ननु' इति आदर्शपुस्तके वर्तते तत्रास्माभिः 'दत आह संसृष्टेति' प्रतीकान्तं संगतं बुध्वा योजितम् ।

स्यापि ज्ञानस्य सम्बन्धानुपपत्तेः । सामानाधिकरण्यप्रत्ययाभा-
वेन व्यपदेशस्योपचरितत्वात् । अबाधितसामानाधिकरण्यबोध-
स्य चानुपप्लुतसम्बन्धानुभवपूर्वकत्वनियमात् दण्डकुण्डलौ यज्ञ-
दत्तसंसृष्टाविति वत् । यद्वा जात्यादिकं स्वाश्रयेण सम्बद्धमन्येना-
सम्बद्धमनुभूयमानं स्वातिरिक्तं सम्बन्धं सहायमपेक्षते, अन्यथा

न्यायलीलावतीकण्ठाभरणम्

तानागतयोर्ज्ञानस्वरूपाधीना तत्प्रतीतिस्तथा वर्तमानेऽप्यर्थे स्यादित्य-
र्थः । ननु घटस्येदं ज्ञानमिति सम्बन्धमन्तरेण कथं षष्ठीत्यत आह
व्यपदेशस्येति । ननु प्रतीतेस्तौल्ये कथमेकत्र सम्बन्धाभ्युपगमो नान्य-
त्रेत्यत आह अबाधितेति । सामानाधिकरण्यबोधः सामानाधिकरण्य-

न्यायलीलावतीप्रकाशः

आह तन्मर्यादयेति । अतीतानागतयोर्ज्ञाततताया अभावे ज्ञातव्यवहारदर्श-
नाद्वर्त्तमानेऽप्यर्थे स व्यवहारो ज्ञानविषयस्वरूपाभ्यामेव जन्यते अ-
तीतवर्त्तमानयोर्ज्ञातताव्यवहारे विषयवैलक्षण्याननुभवात् , अन्यथाऽ-
तीतादौ ज्ञातताया अभावे व्यवहाराभावापत्तेः तस्य ज्ञातताव्याप्य-
त्वात्, न च ज्ञातताज्ञानमेव व्यवहारहेतुर्गौरवादित्यर्थः । व्यपदेश-
स्येति । घटस्येदं ज्ञानमित्येवंरूपस्येत्यर्थः । ननु सामानाधिकरण्या
नुभवान्न समवायसिद्धिः, एकाधिकरणाधेयत्वस्य सामानाधिकरण्य-
त्वात् तस्य च समवायादन्यत्वादित्यत आह अबाधितेति । एतच्च पौ-
र्वापर्यमेकाधिकरणाधेयात्मकसामानाधिकरण्यपक्षे द्रष्टव्यम् । यदा
त्वेकाधिकरणवृत्तित्वं सामानाधिकरण्यं तदा न पौर्वापर्यं समवाय-
स्यैव वृत्तित्वात् । एवं समवाये सम्बन्धानुभवपक्षे समवायं प्रसाध्य
तत्र सम्बन्ध एव नानुभूयत इति समवायसिद्धिर्निरपवादेत्याह यद्वेति ।
अन्यथेति । गोत्वादेराश्रयासम्बन्धाविशेषादयं गौरयमगौरिति प्रती-

न्यायलीलावतीप्रकाशविवृतिः

सौलभ्यादाह घटविशेष्यकमिति । गौरवादिति । स्वरूपसत एव ज्ञानात्
ज्ञातत्वव्यवहारोपपत्तौ ज्ञाततातज्ज्ञानकल्पने गौरवप्रसङ्गादित्यर्थः ।
वस्तुतस्तवातीतादौ ज्ञातताव्यतिरेकनिर्णये तज्ज्ञानमप्यसंभावित
मेवेति भावः । सामानाधिकरण्यबोध एव सम्बन्धबोधो न तु तज्ज-
नक इत्यत आह एतच्चेति । दण्डकुण्डलाविति पुल्लिङ्गप्रयोगः शिष्टप्र-

विचित्रप्रत्ययानुपपत्तेः(१) । समवाये तु विशेषणविशेष्यभावः सम्बन्धोऽवभासते न तु तत्र सम्बन्धान्तरम् । न हि गोत्वसम्बन्धवानयमितिवद्गोत्वसम्बन्धसम्बन्धवानयं तत्सम्बन्धवान्वेति प्रथास्ति । यदि त्वसकृत्सम्बन्धः(२) प्रथते न काचित्क्षतिः । सम्बन्धानन्त्येऽपि नैयायिकानामनियतपदार्थवादित्वेन विरोधाभावात् । तथा च न्यायवार्तिकम् 'समवाये अभावे च विशे-

---

न्यायलीलावतीकण्ठाभरणम्

व्यपदेशः बोध्यतेऽनेनेति व्युत्पत्तेः, तस्य चाबाधितत्वं यथार्थधीजनकत्वमेव । एवं प्रत्यक्षानुभवबलात् समवायं प्रसाध्य प्रकारान्तरं स्यादित्यत आह समवाये त्विति । तथा चानवस्थालक्षणप्रतिकूलतर्कात् स्वरूपसम्बन्धेनैव प्रतीत्युपपत्तिरित्यर्थः । ननु कथं न सम्बन्धान्तरमित्यत आह नहीति । अभ्युपगमवादेनाह यदि त्विति । सम्बन्ध इति । गोत्वसम्बधसम्बन्धवानयमित्याकार इत्यर्थः । अनियतेति । नहि वैशेषिकानामिव षडेव पदार्था इति तत्रावधारणं श्रूयत इत्यर्थः । उपजीव्यसम्मतिमाह तथाचेति । वैशेषिकैस्तु विशेषणविशेष्यविषयकं ज्ञानमेव सम्बन्धत्वेनाभिमतमिति न सम्बन्धानन्त्यमित्यर्थः । अत्र दर्शने समवाय-

न्यायलीलावतीप्रकाशः

त्यनुपपत्तिरित्यर्थः । समवाये त्विति । स च स्वरूपसम्बन्धात्मकोऽन्य एव समवायादित्यर्थः । अत्र वृद्धसंमतिमाह तथा चेति । न चैवं समवायवत् गोत्वमपि स्वभावसम्बन्धेनैव सम्बद्धमवभासतामिति वाच्यम् । लाघवादेकस्यैव सम्बन्धस्य सिद्धेरित्युक्तत्वात, स्वभावसम्बन्धस्य तत्तत्स्वरूपात्मकतयाऽनन्तत्वात् । ननु नीलो घट इत्यनुभवो न विशेषणविशेष्यसम्बन्धगोचरः, अन्यथा दण्डी पुरुष इतिवन्नीली घट

न्यायलीलावतीप्रकाशविवृतिः

योगत्वादेव समाधेयः । स चेति । यद्यपि स्वरूपमपि समवाय एव तत्र

---

(१) नुपपत्तिरिति प्रा० पुं० पाठः ।

(२) सत् कृतप्रबद्धसम्बन्धं इति प्रा० पु० पाठः 'सकृत्संबंध' इति मु० पु० पाठश्चायुक्त इति अयं स्थापितः ।

षणविशेष्यभावात्' इति । न चैतद्भेदाभेदबलादनुपपन्नम् । विरोधेन तयोरनुपपत्तेः । अनुभवसिद्धत्वादविरोध इति चेत् । न, तदभावात् । न हि जातिर्जातिमतोऽभिन्नेति कश्चिदनुभवति । गौरयमिति सामानाधिकरण्यानुभवेऽभेदानुभव इति

न्यायलीलावतीकण्ठाभरणम्

स्यातीन्द्रियत्वात्, अभावे तु समानतन्त्रसिद्धो विशेषणविशेष्यभावसम्बन्ध एव इति भावः । नहि तत्र संयोगः सम्भवति इन्द्रियस्य च प्राप्यकारित्वमुपपादितमेवेति भावः । ननु गौरयमिति गोत्वाभिन्नोऽयं पिण्ड इत्येव भासते नतु गोत्वेदन्तयोः सामानाधिकरण्यं येन तदनुरोधात् समवायप्रत्यक्षता स्यात् पिण्डानामननुगमात्, तदभ्युपगमार्थं भिन्नमपि गोत्वं भवेत्, तथाच धर्म्मधर्म्मिणोर्भेदाभेद इति शङ्कते नचैतदिति । एतदिति सामानाधिकरण्यभानानुरोधात् समवायप्रत्यक्षत्वमनुपपन्नमित्यर्थः । तयोरिति । भेदाभेदयोरित्यर्थः । अनुभवेति । गोत्वाभिन्नोऽयं पिण्ड इत्यनुभवसिद्धत्वादित्यर्थः । एतादृशानुभव एव नास्तीत्याह तदभावादिति । सामानाधिकरण्यानुभवस्यैवाभेदो विषय इति शङ्कते अयमिति । धर्म्मिणा सम-

न्यायलीलावतीप्रकाशः

इति प्रतीत्यापत्तेः, तस्मात्तत्र विशेषणसम्बन्धो विषयोऽत्र तु तदभेदः विषयेणैव धियां विशेषात्, अत्यन्ताभेदे च सहप्रयोगानुपपत्तेर्भेदोऽप्यस्तीति तयोर्भेदाभेदः, अत एव सामानाधिकरण्यप्रथाऽप्युपपद्यते अत्यन्तभिन्नादभिन्नाच्च तस्याव्यावृत्तेः, अन्योन्याभावत्वमव्याप्यवृत्तिवृत्ति नित्याभाववृत्त्यभावत्वसाक्षाद्व्याप्यधर्मत्वात् अत्यन्ताभावत्ववदिति अनुमानमपीति मतं तन्निरस्यति नचैतदिति । विरोधेनेति । भेदाभेदयोर्मिथोविरहरूपतया विरुद्धयोरेकत्र समावेशानुपपत्तेरित्यर्थः । ननु पाकानन्तरं रक्तोऽयं न श्याम इत्यबाधितानुभवबलात् तत्रैव तदन्योन्याभावसिद्धस्त्वयापि भेदाभेदस्वीकारो दुर्वारः । यद्वा संयोगतदभावयोरिवाविरोधः । अत्राहुः । तद्वति तदभावोऽवच्छेदभेदेन

न्यायलीलावतीप्रकाशविवृतिः

उभयनिरूपितसमवायत्वं न सम्बन्धताप्रयोजकमिति भावः । नित्येति ।

चेत् । किं पुनरिदं सामानाधिकरण्यम् ? किं भिन्नयोर्धर्मयोरभि- न्नाधिकरणसम्बन्धित्वमुत धर्मधर्मिणोरभेदः ? नाद्यः । तथासति

न्यायलीलावतीकण्ठाभरणम्

मत्यन्ताभेदेऽपि धर्म्मयोरैकाधिकरण्यं न तु भेदेनेति मात्रार्थः। एवं नीलो घट इत्यादावपि सामानाधिकरण्यबाह्य भेदो भेदाभेदो वा, भेद एव सामानाधिकरण्योपपत्तेः । एवंसति दण्डीतिवत् नीली घट इति स्यादिति चेन्न । मतुब्लोपादभेदोपचाराद्वा त- दुपपत्तेः । नन्वन्योन्याभावत्वमव्याप्यवृत्तिवृत्ति अभावत्वसाक्षाद्व्या- प्यधर्म्मत्वात् अत्यन्ताभावत्ववदित्यनुमानात् भेदाभेदसिद्धेरिति चे- न्न। नीलोऽयमनीलश्च गौरयमगौश्चेति प्रतीतिप्रसङ्गपराघाताद् बाधो- न्नीतः संसर्गावच्छिन्नप्रतियोगित्वमत्रोपाधिः । संयोगध्वंसप्रागभाव- योरव्याप्यवृत्ति वा। हेतौ नित्याभाववृत्तीति विशेषणं कैश्चि(१)द्दत्तं व्य-

न्यायलीलावतीप्रकाशः

वर्त्तते ज्ञायते च, यथा संयोगाद्यभावः, श्यामावच्छिन्नस्य तस्यैवा- न्योन्याभावस्तत्रैव रक्तावच्छिन्ने तदन्योन्याभावश्च श्यामावच्छेदे- नैव विरोधात्, एकावच्छेदेन भावाभावयोरेकत्रावृत्तेरज्ञानाच्च, नाप्यव- च्छेदकान्तरेण, घटत्वावच्छिन्ने घटे तदभावात् तदज्ञानेऽपि नीलो घट इति ज्ञानाच्च। न चान्योन्याभावरूपो भेदोऽस्तु, अभेदस्तु न तद- भावः किन्त्वन्य एवेति वाच्यम्। अभेदव्यवहारे तस्याहेतुत्वात् तस्मा- न्नीलो घट इत्यत्र नीलसम्बन्ध एव भासते। तथा सति नीली घट इति धीः स्यादिति चेत् । नीलो घट इत्यत्र बुद्धौ यदि सम्ब- न्धविषयत्वमापाद्यते तदिष्यत एव। अथ नीलो घट इति प्रयोगे सम्बन्धवाचकपदवत्त्वं तदपीष्यत एव मतुब्लोपादुपचाराद्वा नी- लपदस्य नीलवत्परत्वात् । तथासतीति । ननु धर्मधर्मिणोरभेदोपी-

न्यायलीलावतीप्रकाशविवृतिः

त्रैकालिकवृत्त्यभावसाक्षाद्विभाजकधर्मत्वादित्यर्थः । श्यामावच्छिन्नस्ये- त्याद्यभ्युपगमवादेन। वस्तुतः 'सविशेषणे ही'ति न्यायेन श्यामाभा- व एव तत्र विषयः, तदुक्तं 'देशकालौ कामं भिद्येतां न तु तदुपरक्तः पद्मरागमणिरपी'ति । मतुब्लोपादिति।प्रथमपक्षे लुप्तः स्मृतो मतुबेवार्थप्र-

---

(१) कैश्चित्प्रकाशकारैरित्यर्थः ।

धर्मयोराधिकरणाभेदमात्रसिद्धेः। न द्वितीयः। तत्राभेदानुभवाभावात्। अथ गौरित्यनुभवस्य किमालम्बनम्? गोत्वं व्यक्तिस्तत्समवायश्चेति(१)। एवंसति गोत्वं गोत्वं, व्यक्तिः व्यक्तिः, सम्बन्ध सम्बन्धः, इति प्रतीतिः स्यान्न गौरिति। यदि च गोत्वं व्यक्तिस्तत्सम्बन्धश्चेति गौरिति(२)प्रतीतिविषयः, गोत्वसम्बन्धो भूतलमित्यत्र किं न गौरिति प्रत्ययः। भूतलस्य गोत्वसम्बन्धित्वेनानिरूपणादिति चेत्। न तर्हि गोव्यक्तावपि तत्प्रत्ययः, तस्या अपि समवायसंसृष्टत्वेनानिरूपणात्। गोत्वसम्बन्धवैशिष्ट्यं तस्या गोत्वमिति चेत्। किं वैशिष्ट्यं तदीयत्वम्? तच्चेत् सम्बन्धान्तरमनवस्था। तया गोत्वेन च समवायस्य निरूपणं [वैशिष्ट्यमिति(३)] चेत्, तद्रूपे-

---

न्यायलीलावतीकण्ठाभरणम्

र्थमेव। घटादौ पाकानन्तरं रक्तोऽयं न श्याम इति प्रतीतेरन्योऽन्याभावाव्याप्यवृत्तित्वशंका वैशेषिकमतेऽनुपपन्नैवेति भावः। समवायस्य प्रत्यक्षतामाक्षेप्तुं पृच्छति अथेति। उत्तरं गोत्वमिति। समवायस्यासम्बद्धत्वात्तदुपरक्तप्रतीतिर्न स्यात्। एवंसतीति दोषान्तरमाह। यदि चेति। सम्बन्धाविशेषात् भूतलादावपि तदुपरक्तप्रतीतिः स्यादित्यर्थः। तत्प्रत्यय इति। गोत्वसमवायोपरक्त इत्यर्थः। तस्या इति। गोव्यक्तेरित्यर्थः। तद्रूपेणापीति। गोव्यक्तिनिष्ठरूपेणापीत्यर्थः। समवायस्यै-

न्यायलीलावतीप्रकाशः

ति मात्रार्थः। गौरिति प्रतीतिबलान्न समवायसिद्धिरित्याशयवानाक्षिपति अथेति। तच्चेदिति। तदीयत्वं चेदित्यर्थः। तद्रूपेणापीति।

न्यायलीलावतीप्रकाशविवृतिः

त्यायकः। यदि च मतुब्लोपमजानतामपि तदर्थप्रत्ययस्तदा लक्षणयेति

---

(१) इतिपदं प्रा० पु० नास्ति।

(२) इति प्रतीतिविषय इति प्रा० पु० पाठः।

(३) [ ] चिन्हान्तर्गतः पाठो प्रा० पु० नास्ति।

णापि समवायस्य निरूपणात् तस्यापि तदीयत्वप्रसङ्गः। तेन सह समवायस्य निरूपणनियमो नास्तीति चेत्। न तर्हि गोव्य- क्त्यापि(१) निरूपणात्। तस्मादनासादितगोत्वसमवायव्यक्तिभेद- मखण्डमसाधारणं गौरिति प्रत्ययगोचरः(२)। तदेव च देशकाला- दिभेदेनानुगते गौरितिप्रत्यये भासमानं भिन्नमभिन्नं चाऽवभासत इति प्रत्यक्षसिद्धम्।

न्यायलीलावतीकण्ठाभरणम्

कत्वादिति भावः। तदीयत्वप्रसंगो–गोवैशिष्ट्यत्वप्रसंगः। तेनेति। गो- व्यक्तिनिष्ठेनेत्यर्थः। प्रष्टा स्वाभिमतमुपसंहारव्याजेनाह तस्मादिति। अ- नासादितो गोत्वसमवायव्यक्तीनां भेदो येन तत्तथा, अखण्डमनेका- घटितम्, असाधारणमनेकासम्बन्धि। तर्हि एक एव पिण्डस्तथानु- भूयेतेत्यत आह तदेव चेति। स्वलक्षणमेवेत्यर्थः। भिन्नमेव सदभिन्नमव- भासते इति। एकोऽपि समवायो निरूपकभेदाद् भिन्न इव याभ्यां निरू- प्यते तयोरेवान्योन्यमुपरक्तप्रत्ययं जनयन् प्रत्यक्षेण विषयीक्रियत इत्यर्थः।

न्यायलीलावतीप्रकाशः

तस्याः गोव्यक्तेः रूपेण शुक्लादिनेत्यर्थः। तस्यापीति। शुक्लादे रू- पस्यापि तदीयत्वप्रसङ्गो गोत्ववैशिष्ट्यप्रसङ्गः, तथा च गोव्यक्ताविव तद्रूपेऽपि गौरितिप्रत्ययापत्तिरित्यर्थः। तेनेति। गोव्यक्तिरूपेणेत्यर्थः। अनासादितेति। न आसादितो गोत्वव्यक्तिसमवायानां भेदो येन तत्तथा, अखण्डमनेकाघटितम्, असाधारणमनेकासम्बन्धि। नन्वेवं गौरिति- प्रतीतिविषयस्य भेदो न भासेत एकस्यैव धर्मिस्वरूपस्य सर्वत्र गौ- रितिप्रतीतिविषयत्वादित्यत आह तदेव चेति। देशकालात्मकोपाधि- निबन्धनो भेदाभेदानुभव इत्यर्थः।

न्यायलीलावतीप्रकाशविवृतिः

विभागः। तथा च गोव्यक्ताविवेति। सास्नादिमद्रूपविशेष्यस्य तदभिव्यञ्ज- कत्वादिति भावः। अनेकाघटितमिति। तथाच नोपाधिरूपमनेकासम्ब-

---

(१) पि अवयवेनापि निरूपणादिति प्रा० पु० पाठः। (२) विषयः—प्रा० पु० पाठः।

अत्रोच्यते । गोत्ववैशिष्ट्यमेव गोरूपत्वम् । वैशिष्ट्यं च समवायस्य स्वरूपशक्तिनियमेन [तत्र](१) गोत्वसम्बन्धावभासजनकत्वम् । तस्य च गोत्वव्यञ्जकरूपस्य प्रत्ययान्तरेषु भेदेन भासमानस्यैकाकारत्वमेकधर्माधिष्ठानत्वमनुभूयते ।

ननु तत्सामान्यं(२) प्रथमपिण्डोपलम्भकालेऽनुवृत्तत्वेनानुभूयते व्यावृत्तत्वेन वा ? नाद्यः । प्रथममनुवृत्ततानवभासनात् । द्वितीये

न्यायलीलावतीकण्ठाभरणम्

तस्य चेति । गोरूपस्य पिण्डस्येत्यर्थः । एकाकारस्य विवरणमेकधर्म्माधिष्ठानत्वमिति ।

अखण्डमसाधारणं गौरितिप्रत्ययगोचर इति पूर्वपक्षिणा यदुक्तं तदेवोपपादयितुं शंकते नन्विति । अनुवृत्तत्वेन नानावृत्तिनिष्ठत्वेन प-

न्यायलीलावतीप्रकाशः

यद्बाधकबलेन गौरितिप्रत्ययस्य समवायो न विषयस्तन्निराकरणायाह गोत्ववैशिष्ट्यमिति । वैशिष्ट्यं चेति । यद्यप्येकः समवायस्तथाप्यधिकरणस्वभावाद्यत्र गोत्वमस्ति तत्र गौरिति प्रत्ययो, यत्र तु तदत्यन्ताभावस्तत्र नेति समवायस्वभाव इति नोक्तदोष इत्यर्थः । अत एव गोरिव गोत्वसमवाययोरपि गोत्वसम्बन्धावभासजनकत्वादतिव्याप्तिरित्यपास्तम् । तस्य चेति । गोत्वव्यञ्जकपिण्डमात्रस्य एकाकारत्वस्य, विवरणमेकधर्माधिष्ठानत्वमिति । एकधर्माश्रितत्वमित्यर्थः । अतोऽनासादितेत्यादि यदुक्तं तन्नेति भावः ।

प्रथममिति । अनुवृत्तत्वमेकव्यक्तिवृत्तित्वे सत्यपरव्यक्तिवृत्तित्वमपरव्यक्तिवृत्तिताज्ञानं विना ज्ञातुमशक्यमित्यर्थः । द्वितीये त्विति ।

न्यायलीलावतीप्रकाशविवृतिः

न्धितया च न जातिरूपमित्यतिरिक्तमेवेति भावः । यत्र गोत्वमस्तीति । यत्र विशेषणतायां विशिष्टबुद्धिजनकत्वं नियामकम् , जनकतायां च स्वभाव एव शरणमिति भावः । अतिव्याप्तिरिति । गौरितिप्रत्ययप्रसङ्ग इत्यर्थः । एकत्वभ्रमं निवारयति पिण्डमात्रस्येति । पौनरुक्त्यमपाकरोति वि-

(१) [ ] चिह्नस्थः पाठो प्रा० पु० नास्ति । (२) ननु च सामान्यं-प्रा०पु० पाठः ।

तु व्यक्तेरभिन्नमेवानुभूतमिति । अथ न भेदेन नाप्यभेदेन किन्तु स्वरूपेणानुभूयत इति मतम् । न । सामान्यस्या(१)नुवृत्त-तावभासप्रसङ्गात् । नैवम् । अनेकव्यक्तिसमवायित्वं हि सामान्यस्यानुवृत्तत्वम् । तेन तदप्रतीतावपि जातिस्वरूपावभासोपपत्तेः। यदि भिन्ना जातिः स्यात् व्यक्त्यसम्बद्धापि प्रतीयेतेति चेत् । न । नित्यसम्बन्धबलेनैव तन्निरासात्(२) । अथ समवायरहि-तत्वमभिन्नत्वम् । तन्न । समवायस्य साधितत्वात् । स्वरूपभेदेऽपि अन्योन्याभावरहितत्वमभिन्नत्वमिति चेन्न। इदमिदं न भव-

न्यायलीलावतीकण्ठाभरणम्

कपिण्डासाधारणरूपेण । स्वरूपेणेति । स्वरूपं यदस्या जातित्वं तेने-त्यर्थः । जातिस्वरूपं भासते न तु तद्धर्मानुवृत्तित्वादिरूपेणेत्याह अनेकेति। नित्यसम्बन्धेति । अयुतसिद्ध्या न पृथग्भानमित्यर्थः । इदमिदमिति । गोत्वं न व्यक्तिरिति प्रतीतेरन्योन्याभावविषयत्वादित्यर्थः । व्यक्त्य-

न्यायलीलावतीप्रकाशः

यदि जातिर्व्यक्तेर्भिन्ना स्यात् तदा व्यावृत्तत्वेन भानं न स्यात् अनु-गतधर्मताभावत्वात्तस्या इति व्यावृत्तत्वेन भानार्थं जातिव्यक्त्योर-भेदो मन्तव्य इत्यर्थः । तथा चाखण्डमेव गौरितिप्रत्ययस्य विषय इति भावः । यदि जातिः स्वरूपेणानुभूयते तर्हि स्वरूपस्यानुवृत्तत्वा-ज्जातिरपि तथैव भासेत, तच्च न प्रथमतः सम्भवतीत्याह सामान्येति। सामान्यं जातेः स्वरूपं प्रथममवभासत एव सामान्यरूपत्वं च स-मानासु व्यक्तिषु भासमानासु भासत इत्याह अनेकव्यक्तीति । जाति-व्यक्त्योरभेदे सति अखण्डमेव भासत इति मनसिकृत्य समवायनि-रूपणप्रस्ताव एवाह यदि भिन्नेति । अथेति । घटपटयोश्च समवायराहित्ये-ऽपि नाभेदः तयोर्विशेषणविशेष्यभावाभावात् जातिव्यक्त्योश्च तत्सा-द्भावादिति भावः । समवायस्येति । पूर्वोक्तप्रमाणादित्यर्थः । ननु जाति-व्यक्त्योः स्वरूपभेदेऽप्यन्योन्याभावविरहादभेदः स्यादित्याह स्वरूपभेदे-पीति । इदमिदमिति । इदमिदं न भवतीतिप्रतीतिबलादन्योन्याभावस्य

(१) अनुवृत्तत्वेनानुवृत्ततेति मु० पु० पाठः । (२) तन्नियमादिति मु० पु० पाठः ।

तीति प्रत्ययगोचरस्य भावस्य अन्योन्याभावविरहे सर्वत्रान्यो-न्याभावविरहप्रसङ्गात् । अथ (मतम्)(१) गौरिति जातेर्ज्ञानेऽपि व्यक्तिज्ञानाज्जातिज्ञानेन च गौर्गौरिति व्यक्तेरवश्यमुपलम्भा-ज्जातिर्व्यक्तेरभिन्ना व्यक्तिस्तु जातेर्भिन्नेति भिन्नाभिन्नत्वमनुभवसिद्धमिति चेत् । न । जातिव्यञ्जकत्वेन व्यक्तेरवश्यमुपलम्भो जातिप्रतीतौ न तु जात्यभेदेन । एका हि जातिरनुभूयते भिन्ना तु व्यक्तिरिति नानुमानम् । तद्धि भिन्नमभिन्नं वा भिन्नाभिन्नं सा-धयेत् । नाद्यः । सत्प्रतिपक्ष[भेद]तापत्तेः । न द्वितीयः । तदन्वयि व्यतिरेकि वा ? नाद्यः । भिन्नाभिन्नत्वस्य क्वचिदपि दर्शनाभा-

न्यायलीलावतीकण्ठाभरणम्

विषयकप्रतीत्यविषयत्वात् जातिर्व्यक्त्यभिन्ना, जात्यविषयकप्रतीति-विषयत्वात् व्यक्तिर्जातेर्भिन्नेति शंकते अथेति । व्यक्त्यविषयकप्रतीत्य-विषयत्वमन्यथासिद्धमिति नाभेदे लिङ्गमित्याह जातीति । नानुमान-मिति । धर्म्मधर्म्मिणोर्भेदाभेदसाधकमिति शेषः । तद्धीति । भिन्नमनु-मानमनेकं भेदसाधकं न परभेदसाधकमित्यर्थः । अभिन्नमिति । एकमे-वानुमानं भिन्नाभिन्नत्वन्तु साधयेदित्यर्थः । सत्प्रतिपक्षभेदेति । भेदाभे-

न्यायलीलावतीप्रकाशः

प्रामाणिकत्वादित्यर्थः । जातिर्व्यक्तेरिति । यद्धि यतो भिन्नं तत्तदज्ञानेऽपि भासत इत्यर्थः । तदविषयकज्ञानाविषयत्वमन्यथोपपन्नमित्याह जाति-व्यञ्जकत्वेनेति । जातिव्यक्त्योर्विरुद्धधर्माध्यासं भेदकमाह एका हीति । नानु-मानमिति भेदाभेदसाधकमिति शेषः । तद्धीति । तद्धि प्रमाणं भिन्नं व्य-क्तिजात्योर्भेदग्राहकमेकमपरं चाभेदग्राहकमित्यर्थः। सत्प्रतिपक्षतेति । स-मानबलतया ज्ञायमानेन बोधितसाध्यविपर्ययत्वाद्भेदाभेदसाधकयो-रित्यर्थः । सामानाधिकरण्यं शाब्दमार्थं वोभयमप्यन्यथोपपन्नमित्याह

न्यायलीलावतीप्रकाशविवृतिः

वरणमिति । एकमेवानुमानमिति । एवञ्चानुमानाभ्यां वा भेदाभेदसिद्धिरे-केनैव वाऽनुमानेन तत्सिद्धिरिति विकल्पार्थ इति भावः । मूले च

(१) ( ) चिह्नस्थः पाठो मु० पु० नास्ति ।

वात् । न द्वितीयः । तस्य स्वतोऽनुमानत्वेनानभ्युपगमात् । सामानाधिकरण्यानुपपत्तिरनुमानामिति चेत् । न, शाब्दसामानाधिकरण्यस्य तत्प्रवृत्तिनिमित्तसामानाधिकरण्यादेवोपपत्तेः, अर्थसामानाधिकरण्यानुभवस्य च धर्मधर्मिणोरभेदाभावेऽपि एकाधिकरणत्वेनैवोपपत्तेः । स्वतन्त्रयोर्गोत्वशुक्लगुणयोर्द्रव्याद्भेदे सामानाधिकरण्यमनुपपन्नमिति चेन्न । समवायबलेन तदुपपत्तेः । स्वतन्त्रः समवायो न तदुपपादयितुं क्षम इति चेत् । किं तस्य स्वातन्त्र्यं ? स्वमहिम्ना पराश्रितबुद्ध्यनर्जकत्वं(१) वा ताभ्यामसम्बद्धत्वं वा ? नाद्यः । धर्माणां धर्मिण्याश्रितबुद्धिजनकत्वेनैव

न्यायलीलावतीकण्ठाभरणम्

दसाधकयोस्तुल्यबलयोरित्यर्थः । सामानाधिकरण्येति । आत्यन्तिको यत्र भेदो गवाश्वादौ यत्र चात्यन्तमभेदस्तदुभयव्यावृत्तं सामानाधिकरण्यमेव भेदाभेदसाधकं नहि भवति गौरश्वो घटोऽघट इत्यर्थः । प्रवृत्तिनिमित्तेति । नीलपदप्रवृत्तिनिमित्तं नीलगुणत्वं घटपदप्रवृत्तिनिमित्तं च घटत्वं तदुभयसामानाधिकरण्यादेव शाब्दसामानाधिक-

न्यायलीलावतीप्रकाशः

शाब्देति । गौः शुक्ल इत्यत्र गोशुक्लपदयोर्भिन्नप्रवृत्तिनिमित्तकयोरेकाधिकरणप्रतिपादकत्वं शाब्दसामानाधिकरण्यं, तच्च प्रवृत्तिनिमित्तसामानाधिकरण्यमात्रादेवोपपन्नम्, प्रवृत्तिनिमित्तसामानाधिकरण्यं प्रवृत्तिनिमित्तयोरेकाधिकरणसम्बन्धमात्रम्, आर्थं च सामानाधिकरण्यं भिन्नयोः शब्दप्रतिपाद्ययोरेकाधिकरणवृत्तित्वं धर्मधर्मिणोर्भेदेप्युपपन्नमित्यर्थः । स्वतन्त्रयोरिति । मिथो भिन्नेषु घटपटादिषु तददर्शनादित्यर्थः । समवायेति । घटपटयोस्तु न समवायसम्बन्ध इत्यर्थः । धर्माणामिति । इह तन्तुषु पट इत्यादिबुद्धिजनकत्वेन समवायसिद्धेरित्यर्थः । ननु यद्यप्याश्रयाद्भेदाभेदयोर्मिलितयोः साध्यत्वे साध्याप्रसिद्धिः, भेदाभेदयोः प्रत्येकं साध्यत्वे चांशतःसिद्धसाधनं भेदस्योभयसिद्धत्वात्, तथाप्याश्रयाद्भेदं पक्षविशेषणीकृत्य तदभिन्नत्वं साधनीयमतो नोक्त-

---

(१) जनकत्वमिति मु० पु० पाठः ।

तस्य स्वग्राहकमानसिद्धत्वात्। नेतरः। अधिष्ठानाभावात् असम्बद्धत्वेऽपि आश्रितबुद्धिजनकस्वभावनियमेनैव सामानाधिकरण्यबुद्धिनिर्वाहकत्वात्। भेदाभेदाभ्यां व्यावृत्तस्य चाऽस्य गन्धवत्त्वस्येव सन्देहापादकत्वात्। अन्यथा भुवोऽपि नित्यानित्यरूपतापत्तेः(१)। इति समवायः॥

इति श्रीन्यायलीलावत्यां विभागपरिच्छेदः समाप्तः॥

न्यायलीलावतीकण्ठाभरणम्

रण्योपपत्तेरित्यर्थः। अतिरोहितार्थमितरत्। गन्धवत्त्वस्येवेति। भूर्नित्या गन्धवत्त्वादित्ययं हेतुरुभयव्यावृत्तेर्यथा सन्देहापादकस्तथा सामानाधिकरण्यमपीत्यर्थः।

इति महामहोपाध्यायश्रीशङ्करकृते लीलावतीकण्ठाभरणे विभागपरिच्छेदः समाप्तः॥

न्यायलीलावतीप्रकाशः

दोष इत्यत आह भेदाभेदाभ्यामिति। यथा भूर्नित्या गन्धवत्त्वादित्यत्र गन्धवत्त्वमसाधारणं सकलसपक्षविपक्षव्यावृत्तत्वात्तथा सामानाधिकरण्यमपीत्यर्थः। असाधारणानैकान्तिकस्य दूषकताबीजमाह अन्यथेति। यथा गन्धवत्त्वं व्योमादेर्व्यावर्त्तमानमनित्यतां साधयेत्तथा जलादेर्व्यावृत्ततया नित्यत्वमपीत्येकस्य धर्मिणो विरुद्धद्वैरूप्यापत्तिरि-

न्यायलीलावतीप्रकाशविवृतिः

भिन्नं वेत्यनुमानविशेषणम्। भिन्नाभिन्नमिति कर्मपदमिति ध्येयम्। यथा गन्धवत्त्वमिति। यद्यप्यसाधारणे विरुद्धद्वैरूप्यापत्तिर्न दूषकताबीजमपि तु संशायकत्वमेव, तथापि विरुद्धद्वैरूप्यापत्तौ न निश्चायकत्वमतः संशायकत्वमिति परम्परया तस्या अपि दूषकतायामुपयोग इति भावः। वस्तुतो विरुद्धद्वैरूप्यापत्त्याऽनिश्चायकत्वे परस्परानुमितिप्रतिबन्ध एव दूषकताबीजम्, परस्परविरुद्धव्याप्तिज्ञानत्वेनैव चास्य प्रतिबन्धकता, नतु पक्षधर्मताज्ञानसाहित्येनेति न सत्प्रतिपक्षाभेद इति विपञ्चितं प्रागिति। जलादेरिति। अतद्गुणसंविज्ञानबहुव्रीहिणा जलज्ञानादेरित्यर्थः।

(१) नित्यत्वानित्यत्वापत्तेरिति भा० पु० पाठः।

व्यावृत्तत्वेन पदार्थज्ञानं तत्त्वज्ञानम्, तच्च वैधर्म्याधीनम्। तदपि व्यतिरेकिप्रमाण(१)मिति तत्परिच्छेदोऽयमारभ्यते। ननु व्यतिरेकी नानुमानम्, जीवच्छरीरं सात्मकं इच्छावत्त्वात्, यन्निरात्मकं न तदिच्छावत् यथा घटः। इच्छादयोऽष्टद्रव्यातिरिक्तद्रव्याश्रिताः अष्टद्रव्याश्रितत्वेनानुपपत्तौ(२) गुणत्वात्, न यदेवं न तदेवम्, यथा भुवो रूपमित्यादिकं हि तत्। अत्र च पक्ष[स्य]विशेषणं

न्यायलीलावतीकण्ठाभरणम्

व्यावृत्तत्वेन-इतरभिन्नत्वेन। वैधर्म्याधीनं-तन्मात्रवृत्तिधर्म्माधीनम्। तत्परिच्छेद इति। तादृशपूर्वपक्षनिरासपरिच्छेद इत्यर्थः। व्यतिरेकानुमानपरिच्छेदो वा। व्यतिरेकी नानुमानमिति। असत्प्रतिपक्षो धर्म्मो नानुमानमित्यर्थः। भागासिद्धिवारणाय जीवदिति। सात्मकत्वं भोगजनकमनःसंयोगाधिकरणकत्वम्, भोगाधारसंयोगाधारसंयोगाधिकरणत्वं वा। इच्छावत्वादिति। इच्छाजन्यविशेषगुणजन्यक्रिया-

न्यायलीलावतीप्रकाशः

त्यर्थः। तस्मादसाधारणतया सामानाधिकरण्यं संशायकं नतु निश्चायकम्। यद्यपि वैशेषिकाणामसाधारणो धर्मो न संशयहेतुस्तथापि न्यायदर्शनमाश्रित्योक्तमिदम्, न्यायनये तु प्रत्यक्ष एव समवाय इत्युपक्रमात्॥

उत्तरग्रन्थप्रबन्धोपयोगार्थमाह व्यावृत्तत्वेनेति। तदपीति। अपिशब्दः साधर्म्यापेक्षया। पक्षस्येति। सिषाधयिषितसाध्यधर्मणो धर्मिणः पक्ष-

न्यायलीलावतीप्रकाशविवृतिः

यद्वा घटादावेव नित्यतामित्यन्वयः। व्यावृत्ततयेत्यत्र ज्ञानादेरिति शेषः। क्वचिज्जन्यजलादेरिति पाठः, स तु सुगम एव।

वैधर्म्यातिरिक्तस्य व्यतिरेक्यनुमानत्वेन समुच्चेयस्याभावादाह अपिशब्द इति। तथाच व्यतिरेकि तदप्यनुमानमिति योजनयाऽनुमानत्वेन साधर्म्यमेव समुच्चेयं मूल इति भावः। पक्षपदार्थं दर्शयन्नेव साध्यस्य विशेषणत्वमुपपादयति सिषाधयिषितेति। ज्ञानसमानाधिक-

---

(१) क्यनुमानमिति प्रा० पु० पाठः। (२) त्वेऽनुपपत्तावित्ति प्रा० पु० पाठः।

प्रतीतं न वा ? न चेद[प्र]सिद्धविशेषणः पक्षः । प्रतीतं चेत्, यत्र तत्प्रतीतं तत्र हेतोर्वृत्तिर्व्यावृत्तिर्वा ? वृत्तिश्चेदन्वयव्यतिरेकित्वम्, व्यावृत्तिश्चेदसाधारणानैकान्तिकता [अनध्यवसितो वा](१) । अप्रसिद्धसाध्यसंसर्गमिव साध्यविशेषणमप्यप्रसिद्धमेव स्वशक्तिवैचि-

न्यायलीलावतीकण्ठाभरणम्

त्र्यादित्यर्थः । एवं व्यतिरेकेऽप्यूह्यम् । पक्षविशेषणस्य-साध्यस्य । नचेदिति । तथाच पक्षसाध्यविशिष्टप्रतीतिरनुमितिर्न स्यादित्यर्थः । विशेषणज्ञानाद्यपेक्षत्वात् विशिष्टप्रतीतेरिति भावः । तत्र-प्रसिद्धसाध्यवति । असाधारणत्वमिति । सति सपक्षे सपक्षाद्व्यावृत्तो हेतुरसाधारण इत्यर्थः । व्यतिरेकानुमानमहिम्नैवाप्रसिद्धं साध्यं सेत्स्यतीत्याह अप्रसिद्धमिति । ननु बाधात् विषाणं शरीरे न सिद्ध्यति

न्यायलीलावतीप्रकाशः

स्य विशेषणं साध्यमित्यर्थः । अप्रसिद्धेति । तथाच पक्षविशेष्यिका साध्यविशेषणिकाऽनुमितिर्न स्याद्विशेषणज्ञानं विना विशिष्टज्ञानाभावादिति भावः । यदीच्छा समवायिकारणजन्या कार्यत्वात्, तच्च समवायिकारणं पृथिव्याद्यष्टभिन्नं पृथिव्यादित्वे बाधकत्वादिति पृथिव्यादिभिन्नात्मसिद्धौ तत्कर्तृं जीवच्छरीरे साध्यते, तदा घटादौ तदस्तीति ततो हेतुव्यावृत्तावसाधारण्यं स्यादिति ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्यत्वं सात्मकत्वम्, शरीरात्मसंयोगस्य ज्ञानकारणत्वात्, आत्ममनसोस्तथात्वेऽप्यकार्यत्वात्, तच्च शरीरादन्यत्राप्रसिद्धं शरीरे च सिद्धौ सिद्धसाधनम् । एतेनेच्छाऽसमवायिकाकारणसंयोगावच्छेदकत्वस्याभावो घटादौ दृष्टः तद्व्यतिरेकः शरीरे साध्यत इत्यपास्तम् । इच्छाऽसमवायिकारणसंयोगावच्छेदकत्वस्य शरीरादन्यत्राप्रसिद्धेः । अप्रसिद्धसाध्येति । यथा सिषाधयिषितस्य पक्षसंसर्गमप्रसिद्धमेव साधयति तथा सिषाधयिषितमप्यप्रसिद्धमेव साधयतीत्यर्थः । स्वशक्तीति । व्यतिरेकव्याप्तिपक्षधर्मताबलादित्यर्थः ।

न्यायलीलावतीप्रकाशविवृतिः

रणेति चक्षुर्घटसंयोगमादाय घटे प्रसक्तिवारणाय समानाधिकरणान्तम् । घटात्मसंयोगमादाय तत्रैव प्रसक्तिवारणाय ज्ञानकारणीभूतेति ।

(१) [ ] चिह्नान्तर्गतः पाठो प्रा० पुस्तके नास्ति । असाधारणत्वम् इति तु मिश्रसंमतः ।

न्याव्यतिरेकी साधयतीति चेन्न। शशविषाणादिमत्त्वसाधनापत्तेः। दृश्यानुपलब्धिबाधितत्वेन शरीरस्य शशविषाणादिमत्त्वासाधनं न त्वप्रसिद्धविशेषणत्वेनेति चेत् । न । अतीन्द्रिय[शृङ्ग]संसर्गाद्यनुमानापत्तेः(१)। साध्यविशेषणासिद्धौ तद्व्यतिरेकनिरूपणायोगात्साध्यसाधनयोर्व्यतिरेकव्याप्तेरसिद्धेः । न ह्यात्माप्रतीतौ निरात्मको घट इति शक्यं वक्तुम्(२)। नैरात्म्यं न च घटस्य प्रत्यक्षवेद्यं, तस्य तत्रासामर्थ्यात् । नानुमानगम्यं, क्वचिदपि नैरात्म्या-

---

न्यायलीलावतीकण्ठाभरणम्

नत्वप्रसिद्धया विषाणस्य प्रसिद्धत्वादित्याह दृश्येति । योग्यं विषाणविषाणं बाधात् मा सिध्येत् अयोग्यं तु सिध्येदेवेत्याह नेति। दोषान्तरमाह साध्येति । साध्योऽत्र पक्षः, साध्यं च तद्विशेषणं चेति। बाधशक्यत्वमेवोपपादयेति नैरात्म्यं चेति । तत्रेति । चक्षुरादीनां तत्रा-

न्यायलीलावतीप्रकाशः

शशविषाणेति । यद्यप्रतीतं सात्मकत्वं साध्यते तदा शशशृङ्गमप्रतीतमनुमीयेतेत्यर्थः। ननु शरीरे विषाणं साध्यते तच्च नाप्रसिद्धं येन प्रतिबन्दि स्यात् , किन्तु योग्यानुपलम्भबाधान्न साध्यत इत्याह दृश्यानुपलब्धीति । तथाप्यप्रसिद्धं शशविषाणाख्यमतीन्द्रियं साध्येतैव तस्यायोग्यतया बाधाभावादित्याह अतीन्द्रियेति। इन्द्रियजन्यं दर्शनं ज्ञानमिन्द्रियदर्शनं तदतिक्रान्तमतीन्द्रियतया दर्शनमतीन्द्रियमित्यर्थः। साध्याप्रसिद्धौ दूषणान्तरमाह साध्यविशेषणेति । अशक्यत्वमेवोपपादयति नैरात्म्यं चेति। तस्य तत्रेति । प्रतियोग्यप्रसिद्ध्या तदभावस्या-

न्यायलीलावतीप्रकाशविवृतिः

शरीरेऽसम्भववारणायाह शरीरात्मसंयोगस्येति । कार्यपदव्यावर्त्यमाह आत्ममनसोरिति । पक्षसंसर्गमप्रसिद्धमेव साधयतीत्यनन्तरं व्यतिरेकीति शेषः। यद्यप्रतीतमिति । अनुमितिश्च तन्मते साध्यविशेषिकैवेति भावः। प्रतियोग्यप्रसिद्ध्येति । यद्यपि सात्मकत्वप्रतीतेरपि प्रतियोग्यधिकरणयोरेकेन्द्रियग्राह्यत्वात् प्रत्यक्षस्य तत्रासामर्थ्यादिति

---

(१) अतीन्द्रियसंसर्गाद्यनुमानापत्तेरिति प्रा० पु० पाठः।

(२) घटः शक्यः प्रतिपत्तुमिति प्रा० पु० पाठः।

प्रतीतावन्वयिनो लिङ्गस्याभावात् । व्यतिरेकिणस्तु सात्मकत्व-प्रतीतिं विनाऽनुपपत्तेः । एकपदार्थवृत्तिना चेच्छादिमत्त्वादिनाऽसाधारणधर्मेण प्रतीतपदार्थानुमाने घटादावप्यसाधारणकलशत्वादिधर्मोपलम्भेन स्वेच्छाकल्पिततत्तदसाधारणधर्मवत्त्वानुमानप्रसङ्गात् । सामान्यतोदृष्टानुमितमिच्छादिसमवायिकारणं तद्व्यतिरेकश्चेच्छादिकार्यनिवृत्त्या घटादौ प्रतीतः, तत्संसर्गस्तु देहे साध्यत इति चेत् । न । तस्य कार्यात्कारणमात्रानुमानादेव-

---

न्यायलीलावतीकण्ठाभरणम्

सामर्थ्यात् मनसः बहिरप्रवृत्तेरित्यर्थः । अनभिमतप्रसङ्गादपि न व्यतिरेक्यनुमानमित्याह एकेति । नन्विच्छा क्वचिदाश्रिता कार्य्यत्वादिति यदिच्छासमवायिकारणमनुमितं तद्व्यतिरेको घटादौ सुग्रह एवेति न कथं व्यतिरेकनिरूपणमित्याह सामान्यत इति । शरीरमिच्छाकारणवत् इच्छावत्त्वात् यद्यत् कार्य्यवत् तत्तत्कारणवदित्यन्वयिन एव तत्सिद्धेर्व्यतिरेकवैयर्थ्यमित्याह नेति । विशिष्य इच्छासमवायिकारणापरिचयेऽपि साध्याप्रसिद्धेरेवेति भावः । विशिष्टे तु

न्यायलीलावतीप्रकाशः

प्रतीतेरित्यर्थः । व्याप्त्यप्रतीतावप्यप्रतीतसाधने दोषमाह एकपदार्थवृत्तिना चेति । तद्व्यतिरेक-इच्छासमवायिकारणव्यतिरेकः, इच्छादेः कार्यं चेष्टारूपं तद्व्यावृत्त्या घटादौ प्रतीत इत्यर्थः । तस्येति । तस्य-इच्छासमवायिकारणमात्रस्य, शरीरमिच्छासमवायिकारणवत् इच्छारूपकार्यवत्त्वात् यद्यत्कार्यवत् तत्तत्कारणवदित्येवंरूपानुमानादेव सिद्धेर्व्यतिरेकवैयर्थ्यमित्यर्थः । वस्तुतोऽत्रापि साध्याप्रसिद्धिरिति भावः ।

न्यायलीलावतीकण्ठाभरणम्

मूलार्थः प्रतिभाति, तथाप्युपनीतेऽप्यधिकरणेऽभावः प्रत्यक्षेण गृह्यतां एवेति मनसैव तद्ग्रहः स्यादिति तन्मतं परित्यज्य प्रतियोग्यप्रसिद्धिपरतयैव व्याख्यातवान् । इच्छादिनिवृत्तिरप्यतीन्द्रियैवेति कर्मधारयं परित्यज्य षष्ठीसमासमालम्बते इच्छादेरिति । वस्तुत इति । सत्त्वतत्त्वयोरनुगतयोरभावादिति भावः । साध्यापेक्षया-साध्यप्रत्ययापेक्षया ।

सिद्धेः । व्यतिरेकिणाष्टद्रव्यव्यातिरिक्त(१)द्रव्यसमवायिकारणत्वानुमाने चोक्तदोषानिवृत्तेः । द्वितीयानुमाने च यदि द्रव्याश्रितत्वमात्रं साध्यते तदा गुणत्वादेव सिद्ध्यतीत्यष्टद्रव्याश्रितत्वानुपपत्तिर्विशेषणं व्यर्थम्, अन्वयिनैव गुणत्वात् तत्सिद्धौ व्यतिरेकिणो वक्रस्य प्रयोगानुपपत्तेः । अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वसाधने च व्यतिरेकव्याप्तेर सिद्धेः । साध्याप्रसिद्धौ(२)तु तत्संदेहानुपपत्तौ पक्षस्याप्रतीतेर्हेतोः पक्षधर्मत्वानुपपत्तेः ।

अत्रोच्यते । अनिश्चितत्वेऽपि विशेषणस्य संभावितत्वात् । इ-

न्यायलीलावतीकण्ठाभरणम्

साध्याप्रसिद्धिरेवेत्याह अष्टेति । द्वितीयानुमान इति । इच्छादयोऽष्टद्रव्यातिरिक्तद्रव्याश्रिता इत्यनुमान इत्यर्थः । यद्यपि साध्यं विशिष्योल्लिख्य विकल्पोऽयं न सम्भवति तथाप्यभिप्रायतो विकल्पः । न च वक्ररुचेर्वक्रत्वं न दोष इति वाच्यम् । साध्याप्रसिद्ध्यादिना तदुपायत्वस्यैव खण्डनात् । साध्याप्रसिद्धौ दोषान्तरमाह साध्येति । सन्देहानुपपत्तावित्युपलक्षणम् सिषाधयिषानुपपत्तिरित्यपि द्रष्टव्यम् ।

अत्रोच्यत इति । व्यतिरेक्यनुमानमिति शेषः अन्यथा पञ्चम्यनुपपत्ते साध्याप्रसिद्धिदोषं परिहरति विशेषणस्येति । साध्यस्येत्यर्थः । सम्भावित·

न्यायलीलावतीप्रकाशः

उक्तदोषेति । साध्याप्रसिद्धिरूपेत्यर्थः । अन्वयिनैवेति । न च व्यतिरेकिणोऽपि तत्र सामर्थ्यादुपायान्तरमदोष इति वाच्यम् । केवलव्यतिरेकिणोऽसिद्धेर्व्यतिरेकव्याप्तेर्गमकत्वानवधारणात् । प्रयोगानुपपत्तेरित्यादि हेतुत्रये पञ्चमीनिर्देशः । व्यतिरेकी नानुमानमिति साध्यापेक्षया व्यतिरेकिण्यपक्षधर्मत्वं व्युत्पादयति साध्याप्रतीतावि ति । सन्देहानुपपत्तिरित्युपलक्षणम् साध्याप्रसिद्धौ सिषाधयिषाघटितमपि पक्षत्वं नास्तीति मन्तव्यम् ।

न्यायलीलावतीप्रकाशविवृतिः

पक्षत्वं नास्तीति । एवञ्च पक्षस्याप्रतीतेरिति मूलं प्रतीत्यभावेन विषया·

---

(१) अष्टद्रव्यातिरिक्तेत्यादि प्रा० पु० पाठः ।

(२) साध्याप्रतातावित्ति वर्धमानसंमतोत्र पाठो द्रष्टव्यः ।

च्छादीनां द्रव्याश्रितत्वेऽनुमितेऽष्टद्रव्यातिरिक्ताश्रितत्वं अष्टद्रव्याश्रितत्वं वेति विप्रतिपत्तेरेव संशयोपपत्तौ(१) द्रव्याश्रितत्वविशिष्टेच्छादिषु अष्टद्रव्यातिरिक्ताश्रितत्वमाशङ्क्यमानं शङ्काविषयपर्यालो-

न्यायलीलावतीकण्ठाभरणम् ।

त्वादिति । संशयाविषयत्वात्तद्धीनस्मृतिविषयत्वाच्चेत्यर्थः । तदुभयमुपपादयति इच्छादीनामिति । इच्छा द्रव्याश्रितेति सामान्यतोदृष्टेनानु-

न्यायलीलावतीप्रकाशः

यद्यप्यत्रोच्यत इत्यत्र न हेतोरपेक्षा तथाप्यभिधाने विषयेण विषयस्य हेतुत्वं विवक्षितत्वा सम्भावितत्वादिति पञ्चमीनिर्देशः । ननु साध्यस्य सम्भावना ज्ञानविशेषः, स च प्रकृते नास्तीत्युक्तमित्यत आह इच्छादीनामिति । इच्छायाः द्रव्याश्रितत्वे पृथिव्यादौ बाधकानवतारदशायां विप्रतिपत्तिवाक्यात् द्रव्याश्रिता इच्छा अष्टद्रव्यातिरिक्तवृत्तिर्नवेति संशयात् अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं प्रसिद्धमिच्छायां साध्यत इत्यर्थः । यद्यपि विप्रतिपत्तिर्न वैशेषिकाणां संशयहेतुस्तथापि विप्रतिपत्तिशब्देनात्राश्रितत्वं साधारणधर्म एवोक्तः, संशयप्रसिद्धमपि साध्यं व्यतिरेकादिनिरूपकं साध्यज्ञानमात्रस्य तद्धेतुत्वात् । न चैवं संशयादेव पक्षे साध्यसिद्धेः किं व्यतिरेकिणेति वाच्यम् । साध्यनिश्चयार्थं तत्प्रवृत्तेरिति भावः । नन्वेवं द्रव्याश्रितत्वविशिष्टायामिच्छायामष्टद्रव्यातिरिक्तवृत्तित्वज्ञानेऽष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं कुतो ज्ञातमित्यत आह शङ्काविषयेति । यद्यपि शङ्काविषयालोचना न संशयहेतुस्तथापि द्रव्याश्रितेच्छा अष्टद्रव्यातिरिक्ताश्रिता नवेति संशयात् इच्छाया अष्टद्रव्यातिरिक्ताश्रयोपस्थितौ पश्चा-

न्यायलीलावतीप्रकाशविवृतिः

भावसाधनपरमिति मन्तव्यम् । विवक्षितत्वेति । यद्यपि तद्विवक्षायामन्वयप्रयोजकतया नान्वयबोधस्तथापि च ज्ञानकारणीभूतज्ञानविषयतावच्छेदकत्वलक्षणप्रयोजकत्वमेवात्र पञ्चम्यर्थस्तत्कल्पने चानादिशिष्टविवक्षैव नियामकेति भावः । यद्यपीति । तन्मते साधारणधर्मदर्शनस्यैव सर्वत्र संशयकारणत्वादिति भावः । तथापीति । विरुद्धविष-

(१) संशयोत्पत्ताविति मा० पु० पाठः ।

चनायामष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वशङ्कामुत्पादयति । तस्याश्चा-
ष्टद्रव्येतरद्रव्याश्रितत्वविपर्ययकोटावनुमानप्रतिनिधीभूतप्रसङ्गव-
स्त्वमेवाभिमतकोटिगोचरे संभावनात्वं, तत्सामर्थ्येन तदेककोटि-

न्यायलीलावतीकण्ठाभरणम्

मितेर्द्रव्याश्रिता तदतिरिक्ताश्रिता वेति विप्रतिपत्त्या संशय इत्यर्थः ।

न्यायलीलावतीप्रकाशः

दिच्छाश्रयोऽष्टद्रव्यातिरिक्तो द्रव्यं नवेति संशयादष्टद्रव्यातिरिक्तद्र-
व्योपस्थितिः, ततस्तद्द्रव्यवतीच्छेति साध्यत इति संशयपरम्परैव
पर्यालोचना, एतादृशश्च संशयो येनेच्छाया अष्टद्रव्याश्रयत्वे बाधकं
द्रव्यत्वस्याष्टद्रव्यनैयत्यं च न गृहीतं तस्यैवेत्यर्थः । नन्वेवमपि व्याप-
कसन्देहे कथं व्याप्तिनिश्चयः तस्य व्यापकनिश्चयसाध्यत्वादित्यत
आह तस्याश्चेति । यदीच्छाष्टद्रव्यातिरिक्तद्रव्याश्रिता न स्यात् अष्ट-
द्रव्यानाश्रिता सती द्रव्याश्रिता न स्यादिति साध्यविपर्ययकोटौ
प्रतिकूलतर्कसहितः संशय एव निश्चयकार्यं करोति । अत एव
तादृशसंशयोपस्थितस्वेच्छाकल्पितपदार्थसाधनमप्यपास्तम् । तद्वि-
पर्यये प्रतिकूलतर्काभावादित्यर्थः । तत्सामर्थ्येनेति । तर्कसहकृततादृश-
संशयजन्यस्मृतेर्निश्चयत्वात्तत एव साध्यनिश्चय इत्यर्थः । एवं च

न्यायलीलावतीप्रकाशविवृतिः

यिणी प्रतिपत्तिर्यस्मादिति व्युत्पत्त्येति । एतादृश इति । अष्टद्रव्यवृत्ति-
त्वबाधग्रहे आश्रितत्वेन गृहीतायामिच्छायां प्रथमसंशयकोटिबाधा-
त्, द्रव्यत्वस्याष्टद्रव्यत्वनैयत्यग्रहे चाष्टद्रव्यातिरिक्तत्वस्य धर्मिता-
वच्छेदकस्य द्रव्यत्वकोटिविरोधाद्द्वितीयसंशयविरोधादिति भावः ।
तर्कसहित इति । यद्यपि तर्कस्यापि व्याप्तिमूलकत्वेन प्रतियोग्यनिर्णये
आपादकानिर्णयाद्व्याप्त्यनिश्चये कथं तदवतारस्तथापि द्रव्याश्रिता इ-
च्छेति पक्षयित्वा द्रव्यपदविनिर्मुक्तमेवापादकमापाद्यं च प्रकृते कर्त-
व्यमिति भावः । यद्वा तर्कोऽप्ययं सन्देहोपस्थितप्रतियोगिकापादका-
दिकमादायैव प्रवर्त्तत इत्यभिमतम् । अत एवानुपदमेव प्रकाशकृदेवात्र
दूषणं व्यक्तीकरिष्यति । तत एव साध्यनिश्चय इति । साध्यनिश्चयकार्य-
मित्यर्थः ।

गोचरस्मृतिजनकत्वं वा । संभावितस्य च विशेषणस्य पक्षाप्रसिद्धविशेषणत्वनिरासहेतुत्वात्, प्रतिबन्धबोधगोचरव्यतिरेकानिरूपकत्वाच्च ।

यदि वा सामान्यतो निश्चितत्वेनोक्तचोद्य(१)निरासात् । यद्विपर्यये समीहितप्रसक्तिः प्रसरति तन्मानप्रवृत्तियोग्यमवधारितं विप्रतिपत्तिवाक्याच्छङ्कातोऽपि वा प्रतीयमानम् इदं च तथेति सामान्यतोऽनुमानप्रवृत्तिगोचरत्वे विशेष(२)प्रमाणापेक्षायां व्यतिरेकिण उपन्यासात् ।

न्यायलीलावतीकण्ठाभरणम्

वैशेषिकमते विप्रतिपत्तिर्न संशायिकेति भावः । असाधारणधर्मस्यैव तन्मतेऽनध्यवसायजनकत्वेन संशयाहेतुत्वात् ।

नन्वेवमपि अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं यत् साध्यं तन्न

न्यायलीलावतीप्रकाशः

साध्यप्रसिद्धौ नापक्षधर्मत्वं न वा व्यतिरेकव्याप्त्यसिद्धिरित्युपसंहरन्नाह सम्भावितस्य चेति ।

प्रकारान्तरमाह यदि वेति । अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं सन्देहादुपस्थितं तत्र च प्रतिकूलतर्कसाचिव्यात्सामान्यतः प्रमाणाप्रवृत्तियोग्यत्वे ऽवधृते विशेषजिज्ञासायां व्यतिरेकिण उपन्यास इत्यर्थः । तदेव स्फुटयति यद्विपर्यय इति ।

यद्वा इच्छा द्रव्याश्रिता गुणत्वादिति सामान्यतोदृष्टेन द्रव्याश्रितत्वे निश्चिते पृथिव्यादिवृत्तित्वे च बाधकावतारे द्रव्याश्रितेच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता तद्वृत्तौ बाधकवत्त्वे गुणत्वात्, यन्नैवं तत्तद्वृत्तौ न बाधकवद्यथा रूपमिति व्या-

न्यायलीलावतीप्रकाशविवृतिः

यद्वा इच्छा द्रव्याश्रितेत्यादि । एवञ्च मूले द्रव्याश्रितत्वादिनेति तृतीया पक्षतावच्छेदकत्वेन तस्योपयोगितया व्यतिरेकव्याप्तिनिश्चय इत्यत्राष्टद्रव्यातिरिक्ताश्रितत्वसाध्येनेति शेष इति विभावनीयम् ।

---

(१) देशयानिरासादिति प्रा० पु० पाठः ।

(२) विशेषे इति प्रा० पु० पाठः ।

यद्वा सामान्यतोदृष्टानुमितद्रव्याश्रितत्वादिना(१) व्यतिरेकव्याप्तिनिश्चयेऽष्टद्रव्यातिरिक्तद्रव्याश्रितत्वविशेषनिरूपणमष्टद्रव्याश्रितत्वे बाधकसाचिव्याद् गुणत्वस्य । एवंभूतरूपाभावे(२) त्वप्रसिद्धविशेषणत्वम् । एवंसति सामान्यतोऽन्वयव्याप्तेरेव विशेषनिरूपणमस्त्विति चेत् । अस्तु(३) उपायस्यानुपायतोपालंभाय, न तु नानात्वम् ।

न्यायलीलावतीकण्ठाभरणम्

संशयादप्युपस्थितमत आह—यद्वेति । द्रव्यत्वादिनेत्यादिपदात् क्वचिदाश्रितत्वसङ्ग्रहः । व्यतिरेकव्याप्तिनिश्चय इति । व्यतिरेकव्याप्तिनिश्चयार्थमित्यर्थः । 'चर्म्मणि द्वीपिनं हन्ति' इतिवत् । ननु गुणत्वादेव कथमयमर्थः सिध्येदित्यत आह—अष्टद्रव्याश्रितत्व इति । नन्वत्रापि अप्रसिद्धविशेषणत्वप्रवादः किन्निबन्धन इत्यत आह—एवंरूपेति । बाधानवतारदशायामप्रसिद्धविशेषणत्वमित्यर्थः । एवं सतीति । सामान्यतोदृष्टादितरबाधकसहकृतो व्यतिरेकसाध्योऽर्थश्चेत् सिद्धः किं व्यतिरेकिणेत्यर्थः । एवमिति । उपायान्तरे उपायान्तरं नोपालम्भो न दूषणमित्यर्थः । यन्मतेऽष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं न प्रकारः सामान्यतोदृष्टे तन्मते प्रकारार्थं व्यतिरेकीति भावः । यद्वा अष्टद्रव्याश्रितत्वं यत्र पक्षविशेषणतया सामान्यतोदृष्टे यदि नोपादीयते तदा व्यतिरेकी सावकाश इति भावः ।

न्यायलीलावतीप्रकाशः

प्तिग्रहः सुकर इत्याह यद्वा सामान्यत इति । द्रव्याश्रितत्वादिनेत्यादिशब्दात्केवलव्यतिरेक्यन्तरोपजीव्यसामान्यतोदृष्टपरिग्रहः । न चैवं किं केवलव्यतिरेकिणा बाधकसहकृतात्सामान्यतोदृष्टादेव तत्साध्यसिद्धेरित्याह एवं सतीति । व्यतिरेकिणोऽप्यन्यत्र सामर्थ्यावधारणेनोपायस्यानुपायतोपालम्भाय न तूपायान्तरमिति केवलव्यतिरेक्युपन्यासो न पर्यनुयोज्य इत्याह अस्त्विति । यथा च केवलव्यतिरेकिस्थलेऽप्यनुमितिसामग्री तथोपरिष्टाद्वक्ष्यते ।

---

(१) द्रव्यत्वादिनेति मिश्रसम्मतोऽत्र पाठो द्रष्टव्यः ।

(२) एवंरूपाभावेति मिश्रसम्मतः पाठः । (३) एवमुपायस्येति मिश्रसम्मतः पाठः ।

यदि वेच्छादिसमवायिकारणमात्रस्याष्टद्रव्यानात्मकत्वे तैस्तैरनुमानैर्निश्चिते तत्संबन्धित्वं जीवद्देहस्य साध्यते। न चैवमप्रसिद्धविशेषणत्वम्। अनुमानेन विशेषणस्य निश्चितत्वात्। न च(१) व्यतिरेकिवैयर्थ्यम्। तेन सह जीवच्छरीरसंबन्धस्य

न्यायलीलावतीकण्ठाभरणम्

सात्मकत्वानुमानमाधिकृत्याह यदि वेति। पूर्वोक्तविप्रतिपत्त्युपस्थितसाध्यमपेक्ष्य विकल्पः। तैस्तैरिति। गुणत्वध्वंसान्यकार्यत्वादिभिरित्यर्थः। जीवच्छरीरमिच्छासमवायिकारणद्रव्यवत् प्राणादिमत्त्वात् यन्नैवं तन्नैवं यथा घटादिरिति व्यतिरेकीति भावः। अनुमानेन-सामान्यतोदृष्टेन विशेषणप्रसिद्धिरित्याह अनुमानेनेति। ननु सामान्यतोदृष्टेनैव इच्छासमवायिकारणं चेत् सिद्धं किं व्यतिरेकिणेत्यत आह-नचैवमिति। तेनेति। इच्छासमवायिकारणेनेत्यर्थः। पृथिवी

न्यायलीलावतीप्रकाशः

सात्मकत्वानुमाने साध्यप्रसिद्ध्यर्थमाह यदि वेच्छेति। बाधकबलादिच्छासमवायिकारणस्य पृथिव्याद्यष्टद्रव्याद्यनात्मकत्वे प्रमिते जीवच्छरीरं पृथिव्याद्यष्टद्रव्यभिन्नेच्छासमवायिकारणवदिच्छावत्त्वादिति साध्याप्रसिद्धिर्नेत्यर्थः। ननु सात्मकत्वं शरीरवृत्ति तत्र बाधकाभावाच्छरीरत्वचादित्यन्वयिनैव साध्यसिद्धेः किं व्यतिरेकिणेत्याशङ्क्य निराकरोति न चेति। शरीरं सात्मकमिति शरीरविशेष्यबुद्धेर्व्यतिरेकिणं विनाऽनुपपत्तेरित्यर्थः।

ननु संशयेन साध्यप्रसिद्धावपि न तद्व्यतिरेकादिनिश्चयः संभवति साध्यतद्व्यतिरेकव्याप्तिनिश्चययोः साध्यनिश्चयसाध्यत्वात् साध्यसंशये तद्व्यतिरेकसंशयस्यावश्यकत्वाच्च। न च तर्कसाचिव्यात्सं-

न्यायलीलावतीप्रकाशविवृतिः

जीवच्छरीरमिति। भिन्नान्तं विशेषणं तादृप्यसिद्ध्ये। ननु सात्मकत्वमिति। यद्यप्यस्तित्वत्यादिनैवेयं शङ्का निराकृता तथापि सर्वत्रान्वयसम्भवादुपायत्वमेव व्यतिरेकिणो नेत्यभिमानः। परस्य तूक्तानुमानेनैव जीवदेहसम्बन्धस्यावगतेः समाधानं तुच्छमिति पूरयति शरीरमिति।

साध्यसंशये तद्व्यतिरेकेति। यद्यपि यत्राधिकरणसंशयस्तत्र व्य-

(१) नचैवमिति मिश्रसंमतोऽत्र पाठो बोध्यः।

व्यतिरेकिवेद्यत्वात् । किन्त्वेतन्न सर्वव्यतिरेकिसमाधानम् ।

न्यायलीलावतीकण्ठाभरणम्

इतरभिन्नेत्यादौ नायं प्रकार इत्याह किन्त्विति ।

नन्‍ु साध्यप्रसिद्धिमात्रं समाहितं न तु वैषम्यादिकमपि, तथाहि

न्यायलीलावतीप्रकाशः

शयस्य निश्चयकार्यकरत्वं, साध्यनिश्चयं विना तद्व्यतिरेकानिश्चयमू- लतर्कस्याप्यनवतारात् , अन्यथाऽष्टद्रव्यातिरिक्तद्रव्यवृत्तित्व- निरूपणे तर्कोदयः तर्कोदये च तत्सहकृतसाध्यसंशयस्य साध्य- व्यतिरेकनिश्चायकत्वमित्यन्योन्याश्रयात् । न च संशयजन्यस्मृते- र्निश्चयत्वं, संशयस्य संस्काराजनकतया स्मृत्यजनकत्वात्, जनकत्वे स्मृतेरपि कोटिद्वयालम्बनत्वेन संशयरूपत्वात् स्वार्थानुमाने वि- प्रतिपत्तिवाक्याभावादुक्तसामग्र्यप्रसिद्धेः । अतएव विप्रतिपत्ति- रूपाद्वादिवाक्यादाकांक्षादिमतोऽपूर्वार्थप्रतिपादकात्साध्यप्रसिद्धिरि- त्यपास्तम् । वादिवाक्यस्य संशायकत्वेनानिश्चयकत्वाच्च ।

न्यायलीलावतीप्रकाशविवृत्तिः

तिरेकानिश्चयाभावेऽपि अन्यत्र व्यतिरेकानिश्चये बाधकाभावस्तथापि क्वचिदपि निश्चयाप्रसिद्धौ योग्यानुपलब्धिरभावग्राहिका न सम्भ वति इत्यत्र तात्पर्यम् । वस्तुतस्तु संशयोपस्थितमपि तदेव- मिति निषिध्यते यत्संशये कोटित्वेन विषयो न तु यद्विषये संशयतत्पर्याप्तिस्तदपि, तस्यात्यन्तासत्तुल्यत्वादन्यथा शशो वि- षाणं नवेति संशयोपस्थितशशविषाणनिषेधापत्तेः । प्रकृते च न साध्यकोटिकः संशयस्तदप्रसिद्धेः, किन्तु पर्यालोचनया साध्योपस्थितिरिति भावः । संशयस्य संस्काराजनकतयेति । यद्य- पि विशिष्टज्ञानत्वमेव लाघवात्संस्कारजनकतावच्छेदकं, तथा- पि विरोधिज्ञानस्यापि विरोधिसंस्कारत्वप्रतिबन्धकत्वमन्यथा भावज्ञानाव्यवहितप्रतियोग्यारोपस्यापि संस्कारजनकत्वे तथास्म- रणापत्तेरित्यभिप्रायेणेदम् । यथाश्रुतमभिप्रेत्याह स्वार्थानुमान इति । वादि- वाक्यस्येति । यद्यपि वाक्यस्य न संशायकत्वं तथाप्यनाप्तोक्तत्वश- ङ्कया निर्णयाजनकत्वे पदार्थोपस्थापकतया संशयप्रयोजनकत्वं त- स्येति मन्तव्यम् ।

न्यायलीलावतीकण्ठाभरणम्

अन्वयस्य व्याप्तिरन्यस्य पक्षधर्मता, उपनयवैयर्थ्यं च नहि व्याप्तिः पक्षे उपसंह्रियते येन तत्सार्थकता स्यात्, किञ्चान्वयव्यतिरेकव्याप्त्योरुभयोरपि गमकत्वेऽननुगमः, न वा साध्यप्रसिद्धिरप्युक्तप्रकाराणां संशयादीनां साध्यानिश्चायकत्वात्, निश्चायकत्वे वा व्यतिरे

न्यायलीलावतीप्रकाशः

उच्यते। इच्छाश्रयो द्रव्यं पृथिव्याद्यष्टद्रव्यभिन्नमष्टद्रव्यावृत्तिधर्मवत्त्वादित्यष्टद्रव्यातिरिक्तद्रव्यसिद्धाविच्छायामष्टद्रव्यभिन्नद्रव्यवृत्तित्वं साध्यम्, साध्यप्रसिद्धिश्च द्रव्यत्वे, इच्छाविशेष्यकाष्टद्रव्यभिन्नद्रव्यबुद्धिश्च केवलव्यतिरेकिसाध्या। न च द्रव्यत्वादेः सपक्षाद्व्यावृत्तावसाधारणत्वम्, तद्धि सत्प्रतिपक्षोत्थापकतया दोषावहं, प्रकृते च न हेतोः साध्याभावसाधकत्वं विपक्षे बाधकाभावात्, साध्यसाधके च तत्सत्त्वात्। एतेन केवलव्यतिरेकि नानुमानं सर्वत्र प्रमेयत्वादिना सत्प्रतिपक्षग्रस्तत्वादित्यपास्तम्। विपक्षबाधकेन व्यतिरेकिणो बलवत्त्वात्। सात्मकत्वानुमानं चेत्थम्—इच्छाऽसमवायिकारणसिद्धाविच्छात्वं संयोगासमवायिकारणकवृत्ति नित्येन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातित्वात् शब्दत्ववत्। अत्र स्नेहत्वव्यावर्त्तनार्थं नित्येन्द्रियग्राह्यत्वम्। आत्मैकत्वव्यावर्त्तनार्थं विशेषगुणेति। शब्दजन्ये शब्दे शब्दप्रयोज्यजातिव्यावृत्त्यर्थं साक्षाद्व्याप्येति विशेषणम्। स चासमवायिकरणं संयोगः किञ्चिदवच्छिन्नः संयोगत्वात्। आत्मसंयोगमात्रस्येच्छाजनकत्वेऽतिप्रसङ्गादितीच्छासमवायिकरणसंयोगावच्छेदकत्वं जीवच्छरीरस्य साध्यते।

न्यायलीलावतीप्रकाशविवृतिः

साध्यप्रसिद्धिरिति। इदं च द्रव्यत्वाश्रयाश्रितेति सामान्यतो दृष्टावतारे। यदि तु द्रव्याश्रितेत्येव तदवतारस्तदेच्छायामेव प्रसिद्धिः, द्रव्यत्वे साध्यतावच्छेदकावच्छिन्नप्रसिद्धेरभावादित्यवधेयम्। अत एवाग्रे इच्छाविशेष्यकेत्युक्तम्। आत्मैकत्वेति। आत्मैकत्ववृत्तिसंख्याव्यावर्त्तनार्थमित्यर्थः। स चेति। स च संयोगः किञ्चिदवच्छिन्नः सन्नसमवायिकरणमित्यन्वयः, तेनाग्रेतनविपक्षबाधकं घटते सात्मकत्वं जीवच्छरीर इति समानसंवित्संवेद्यतयाऽधिकरणविशेषनैरपेक्ष्यण सामान्यतस्तत्प्रसिद्धेरिति भावः।

न्यायलीलावतीकण्ठाभरणम्

किवैयर्थ्यात् , न च साध्यानिश्चयमन्तरेण तद्व्यतिरेकनिश्चयो येन तदधीनो व्याप्तिनिश्चयः स्यात् , तद्विशेषानुमितिर्वा स्यात् , अत एव न व्यतिरेके उपायान्तरं येनान्वयिनोऽन्यथासिद्धिः स्यात् , तदुक्तं- 'ऋजुमार्गेण सिद्ध्यन्तमर्थं को नु वक्रेण साधयेदि'ति चेत् ।

न्यायलीलावतीप्रकाशः

सम्प्रदायविदस्तु जीवच्छरीरं तदवयवो वा आत्मभिन्नत्वे सत्यात्मविशेषगुणकारणभोगानधिकरणावृत्तिसंयोगवत्प्राणान्यत्वे सति ज्ञानकारणप्राणसंयोगवत्त्वात् , यन्नैवं तन्नैवम् । आत्मप्राण-संयोगः प्राणमनःसंयोगो वा प्राणशरीरसंयोगेनैवान्यथासिद्धो न हेतुरित्याहुः ।

ननु केवलव्यतिरेकि नानुमानं व्याप्तस्यापक्षधर्मत्वात् व्यतिरेके व्याप्तिरन्वयस्य पक्षधर्मत्वात् । न च साध्याभावव्यापकीभूताभाव-प्रतियोगित्वज्ञानमेवानुमितिहेतुः, केवलान्वयिन्यभावात् । न च तृणारणिमणिन्यायेनानुमानविशेषे तद्धेतुः, उभयसिद्धानुमितिहेत्वभावेन व्यतिरेकिसाध्येऽनुमितित्वासिद्धेः । अथ साध्याभावव्यापका-भावप्रतियोगित्वेन साध्यव्याप्यत्वमनुमेयम्, एवं च व्यतिरेकव्या-प्त्या अन्वयव्याप्त्यनुमाने यत्रानुमितिस्तदेव केवलव्यतिरेकीति । तन्न, अन्वयव्याप्तेर्गमकत्वे व्यतिरेकव्याप्त्युपन्यासस्यार्थान्तरतापत्तेः। अन्वयव्याप्त्यनुकूलतया च तदुपन्यासे अन्वयव्याप्तिमनुपन्यस्य तदुपन्यासस्याप्राप्तकालत्वम् ।

न्यायलीलावतीप्रकाशविवृतिः

जीवच्छरीरमिति । अत्र साध्ये मृतशरीरद्वयसंयोगमादाय मृतशरीरे प्रसक्तिवारणाय कारणान्तं विशेषणम् । तत्रापि विशेषपदानुपादाने मृतशरीरावयवात्मसंयोगं मृतशरीरात्मसंयोगजनकमादाय मृतशरीरावयवे प्रसक्तिरिति तत्पदम् । यद्यप्येवं विषयतया ज्ञानजनकं मृतशरीरद्वयसंयोगमादायातिप्रसङ्गतादवस्थ्यम्, तथाप्यात्मविशेषगुणपदेन स्मृतिरुक्तेति नोक्तदोषः । आत्मन्यतिप्रसक्तिवारणाय सत्यन्तम् । हेतौ चात्मनि व्यभिचारो माभूदिति ज्ञानकारणपदम् । घटे व्यभिचारो माभूदिति प्राणपदम् । प्राण एव व्यभिचारो मा भूदिति सत्यन्तम् । आत्मेति । द्रव्यप्रकाशादौ च तयोः कारणत्वाभिधानं मता

न्यायलीलावतीकण्ठाभरणम्

उच्यते । अन्वयस्य व्याप्तिरन्यस्य पक्षधर्मतेत्यतिप्रसङ्गे प्रतियो-ग्यनुयोगिभाव एव नियामकः । अत एव नोपनयवैयर्थ्यम्, साध्या-भावव्यापकाभावप्रतियोगिमत्ताया एव पक्षे उपनयेन दर्शनीयत्वात् । अत एवान्वयव्यतिरेकव्याप्त्याऽन्वयव्याप्तेरनुमानाद्वा तत्त्वात्, अनुमि-तिवैचित्र्यं वा कारणवैचित्र्याधीनम्, अनुमितिसामान्ये पक्षधर्मता-ज्ञानमेव तन्त्रम् । न चातिप्रसङ्गः, विशेषसामग्रीमादायैव सामान्यसा-

न्यायलीलावतीप्रकाशः

उच्यते । व्यतिरेकव्याप्तेरेवान्वये गम्यगमकभावः साध्याभावव्या-पकसाधनाभावस्याभावेन साधनेन पक्षे साध्याभावाभावस्य साध्यस्य साधनात् व्यापकाभावेन व्याप्याभावस्यावश्यंभावात् । न चैवं क्लृप्ता-नुमानहेतुलिङ्गपरामर्षाभावात्तज्ज्ञानं नानुमितिः, अनुमितिसामान्ये व्याप्तिज्ञानस्य हेतुत्वात् । न चातिप्रसङ्गः, अनुमितिसामान्यसामग्र्यां सत्यामपि अनुमितिविशेषसामग्रीविरहादनुमित्यनुत्पत्तेः तदपेक्षा-या एव सामान्यसामग्र्या जनकत्वात्, निर्विशेषस्य सामान्यस्या-भावात् अन्वयिव्यतिरेकिसामग्र्योस्तत्राभावात् । यद्वा अन्वयव्यतिरे-किवत् प्रतियोग्यनुयोगिभावस्य नियामकत्वात् निरुपाधिव्यतिरे-कसहचारेणान्वयव्याप्तिरेव गृह्यते इति व्याप्तस्यैव पक्षधर्मत्वमिति संक्षेपः ॥

न्यायलीलावतीप्रकाशविवृतिः

न्तरमाश्रित्येति भावः ।

अनुमितिसामान्य इति । यद्यप्यन्यनिष्ठव्याप्तिज्ञानस्यान्यत्राजनक-तया व्याप्तिज्ञानत्वमतिप्रसक्तम्, तथापि व्यभिचारज्ञानविरोधि-व्याप्तिज्ञानमेव सामान्यकारणमित्यभिप्रायः । न चेति । अन्वयानु-मितेर्व्यतिरेकयाकारत्वं व्यतिरेकयनुमितेश्चान्वयाकारत्वं प्रसज्येते-त्यर्थः । एकत्र व्यापकतानवच्छेदकरूपेणापरत्र व्याप्याभावत्वेन सा-ध्यप्रतीतेस्तयोराकारभेदादिति भावः । अनुमितीति । एकैकविशेषेऽपरा-परविशेषसामग्र्यभावान्नोक्तप्रसङ्ग इति भावः । अन्वयीति । व्यति-रेकयन्वयिनोरन्वयिव्यतिरेकिविशेषसामग्र्यभावादित्यर्थः । अन्वय-व्यतिरेकवदिति स्वमते दृष्टान्तः । अत्र विकल्पो व्यवस्थया । व्यवस्था च तत्तद्व्याप्तिघटकीभूतपदार्थोपस्थित्येति ध्येयम् ।

ननु च लक्षणं सकललक्ष्यवृत्तित्वेन समस्तविपक्षव्यावृत्तत्वेन च निश्चितमभ्युपगन्तव्यम् , अन्यथाऽव्याप्तेरतिव्याप्तेर्वाऽलक्षणत्वप्रसङ्गात् । तस्य च प्रयोजनं भेदानुमानं व्यवहारानुमानं वा ? नाद्यः । भेदानुमानवैयर्थ्यात् । तथा ह्येकजातीयस्यातज्जातीयान्योन्याभावविशिष्टत्वानुमानं तेन धर्मेण धर्मिणोऽसाधा-

न्यायलीलावतीकण्ठाभरणम्

मग्न्या जनकत्वात् । न च साध्याप्रसिद्धिः, प्रसिद्धिप्रकाराणां दर्शितत्वात् । न च वक्रोऽयं पन्थाः, वक्ररुचिं प्रति तस्यादोषत्वादिति ।

इदानीं व्यतिरेकिविशेषमाक्षिपति नन्विति । अन्यथेति । किञ्चिल्लक्ष्यत्यागेऽव्याप्तिः, अलक्ष्यसत्त्वेऽतिव्याप्तिः । वैयर्थ्यादिति । गन्धवती पृथिवीति विशेषणमहिम्नैवागन्धवज्जलाद्यन्योन्याभाववत्त्वस्य विशेष्ये पृथिव्यां सिद्धेः विशेषणस्य इतरव्यवच्छेदकत्वस्य सर्वसिद्धत्वादित्यर्थः । वैधर्म्यमन्योन्याभावव्याप्यत्वेन गृहीतं तमर्थमनुमापयेदेवेति चेन्न । स्वार्थानुमाने तथात्वेऽपि परं प्रति प्रयासानुपपत्तेरिति भावः । एतदेव स्फुटयति तथाहीति । असाधारणव्यवहार इति । गन्ध-

न्यायलीलावतीप्रकाशः

इदानीं लक्षणरूपव्यतिरेकिणमाक्षिपति नन्विति । तस्य चेति । पृथिवीत्वादिलक्षणेन किमितरभेदोऽनुमीयते पृथिवीव्यवहारो वेत्यर्थः । भेदानुमानेति । भेदो हि न स्वरूपं वैधर्म्यं वा साध्यं तयोः सिद्धत्वादिति लक्षणात्मकवैधर्म्येणान्योन्याभावात्मकभेदोऽनुमातव्यः, तत्प्रयोजनं च धर्मिणो व्यावृत्तधीः, सा चान्यत्रेव प्रकृतेऽपि विशेषणज्ञानाद्विशेष्ये सम्भवतीति व्यर्थं तदनुमानमित्यर्थः । न चानुमितिसामग्र्यां सत्यामवश्यमनुमितिरिति वाच्यम् । स्वार्थानुमाने तत्सम्भवेऽपि

न्यायलीलावतीप्रकाशविवृतिः

तत्प्रयोजनमिति । तद्रूपं प्रयोजनमित्यर्थः । यद्वा व्यावृत्तधीरित्यस्यैव व्यावृत्तव्यवहार इत्यर्थः । तत्पदेनानुमानपरामर्षाद्यथाश्रुतेऽसङ्गतेः । विशेषणज्ञानादिति । दण्डज्ञानाद्यथा पुरुषेऽदण्डव्यावृत्तत्वधीस्तद्व्यवहारो वा तथा लक्षणरूपविशेषणज्ञानादपि व्यावृत्तत्वधीस्तद्व्यवहारो वा स्यादित्यर्थः । नान्त्य इत्यनभिधानात् पूर्वकल्पान्वयभ्रमो

रणव्यवहारफलम्(१)। स च तल्लक्षणविशिष्टतया बोधेनैव(२) सिद्ध्यतीति व्यर्थं तदनुमानम्। व्यवहारस्तु शब्दप्रयोगात्मा गन्धवती पृथिवीत्युपदेशबलादेव गोजातीयो गौरितिवद्भविष्यति। असाधारण(संवेदनरूपो) हि व्यवहारो व्यावर्तकधर्मात्मकलक्षणाधिष्ठितत्वगोचरो भविष्यति। हानोपादानलक्षणोऽपि च व्यवहारस्तज्जातीयस्येष्टानिष्टसाधनत्वानिबन्धनो(३) भविष्यति जलानल-

न्यायलीलावतीकण्ठाभरणम्

वत्त्वेन प्रवृत्तिनिमित्तेन पृथिवीपदवाच्योऽयमित्यनुमितिलक्षणव्यवहारप्रवृत्तिरित्यर्थः। अतो न व्यवहार इत्यनेन पौनरुक्त्यं तत्र गन्धवत्त्वस्य उपलक्षणत्वाभिप्रायात्। स चेति। व्यवहार इत्यर्थः। पृथि-

न्यायलीलावतीप्रकाशः

परार्थशब्दप्रयोगवैयर्थ्यात्। नापि विप्रतिपन्नबोधार्थं तत्, यो हि लक्षणस्येतरभेदे विप्रतिपद्यते स लक्षणस्य विपक्षावृत्तितायामपीति लक्षणस्य विपक्षव्यावृत्त्यनिश्चये कथं विप्रतिपन्नमपि प्रति लक्षणाभिधानम्। किञ्च जलाद्येकैकभेदे साध्येऽसाधारण्यम्, मिलितजलादिप्रतियोगिकभेदे च साध्ये साध्याप्रसिद्धिः। न च घटादाविव तत्प्रसिद्धिः, तथासत्यन्वयिन एव तत्सिद्धेरिति भावः। व्यवहारानुमानपक्षं दूषयति व्यवहारस्त्विवति। असाधारणेति। व्यावृत्तज्ञानस्वरूपो व्यवहारो लक्षणरूपव्यावर्त्तकधर्मज्ञानादन्यत्रेवात्रापि स्यादित्यर्थः। इष्टानिष्टेति। तज्ज्ञानमपि तज्जातीयत्वज्ञाननिबन्धनमिति व्यवहारोऽपि न व्यतिरेकिसाध्य इत्यर्थः।

यद्यपि जलादीनां त्रयोदशान्योन्याभावास्त्रयोदशसु प्रसिद्धाः पृथिव्यां साध्यन्ते, अत एवाकाशेऽपि व्यतिरेकिणा जलादिमिलितप्रतियोगिकान्योन्याभावाप्रतीतावपि त्रयोदशान्योन्याभावास्त्रयो-

न्यायलीलावतीप्रकाशविवृतिः

मा भूदित्यत आह व्यवहारानुमानपक्षमिति।

---

(१) रणव्यवहारप्रवृत्तिः फलमिति मु० पु० पाठः, व्यवहारः फलमिति च मिश्रसम्मतः पाठः।

(२) विशिष्टताबोधेनेति मु० पु० पाठः।

(३) इष्टत्वानिष्टत्वनिबन्धन इति मा० पु० पाठः।

योरिव शीतार्तस्य । ततोऽव्यापकातिव्यापकविलक्षणधर्ममात्रोपदेशो लक्षणं न त्वनुमानमिति ।

मैवम् । यथाऽभिजातरत्नजातीयमेतद्व्यवहर्तव्यमिति विशुद्धरत्नजातिमत्त्वेन तल्लक्षणेन वा तज्जातीयस्य क्रयादिव्यवहारयोग्यत्वमनुमीयेत तथेहापि कर्तव्यपृथिवीत्युपदेशाव्यवहारयोग्यतानुमानसमये व्यतिरेक्यनुमानं लक्षणम् । अथवा व्यतिरे-

---

न्यायलीलावतीकण्ठाभरणम्

व्येव गन्धवतीत्यनुभव इत्यर्थः । तत इति । लक्ष्यलक्षणसम्बन्धबाधेनमात्रेन क्रियत इत्येव लक्षणोपयोग इत्यर्थः ।

यथेति । प्रभाविशेषाश्रयः पद्मराग इत्युपदेशात् यत्र प्रभाविशेषाश्रयत्वं पश्यति तत्र पद्मरागपदवाच्यत्वं यथाऽनुमिनोति तथा गन्धवती पृथिवीत्युक्ते घृतादावपि गन्धसत्त्वात् पृथिवीपदवाच्यत्वसम्बन्धमनुमिनोतीत्यर्थः । कर्तव्येति । कर्त्तव्ये पृथिवी गन्धवतीत्युपदेशे यत् व्यवहारयोग्यतानुमानं तत्समये इयं पृथिवीव्यवहर्त्तव्या गन्धवत्त्वात्, यन्नैवं तन्नैवमित्यनुमानमित्यर्थः । ननु गन्धवत्त्वावच्छेदेन पृथिवीव्यवहार उपदेशबलादेव सिद्धः किमनुमानेनेत्यत आह अथवेति ।

न्यायलीलावतीप्रकाशः

दशसु प्रसिद्धाः साध्या इति नान्वयित्वासाधारण्ये, साधनस्यापि विपक्षव्यावृत्तिः साधनीयेति न साधनानुपपत्तिः, नापि प्रयोजनाभावः, सामान्यतोऽन्यताज्ञानेऽपि विशिष्यान्यताज्ञानस्यैव तत्त्वात्, तस्यापि च तत्प्रवृत्तिनिवृत्त्योरेव च प्रयोजनत्वात् । तथाप्यन्योन्याभावस्य साध्यतायामभावाद्भेदो न सिध्येत् अभावस्याभावान्तराभावात् । यदि तेन समं स्वरूपभेद एव साध्यस्तदाऽननुगतस्य व्यापकत्वानुपपत्तेरनुमानाप्रवृत्तिरिति व्यवहारो लक्षणात्मकव्यतिरेकिसाध्य इति समाधत्ते यथेति । यथा कस्यांचिद्व्यक्तावभिजातरत्नजाती-

न्यायलीलावतीप्रकाशविवृतिः

यद्यपीति । तथाच मूलाक्षेपोऽयुक्त इति भावः । सामान्यत इति । योग्याधिकरणभेदज्ञानेपि व्यक्तिविशेषे परमाण्वादौ तज्ज्ञानमनुमानसाध्यमेवेति भावः । तथाच मूलस्थदूषणनिरासेऽप्येत

क्यनुमानं लक्षणमिति(१) योग्यतया तस्याऽव्याप्त्यतिव्याप्तिविरहिणोऽविद्यमानसपक्षस्य विपक्षमात्रव्यावृत्तस्य पक्षधर्मस्य व्यतिरेकिस्वभावत्वात् न तु साध्यस्य कस्यचिदनुमानार्थं तदुपन्यासः। तस्य च प्रत्यक्षेण पृथिवीत्वाद्यवान्तरजातिनिरूपणे तत्सहकारित्वेनोपन्यासः। न ह्यन्यथा प्रत्यक्षेण पृथिवीत्वं शक्यनिरूपणम्,

---

न्यायलीलावतीकण्ठाभरणम्

तस्य चेति। घृतादावपि गन्धवत्त्वं पृथिवीत्वपरिचायकतामात्रेण उपयुक्तं न त्वितरभेदानुमानकत्वेन वेत्यर्थः। न ह्यन्य-

न्यायलीलावतीप्रकाशः

थमेतत्क्रयादिव्यवहारयोग्यत्वेन व्यवहर्त्तव्यमित्याप्तेनोपदिष्टे व्यक्त्यन्तरेऽपि तज्जातीयत्वेन तल्लक्षणेन वा तत्तज्जातीयत्वव्यवस्थापकेन क्रयादिव्यवहारयोग्यत्वमनुमीयते तथा प्रकृतेऽपि कचिद्व्यक्ताविय गन्धवती पृथिवीत्वेन व्यवहर्त्तव्येत्याप्तेनोपदिष्टे गन्धवद्व्यक्त्यन्तरे पृथिवीव्यवहारः साध्य इत्यर्थः। न च तत्रान्वय्यनुमानं प्रकृते च वैधर्म्यमिति वैषम्यम्, अनुमानमात्र एव तात्पर्यात्, जलादौ चेश्वरस्याधुनिकस्य वा सङ्केतस्य सन्देहेऽपि निर्गन्धावृत्तिपृथिवीशब्दप्रवृत्तिनिमित्तवत्त्वमनुमेयम्। ननु प्रत्यक्षेणैव पृथिवीत्वादिग्रहसम्भवे किमर्थं गन्धवत्त्वादिलक्षणमिष्यत आह तस्य चेति। गन्ध

न्यायलीलावतीप्रकाशविवृतिः

दूषणादेव नान्योन्याभावस्य साध्यतेति भावः। अनुमानमात्र एवेति। तथाच तावन्मात्रे दृष्टान्तो व्यतिरेकिप्रवृत्तिश्चान्वयास्फुरणदशायामेवेति भावः। ननु जलादौ पृथिवीशब्दत्ववाच्यत्वसन्देह गन्धवत्त्वेन पृथिवीत्वेन वा तदनुमानं तद्विरहिण्यपि तद्व्यवहारे सन्देहेन तस्याप्रयोजकत्वादत आह जलादाविति। जलादौ पृथिवीशब्दवाच्यत्वसन्देहे निर्गन्धावृत्तित्वं तत्प्रवृत्तिनिमित्तस्यानिश्चितमिति साध्यनिश्चयाभावान्नानुमानम्। न च नानार्थत्वमादाय तन्निश्चयस्तदर्थकतामादायापि सन्देहात्तथापि तादृशसंशयानवतारदशायामुक्तसंशयावतारदशायामिदमनुमानमाविकलमिति भावः।

---

(१) लक्षणं व्यतिरेक्यनुमानमिति मा० पु० पाठः।

लौकिकप्रत्यक्षातिक्रमेऽपि(१) द्रुमादौ पृथिवीत्वस्वीकारात् । रूपादिमत्त्वे च पृथिवीतिप्रत्ययेऽतिप्रसङ्गात् । आत्मादौ च ज्ञानाधारवत्त्वेनात्मजातीयत्वस्य व्यतिरेकेणैवानुमानात् ।

न्यायलीलावतीकण्ठाभरणम्

थेत । इतरव्यावर्त्तकधर्म्मोपदर्शनमन्तरेणेत्यर्थः । ननु पृथिवीत्वं प्रत्यक्षमेव किमत्र व्यावर्त्तकापेक्षयेत्यत आह लौकिकेति । द्रुमादौ तदन्तरेण सन्देहनिरासाभावादित्यर्थः ।

ननु तथापि किं लक्षणेन रूपवत्त्वादिकमेव पृथिवीत्वपरिचायकं स्यादित्यत आह रूपादिमत्व इति । जलादावपि पृथिवीत्वं पृथिवीपदवाच्यत्वं वा गृह्येतेत्यर्थः । प्रत्यय इत्युपलक्षणं पृथिवीपदप्रयोगे वेत्यपि द्रष्टव्यम् । ज्ञानाधार आत्मा ज्ञानवत्त्वात् यन्नात्मा तन्न ज्ञानाधार इत्यत्र स्वात्मपरात्मसाधारण्येन व्यवहारानुमानमेव शरणमित्याह आत्मादाविति । आत्मनः प्रत्यक्षत्वेऽपि परात्मनस्तज्ज्ञानस्य चाप्रत्यक्षत्वादिति भावः । यद्यपि पृथिव्यप्तेजोवायूनामपि सामस्त्येन तत्तत्पदवाच्यत्वेन तत्तदितरभेदे वाऽनुमानमेव शरणम्, साध्यस्य तद्व्यवहारस्य तदितरभेदस्य वा प्रत्यक्षे घटादौ प्रत्यक्षत एव सिद्धेर्न साध्याप्रसिद्धिः, न चान्वयित्वं, घटादेरपि पक्षत्वात् पृथिवीत्वावच्छेदेन तत्रापीतरभेदस्य साध्यत्वात् प्रकारभेदेन एकस्यैव पक्षत्वसपक्षत्वसम्भवात्, अती-

न्यायलीलावतीप्रकाशः

वत्त्वादेर्लक्षणस्येत्यर्थः । आत्मादौ चेति । आत्मनि ज्ञानाधारत्वस्य प्रत्यक्षेण ग्रहेऽपि परमात्मनोऽप्रत्यक्षत्वात्तत्रोपदेशादपि ज्ञानाधारत्वस्य प्रत्येतुमशक्यत्वात् विप्रतिपन्नं प्रत्यात्मत्वं ज्ञानाधारत्वेन व्यतिरेकिणा साध्यमित्यर्थः ।

न्यायलीलावतीप्रकाशविवृत्तिः

ज्ञानाधारत्वस्येति । आत्मत्वस्य चेत्यर्थः । ननूपदेशके कथं न तत्प्रत्यय इत्यत आह विप्रतिपन्नमिति । ज्ञानाधारत्वेनेति । चेष्टाद्यनुमितेनेति शेषः । न च तत एवात्मत्वमनुमीयतामिति वाच्यम् । तद्व्याप्यत्वेन तदपरामर्षदशायामेव तत्प्रकारसम्भवादिति भावः ।

(१) क्रमेणेति मा० पु० पाठः ।

प्रमेयमात्रस्य तर्हि किं सामान्यलक्षणम् । लक्षणं हि तन्मात्रस्य विपक्षव्यावृत्तिज्ञापकमिष्टम्, प्रमेयमित्यसाधारणव्यवहारप्रवृत्तिनिमित्तं वा ? नाद्यः ; विपक्षव्यावृत्तेरसंभवेन तत्प्रख्यापकप्रश्नाद्यनुपपत्तेः । न द्वितीयः । प्रमाविषयस्यैव तत्त्वात् । सा-

---

न्यायलीलावतीकण्ठाभरणम्

न्द्रियाकाशाऽन्योन्याभावस्यापि घटे प्रत्यक्षत्वात् अधिकरणयोग्यताया एवाऽन्योन्याभावग्रहे तन्त्रत्वात्, आकाशादौ प्रत्येकप्रसिद्धानामितरभेदानां समूहस्य साध्यत्वात्, अभावप्रतियोगिकस्तु स्वरूपत एव साध्यः, न च साध्याननुगमः, अनुमानान्तरेण तत्साध्यसिद्धेः । तथाप्यभ्युपगमवादोऽयम् ।

ननु यदि समानासमानजातीयव्यवच्छेदकं लक्षणं न तु परिचायकमात्रं तदा भावाभावसाधारणप्रमेयमात्रस्य किं लक्षणमत आह प्रमेयमात्रस्येति । प्रश्न एवायमनुपपन्न इत्याह लक्षणं हीति । विपक्षव्यावर्त्तकं लक्षणमिति जानानः प्रमेयत्वस्य विपक्षव्यावर्त्तकत्वमपश्यन् कथमेवं पृच्छेदित्यर्थः । प्रश्नादित्यादिपदादुत्तरपरिग्रहः । प्रमेयमात्रस्य किं विपक्षव्यावर्त्तकमत्र सहृदयानां न प्रश्नः न वोत्तरमुचितमिति भावः । प्रमाविषयस्यैवेति । भावप्रधानो निर्देशः, तेन प्रमा

न्यायलीलावतीप्रकाशः

प्रयेयमात्रस्येति । भावाभावसाधारणस्येत्यर्थः । लक्षणात्मकव्यतिरेकिणो द्वयं साध्यमुक्तमतस्तद्विकल्पयति तन्मात्रस्येति । तत्प्रख्यापकेति । प्रश्नवाक्यं हि किंशब्दसमभिव्याहृतपदान्तरवाच्यधर्मवत्तया तदेव वस्तु निश्चाययति तद्विशेषं चानध्यवसितमुपपादयति इह तु विपक्षव्यावृत्तेरसम्भवात्क निश्चयानध्यवसायौ दर्शनीयावित्यर्थः । प्रमेति । प्रमाविषयत्वस्येत्यर्थः । तच्च यद्यप्युपधायकप्रमाव्यक्तीनमननुगमादननुगतं तथापि परम्परासम्बद्धप्रमात्वजातिरेवानुगमिका । न च प्रमाविषयत्वस्यापि प्रमाविषयत्वादात्माश्रयः, अवच्छेदक-

न्यायलीलावतीप्रकाशविवृतिः

किंशब्दसमभिव्याहृतेति । प्रकृते च प्रमेयमात्रं लक्षणवत्त्वेन निश्चाययेत्तद्विशेषे चानध्यवसायं कारयेत्तच्चोभयमप्यसम्भवीति भावः । प्रमात्वजातिरिति । अनुभवत्वजातिरित्यर्थः । अवच्छेदकेति । इदमुपलक्षणं

मान्यलक्षणं विना कथं विशेषलक्षणमिति चेत् । न । नियमानभ्युपगमात् । लक्षणोपयुक्तसामान्यसंभवे हि सामान्यलक्षणावसरो न तु विशेषलक्षणप्रवर्तकत्वेन ।

तत्र भावः सदिति प्रत्ययविषयो गुणाश्रयो द्रव्यम् । तत्र

न्यायलीलावतीकण्ठाभरणम्

विषयत्वं प्रमेयपदप्रवृत्तिनिमित्तं, प्रमाव्यक्तीनां नानात्वेऽपि परस्परासम्बद्धं ज्ञानत्वमेव विषयावच्छेदकम् ईश्वरप्रमाया एकत्वात्, सैव वा विषयावच्छेदिका प्रमेयत्वेऽपि तदेव प्रमेयत्वं वर्त्तते, न चात्माश्रयः, प्रामाणिकत्वादित्यर्थः । ननु प्रमेयसामान्यलक्षणं विना तद्विशेषाणां द्रव्यगुणकर्मादीनां लक्षणमनुपपन्नमित्याह—सामान्येति । यत्र विपक्षसम्भावना तत्र सामान्यं लक्षयितुमुचितं न तु सर्वत्रेत्याह नियमेति । तदेवाह लक्षणोपयुक्तेति । लक्षणार्हसामान्यसम्भव इत्यर्थः ।

लक्षणप्रयोजनमुक्त्वा पदार्थानां लक्षणमवतारयति तत्रेति । स-

न्यायलीलावतीप्रकाशः

प्रमाव्यक्तीनां भेदात् । सामान्यलक्षणं विनेति । प्रमेयसामान्यलक्षणं विना कथं तद्विशेषात्मादीनां लक्षणमित्यर्थः । लक्षणोपयुक्तेति । यत्र सामान्यलक्षणं विना विशेषलक्षणमशक्यं तत्र सामान्यलक्षणं विसरेत् नतु सामान्यलक्षणं विना विशेषलक्षणमेव न भवतीत्यर्थः ।

तत्रेति । लक्षणात्मकवैधर्म्येषु मध्ये इत्यर्थः । सदितीति । ननु सद्यदि सत्ताजातिमत् तदा सामान्यादावव्याप्तिः, अथ स्वरूपसत्तावत् तर्ह्यभावेऽतिव्याप्तिः ।

न्यायलीलावतीप्रकाशविवृतिः

प्रामाणिकत्वादयमात्माश्रयो न दोषायेत्यपि द्रष्टव्यम्, अतएव कदाचित्तत्प्रमायामपि तत्प्रमा विषयत्वम् । इदं चानुगमाभिधानमुपाध्यन्तरसाधारण्याय, प्रकृते त्वीश्वरप्रमामेकामादायापि समाधिसम्भवादिति रहस्यम् । सामान्यलक्षणं–सामान्यावच्छिन्नेतरभेदज्ञापकम् । एवमग्रेऽपि । सामान्याद्यव्याप्तिरिति । मूले प्रत्ययपदेन प्रमाया उक्तत्वादन्यथाऽतिप्रसङ्गादिति भावः ।

नन्वभावत्वमपि भावत्वात्यन्ताभाववत्त्वमित्यन्योन्याश्रय इत्यरु-

यद्यपि सम्बन्धो न सदातनः, तत्र योग्यतास्वरूपमननुगतं, द्रव्यत्वं तु क्लृप्तम् (१), तथापीहात्यन्तायोगव्यवच्छेदो लक्षणार्थः। सामान्य-

न्यायलीलावतीकण्ठाभरणम्

त्ताप्रकारकज्ञानविषयत्वं भावत्वं, स च प्रकारप्रत्ययः सामान्यादिष्वपि भ्रमरूपः, परम्परासम्बन्धसत्तामहिम्ना प्रमारूप एव वा, अभावस्य तु सत्ताभानविरोधित्वैवेति न तत्रातिव्याप्तिः। अभावत्वात्यन्ताभाववत्त्वमन्योन्याश्रयादिग्रस्तम्। गुणाश्रय इति। गुणसमवायीत्यर्थः। क्षणमगुणं द्रव्यमित्यभ्युपगमादव्याप्तिमाशंक्याह तत्रेति। अननुगतमिति। अनुगतरूपापरिचयात् दुर्ग्रहमित्यर्थः। क्लृप्तमिति। आकाशादिषु द्रव्यसाक्षात्कारानुगतप्रत्ययाभावादसिद्धमित्यर्थः। अत्यन्तेति। गुणात्यन्ताभावविरोधिमत्त्वं द्रव्यलक्षणमित्यर्थः। तच्च गुणप्रागभावध्वंसयोरपीति भावः। समवायिकारणत्वं वा द्रव्यत्वम्, कर्मान्यत्वे सति नित्यवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वम् वा। गुणलक्षणमाह सामान्यवानिति। नित्यवृत्तिसत्तासाक्षाद्व्याप्यजाति

न्यायलीलावतीप्रकाशः

अत्राहुः। अभावत्वात्यन्ताभावत्वं सत्त्वम्। यद्वा सत्ताभानविरोधिप्रकारशून्यत्वम्। सामान्यत्वादिकं न सत्ताभानविरोधीति सामान्यादावारोपिता सत्ता भासते। प्रागभावत्वादिकं च सत्ताभानविरोधि, यन्निष्ठतया यस्मिन् धर्मे भासमाने सत्ताप्रकारिका विषयता न भवति तस्यैव प्रकारस्य सत्ताभानविरोधित्वात्। गुणाश्रय इति। गुणसमवायीत्यर्थः। न सदातन इति। क्षणमगुणं द्रव्यमिति सिद्धान्तादित्यर्थः। योग्यतेति। गुणस्वरूपयोग्यतायास्तदवच्छेदकमनुगतं धर्ममज्ञात्वा ज्ञातुमशक्यत्वादित्यर्थः। द्रव्यत्वमिति। तस्यापि गुणाश्रयत्वव्यवस्थाप्यत्वादित्यर्थः। तथापीति। यद्यपि गुणाऽत्यन्तायोगोऽत्यन्ताभावस्तद्व्यवच्छेदश्च प्रतियोगी गुणः, स चाद्यक्षणे द्रव्ये नास्ति, तथापि

न्यायलीलावतीप्रकाशविवृतिः

चेराह यद्वेति। प्रागभावत्वादिकं च सत्तेति। सत्ताविरहव्याप्यत्वप्रतिसन्धानानपेक्षमेव यत्प्रतिसन्धानं सत्ताभानविरोधि तादृशप्रकारशून्यत्वम्। अन्वयव्यतिरेकाभ्यां च प्रागभावत्वादिज्ञानं तथेत्याशयेनेदमुक्तम्।

(१) श्लिष्टमिति मु० पु० पाठः।

वानचलनात्मकः समवायिकारणताहीनो गुणः । संयोगविभाग-
योरसमवायिकारणं(१) कर्म, द्वित्वे तात्पर्यम् ,तेन संयोगविभागव्यु

न्यायलीलावतीकण्ठाभरणम्

मत्त्वम , असमवायिकारणवृत्तिकर्म्मावृत्तिजातिमत्त्वं वा गुणलक्षण-
मिति भावः । संयोगविभागयोरिति द्विवचनलभ्यमर्थं स्फुटयति द्वित्व इति ।
प्रयोजनमाह तेनेति । तयोः प्रत्येकमात्रकारणत्वात् । अनित्यमात्रवृत्ति
सत्तासाक्षाद्व्याप्यजातिमत्त्वं कर्मलक्षणमिति भावः । ननु यत्र सं
योगनाशपूर्वकाल एवाश्रयनाशात् कर्म्मनाशस्तत्राव्याप्तिरुभयाज-

न्यायलीलावतीप्रकाशः

प्रागभावप्रध्वंसावपि तद्व्यवच्छेदौ, न चैवमननुगमः, प्रतियोगितत्प्राग-
भावप्रध्वंसानामत्यन्ताभावासमानाश्रयत्वेनैवानुगमः । समवायिका-
रणत्वं द्रव्यत्वं तदवच्छेदकं चोक्तमेवेत्यप्याहुः । सामान्यवानिति । कर्मा-
वृत्त्यसमवायिकारणवृत्तिजातिमत्त्वं, सामान्यमात्राश्रयकर्मान्यत्वं वा
गुणलक्षणम् । द्वित्वे तात्पर्यमिति । संयोगविभागयोश्च प्रत्येकं तदसम

न्यायलीलावतीप्रकाशविवृतिः

वस्तुतः समवायसम्बन्धनिरूपकत्वमेव भावत्वम्, निरूपकता प्रतियो
गित्वानुयोगित्वाभेदान्यतमसम्बन्धेनेति तत्त्वम् । भावत्वाभावत्वादिक
-मखण्डमेव सामान्यपदार्थान्तर्गतं समवायाविरहाज्जातिभिन्नम् इति
रत्नकोषकृतः । प्रतियोगितःप्रागभावेति । इदं चैकमिदं सकलप्रतियोगिवृ-
त्त्यस्तीत्येतावन्मात्रख्यापनायोक्तमन्यथा गुणाभावाभावत्वस्यैवानुग-
मकस्य सम्भवादेतदुपन्यासासङ्गतेः । न च प्रतियोगितावच्छेद-
कत्वेनैतदुपन्यासः, तस्यातिप्रसक्तेरभावज्ञानजनकीभूतज्ञानागोच
रत्वाच्चेति ध्येयम् । समवायिकारणत्वमिति । अत्र द्रव्यत्वं द्रव्यलक्षणमित्य-
र्थः। उक्तमेवेति । गुणात्यन्ताभावाभाववत्त्वमेवेत्यर्थः । द्रव्यत्वमेव तदव-
च्छेदकं लाघवादित्यरुचिविभावनमित्यप्याहुरिति । सामान्यवानित्यत्र
सामान्यमुपाधिरपीति सामान्यादावतिव्याप्तिरतो व्याचष्टे कर्मेति ।
अत्र कर्मणि द्रव्ये सामान्ये चातिव्याप्तिवारणाय विशेषणत्रयम् । अस-
मवायिकारणत्वं च पारिभाषिकं, समवायिकारणभिन्नत्वं वा, आद्ये

---

(१) नासमवायिकारणं—मु० पु० पाठः ।

दासः । न चाकृत(१)फलेऽसिद्धिः, तस्यापि(२) हेतुस्वभावग्राहकमानविषयीकृतत्वात्, तदभावस्य तु सहकारिविरहाधीनत्वात्

न्यायलीलावतीकण्ठाभरणम्

नकत्वादित्याह नचेति । अदत्तफले-अदत्तसंयोगलक्षणफले । तत्रापीति । कर्मत्वावच्छेदेनैव संयोगं प्रति स्वरूपयोग्यतायास्तत्रापि सत्वा-

न्यायलीलावतीप्रकाशः

वायिकारणत्वमित्यर्थः । ननु संयोगः संयोग इव विभागोऽप्यसमवायिकारणमस्तु तत्र तत्कारणत्वस्य त्वयाप्यभ्युपगमात् । मैवम् । स्वजन्यविभागध्वंसकसमवायिकारणत्वस्य विवक्षितत्वात् । ननु विनश्यदवस्थसमवायिकर्मणि न तदसमवायिकारणत्वमिति तदव्याप्तिरित्यत आह न चाकृतेति । हेतुस्वभावेति । तत्रापि स्वरूपयोग्यतास्त्येवेत्यर्थः । तदवच्छेदकं च संयोगविभागोभयासमवायिकारणमात्रवृत्ति-

न्यायलीलावतीप्रकाशविवृतिः

अन्यतरत्वमादायाऽन्त्ये सामान्यत्वादिकमादाय प्रसक्तायाः सामान्यादावतिव्याप्तेर्जातिपदेन वारणादिति । सामान्येति । जातिमात्रसमवायीत्यर्थः । अत्र मात्रपदं द्रव्यवारणाय, जातिसमवायिपदं सामान्यादिवारणाय । ननु संयोग इति । विभागस्य संयोगपूर्वकत्वनियमात् संयोगस्य तज्जनकत्वे समवायिकारणप्रत्यासन्नतयाऽसमवायिकारणत्वमपि दुःपरिहरमिति द्वित्वविवक्षयापि न निस्तार इति भावः । स्वजन्यविभागेति । कर्मणः प्रथमं विभागस्ततः पूर्वसंयोगनाशस्ततः कर्मण एवोत्तरसंयोग इति क्रमेण भवति कर्मणि लक्षणगमनम्, संयोगस्य त्वव्यवहितोत्तरलक्षण एव संयोगजनकत्वमिति नोक्तलक्षणसम्भव इति भावः । अत्र शरीरप्रतियोगिकपूर्वदेशविभागनाशकशरीरान्तरसंयोगजनकहस्ततरुसंयोगेऽतिव्याप्तिरिति स्वजन्यपदम् । शरीरतरुसंयोगस्यापि प्रतियोगितया स्वध्वंसजनकत्वात्पूर्वातिव्याप्तितादवस्थ्यमिति विभागपदम् । विभागस्यापि प्रतियोगितया स्वनाशकत्वात्कारणाकारणविभागे कार्याकार्यविभाजकेऽतिव्याप्तिरिति संयोगपदम् । कालाद्यतिव्याप्तिवारणाय समवायिपदम् । तदवच्छेदकं चेति । यद्यपि कर्मत्वस्य विनश्यतदवस्थकर्मण्यपि वृत्तेरसम्भवीदं लक्षणम्,

---

(१) अदत्तेति मिश्रसंमतः पाठः । (२) तत्रापीति पा० पु० पाठः मिश्रसंमतश्च ।

दीपोर्ध्वनयनावच्छिन्नबीजवत् , अन्यथा तद्भ्रान्तत्वापत्तेः । नित्य-

न्यायलीलावतीकण्ठाभरणम्

दित्यर्थः । अन्यथेति । बीजत्वावच्छेदेनाङ्कुरं प्रति कर्म्मत्वावच्छेदेन संयोगं प्रति कारणताग्राहकप्रमाणस्य भ्रान्तत्वापत्तेरित्यर्थः । नित्यमिति। एकं सदनेकवृत्तीत्यर्थः । तेनाकाशादिपरिमाणेषु नातिव्याप्तिः, तेषा-

न्यायलीलावतीप्रकाशः

जातिमत्त्वमिति भावः । (१)वस्तुतो विनश्यदवस्थं समवायिकारणमेव न भवति (२)कार्योत्तरकाले सत एव तत्त्वात् । अन्यथेति । कर्महेतुताग्राहकमानस्य भ्रान्ततापत्तेः । नित्यावृत्तिसत्तेतरजात्यधिकरणं कर्मेति वा लक्षणम् । नित्यमिति । नन्वेकमिति व्यर्थं व्यावर्त्याभावात् आकाशपरिमाणादेरनेकासमवेतत्वात् । अत्राहुः । एकमिति स्वरूपाभिधानमात्रं नतु लक्षणार्थम् । यद्वा एकं लक्षणमिति योज्यम्, लक्षणान्तरं

न्यायलीलावतीप्रकाशविवृतिः

तथापि सत्तामादायातिप्रसङ्गस्य वारकेण मात्रपदेनात्र सत्ताव्याप्यत्वमात्रमभिप्रेतम्। नचैवं संयोगस्याप्युभयासमवायिकारणत्वमिति प्रागेवोक्तमतः संयोगेऽतिव्याप्तिरिति वाच्यम् । स्वजन्यविभागध्वंसकसंयोगासमवायिकारणवृत्तिसत्ताव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । केचित्तु संयोगस्य विभागासमवायिकारणत्वमेव नास्ति इति मतेनैवेदमित्याहुः । तन्न उपक्रमाविरोधात् । वस्तुतस्तु विनश्यदवस्थामिति । इदं च स्वरूपप्रत्यायनमात्रं न तु प्रकृतोपयोगि कर्मोत्पत्त्यवधिकतृतीयक्षणेऽपि द्रव्यनाशे यथाश्रुतलक्षणाव्याप्तेः। कर्मोत्तरेति। न चात्र मानाभावः, अवयवकर्मसामग्रीसहिताया एवावयविकर्मसामग्र्याः कर्मजनकत्वमिति मतेनैतत्सिद्धान्तसम्भवादित्यन्यत्र विस्तरः । एवन्तु कार्योत्तरेत्यादि कर्मरूपकार्यापेक्षया बोध्यम् । नित्यावृत्तीति । अत्र सत्तेतरत्वं सत्तासाक्षाद्व्याप्यत्वमतो न घटादावतिव्याप्तिः। अन्यतरत्वमादायातिप्रसक्तिरिति जातिपदम्। गुणद्रव्ययोरतिव्याप्तिरिति नित्यावृत्तिपदम्, वस्तुतो नञ्व्यत्यासेनानित्यवृत्तिसत्तेतरजात्यनधिकरणत्वमर्थः । विशेषनिषेधस्य शेषप्रापकतया सत्तावत्त्वमपि लभ्यत इति न सामा-

(१) वस्तुतस्तु इति विवृतिकाराभिमतः पाठो बोध्यः ।

(२) कर्मोत्तरेति वि० सम्मतः पाठः ।

मेकमनेकवृत्ति सामान्यम् । एकद्रव्याः स्वभावस्तन्तो विशे-
षाः । नित्यः सम्बन्धः समवायः ।

गन्धवती पृथिवी । स्नेहवत्य आपः । भास्वररूपं तेजः ।

न्यायलीलावतीकण्ठाभरणम्

मनेकेषामनेकवृत्तित्वात् । इत्येकं लक्षणमित्यपव्याख्यानम्, वैयर्थ्यता-
दवस्थ्यात् । असमवायित्वे सत्यनेकसमवेतत्वं तु तल्लक्षणम् । स्वभावस-
न्त इति । सत्ताशून्या इति । निःसामान्यत्वे सत्येकैकद्रव्यमात्रवृत्तित्वं
विशेषत्वमिति भावः । नित्य इति । निःसामान्यसम्बन्धत्वं नित्यस-
म्बन्धत्वं वा समवायत्वम् । स्वरूपसम्बन्धेनौपचारिकः सम्बन्धपद-
प्रयोगः ।

गन्धवतीति । गन्धात्यन्ताभावानधिकरणेत्यर्थः । आकाशपर्यन्त-
मेवं व्याख्येयम् । परत्वापरत्वे तपनपरिस्पन्दाविषयापेक्षाबुद्धिजन्ये

न्यायलीलावतीप्रकाशः

चासमवायित्वे सत्यनेकसमवेतत्वम् । अनेकवृत्तित्वं च स्वाश्रयान्यो-
न्याभावसामानाधिकरण्यम् । एकद्रव्या इति । निःसामान्यत्वे सत्येकद्र-
व्यमात्रवृत्तय इत्यर्थः । नित्य इति । सामान्यत्वविशेषत्वशून्यत्वे सति
जातिशून्यस्समवाय इत्यर्थः ।

गन्धवतीति । अत्रापि पूर्ववदत्यन्तायोगव्यवच्छेदे तात्पर्यम् ।

न्यायलीलावतीप्रकाशविवृतिः

न्याद्यतिव्याप्तिरिति सारम् । असमवायित्व इति । समवायवृत्त्या अना-
धारत्वे सतीत्यर्थः । नन्वनेकत्वं यद्येकत्वानधिकरणत्वं तदा
द्रव्यवृत्तिजातावतिव्याप्तिः, अथ द्वित्वाद्यधिकरणत्वं तदा गुणवृत्ति-
जातावतिव्याप्तिरित्यन्यथार्थमाह अनेकेति । अत्र स्वाश्रयपदं किञ्चि-
त्स्वाश्रयपरम् । वस्तुतो द्वित्वावच्छिन्ने परमाणुपरिमाणेऽतिप्रसक्तिवा-
रणाय एकपदमिति मूलमेव सम्यगिति मन्तव्यम । सामान्यातिप्रस-
क्तिभयेन व्याचष्टे निःसामान्यत्व इति । अत्र सत्यन्तेन द्रव्यगुणकर्मणाम् ।
उत्तरदलेन सामान्यस्य वारणम्, वृत्तिपदं समवायपरमतो न समवा-
याभावयोरतिप्रसक्तिः । नित्यस्यापीश्वरज्ञानादेः स्वरूपसम्बन्धतया-
तिव्याप्तेराह सामान्यत्वेति ।

आद्यक्षणाव्याप्तेराह अत्रापीति । ननु भास्वरत्वं परप्रकाशकत्वमिति

अरूपः स्पर्शवान्पवनः(१)। शब्दाश्रय आकाशः(२)। असाधारण-परत्वापरत्वाद्यसमवायिनिदानसंयोगाश्रयो विभुः कालः। न च परत्वानुमेयः, तदन्यकारणानामपि कार्योन्नेयत्वात्। उक्तसंयोगानाधारो विभुर्विशेषगुणरहिता दिक्। ज्ञानाधार आत्मा। अस्पर्शपरमाणुर्मनः।

न्यायलीलावतीकण्ठाभरणम्

विवक्षिते तेन न दिश्यतिव्याप्तिः। पिण्डातिव्याप्तिवारणायाह विभुरिति। तदन्यकारणानां-कालपिण्डसंयोगानां, तथाच तत्रातिव्याप्तिः स्यादिति भावः। उक्तसंयोगानाधार इति। सूर्यक्रियाविषयकापेक्षाबुद्धिजन्यपरत्वापरत्वजनकसंयोगानाधार इत्यर्थः। तथाच संयुक्तसंयोगविषयकापेक्षाबुद्धिजन्यपरत्वापरत्वासमवायिकारणसंयोगाधारविभुत्वं सिद्धमित्यर्थः। ज्ञानाधारत्वं ज्ञानात्यन्ताभावानाधिकरणत्वं विवक्षितम्, अत्यन्ताभावश्च ज्ञानत्वावच्छिन्नप्रतियोगिको ग्राह्यः। अस्पर्शत्वं स्पर्शात्यन्ताभाववत्त्वं, तेन पार्थिवपरमाणौ क्षणमस्पर्शे नातिव्याप्तिः।

न्यायलीलावतीप्रकाशः

एवमग्रेऽपि। भास्वरत्वं जातिविशेषः। परत्वापरत्वासमवायिकारणसंयोगाश्रयत्वं दिशोऽप्यस्तीत्यत उक्तमसाधारणेति। ज्यैष्ठ्यकानिष्ठ्यरूपेत्यर्थः। दिशस्तत्र कारणत्वेऽपि न तत्संयोगः पिण्डवर्त्ती कारणमिति न तत्रातिव्याप्तिः। विभुरिति पिण्डव्यवच्छेदः। तदन्यकारणानामिति। कालातिरिक्तानामित्यर्थः। उक्तसंयोगेति। परत्वापरत्वविशेषासमवायिकारणसंयोगानाधार इत्यर्थः, तेन काले नातिव्याप्तिः। ज्ञानाधार इति ज्ञानसमवायित्वमात्रं, न तु ज्ञानसमवायिकारणत्वमपि विवक्षितमीश्वरात्मन्यव्याप्तेः।

न्यायलीलावतीप्रकाशविवृतिः

परमाण्वादावव्याप्तिरित्यत आह भास्वरत्वमिति। नन्वाधारत्वं प्रकारत्वविशेष इति ईश्वरात्मन्यव्याप्तिरत आह ज्ञानसमवायित्वेति।

ननु ज्ञानवृत्ति यत्कारणतावच्छेदकं तद्वत्त्वं कथं सङ्ख्याया-

---

(१) वायुः—प्रा० पु० पाठः।

(२) आकाशम्—प्रा० पु० पाठः।

रूपादीनां चतुर्णां स्वस्वसामान्यम्, न तु नयनादिग्राह्यता, अतीन्द्रिये तदभावात्, योग्यताया अनुगताया उक्तानतिरेकात्। गणनव्यवहारप्रयोजिका संख्या। परिमाणं मानव्यवहारयोगि(१)। पृथगिति बुद्धेरसाधारणो विषयः पृथक्त्वम्। कार्यः

न्यायलीलावतीकण्ठाभरणम्

स्वस्वसामान्यं रूपत्वरसत्वादि। उक्तानतिरेकादिति। चक्षुर्ग्रहणयोग्यतावच्छेदकं रूपत्वमेव वाच्यमित्यर्थः। एवमन्यत्रापि। गणनव्यवहारहेतुश्च संख्यात्वव्यवहारहेतुस्तेन संख्यात्वमेव विवक्षितम्, अन्यथा प्रत्येकसमुदायविवक्षायामव्याप्त्यसिद्धी स्याताम्। अवध्यनिरूप्यत्वे सत्येकमात्रवृत्तिवृत्त्यनेकव्यावृत्तगुणत्वव्याप्यजातिमत्त्वं लक्षणमिह विवक्षितम्। परिमाणत्वमिति। परिमाणत्वजातियोगित्वमित्यर्थः। पृथगिति। अवध्यनिरूप्यत्वेनाविशेषितं संख्यालक्षणभाग एव पृथक्त्वलक्षणम्। कार्य्य इति। द्रव्यासमवायिकारणवृत्ति-

न्यायलीलावतीप्रकाशः

स्वस्वसामान्यमिति। रूपस्य रूपत्वं रसस्य रसत्वादीत्यर्थः। ननु तत्र मानाभावः नयनग्राह्यत्वादिभिरुपाधिभिरेव रूपत्वादिव्यवहारोपपत्तेरित्यत आह नत्विति। योग्यताया इति। चक्षुर्ग्रहणस्वरूपयोग्यतावच्छेदरूपस्य जात्यनतिरेकादित्यर्थः। गणनेति। यद्यपि द्वित्वादिव्यवहारजनकं भागासिद्धं, समुच्चिततज्जनकत्वं च स्वरूपासिद्धम्, तथापि संख्याव्यक्तिविषयव्यवहारजनकज्ञानवृत्तिकारणतावच्छेदकरूपवत्त्वं, ज्ञाने च कारणत्वं विषयवृत्तिधर्मावच्छेद्यमिति जातिर्लक्षणम्। असाधारण इति। यद्विशिष्टे द्रव्ये पृथगिति धीरित्यर्थः। अनेन जातिविशेषोऽभिप्रेतः। कार्य इति। विभागाजन्याद्यशब्दासमवायिकारणवृ-

न्यायलीलावतीप्रकाशविवृतिः

मत आह ज्ञाने चेति। तथाच ज्ञाने परस्परासम्बद्धं सङ्ख्यात्वं कारणतावच्छेदकं विषये च साक्षात्सम्बन्धेन लक्षणमिति भावः। पृथक्त्ववृत्तिजातावतिव्याप्तेराह यद्विशिष्ट इति। धियोऽपि विषयविशेष एव व्यावर्त्तकोऽत आह अनेनेति। घटध्वंसवत् कपालमित्यत्र स्वरूपसम्बन्धेऽतिव्याप्तेराह विभागाजन्येति। एतच्च विशेषणं विभागा-

(१) मानत्वयोगीति प्रा० पु० पाठः। परिमाणत्वयोगीति च मिश्रसंमतः पाठः।

सम्बन्धः संयोगः । यद्विशिष्टे विभक्तप्रत्ययः स विभागः । एवं परत्वापरत्वे ।

अर्थप्रकाशो बुद्धिः । अर्थः स्वाभाविको विषयः, तेन सहैव प्रकाश्यत इति । सा चाविद्या विद्या च । मिथ्याज्ञानमवि-

---

न्यायलीलावतीकण्ठाभरणम्

गुणत्वव्याप्यजातियोगित्वं संयोगत्वम् । यद्विशिष्ट इति । संयोगनाशकगुणत्वं, संयोगान्याद्यशब्दासमवायिकारणवृत्तिगुणत्वव्याप्यमत्त्वं वा विभागत्वम् । एवं परत्वापरत्व इति । यद्विशिष्टे परापरबुद्धिरित्यर्थः । इहापि जातिविशेष एव लक्षणमिति भावः ।

प्रकाश इति । इहापि बुद्धित्वं जातिर्लक्षणमित्यर्थः । तेनेति । अर्थनिरूपणाधीननिरूपणत्वमर्थसहनिरूपणत्वमित्यर्थः । मिथ्याज्ञानमिति ।

न्यायलीलावतीप्रकाशः

त्तिगुणत्वसाक्षाद्व्याप्यजातिमानित्यर्थः । यद्विशिष्ट इति । उत्पन्नमात्रकर्मजन्यगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमानित्यर्थः । एवमिति । अत्रापि जातिविशेषो लक्षणमित्यर्थः ।

अर्थप्रकाश इति । यद्यपि यथाश्रुतं पर्यायत्वान्न लक्षणं, तथापि बुद्धित्वं जातिरनेनोपलक्षितम् । एतेन प्रकाशो यदि ज्ञानमात्रं तदा ज्ञानादिशब्दैरर्थनिरपेक्षैरपि बुद्धेः प्रतिपादनादसिद्धिः, अथ साक्षात्कारस्तदा निर्विकल्पकाव्याप्तिस्तस्यातीन्द्रियत्वादित्यपास्तम् । मिथ्या-

न्यायलीलावतीप्रकाशविवृत्तिः

तिव्याप्तिवारणाय । शब्दातिव्याप्तिवारणायाद्येति । अदृष्टेऽतिव्याप्तेः समवायिपदम् । सत्तामादायातिव्याप्तेराह गुणत्वव्याप्येति । साक्षात्पदं भेदलाभाय । गन्धसंयोगान्यतरत्वमादाय गन्धातिव्याप्तेराह जातीति । बुद्धेरपि विषय एव व्यावर्त्तक इत्यभिप्रायेणाह उत्पन्नमात्रेति । संयोगातिव्याप्तेराह मात्रेति । सुखसाक्षात्कारातिव्याप्तेराह कर्मेति । गुणवृत्तिपदं गुणवृत्त्या समवायेन व्याप्यत्वलाभाय । सत्तादावतिव्याप्तेराह गुणत्वव्याप्येति । भेदलाभाय साक्षादिति । विभागजविभागसङ्ग्रहाय जातिगर्भता । यद्यप्येवमपि वेगेऽतिव्याप्तिस्तथापि सकलकर्मजन्यो, विभागस्तु तथा, लक्षणं च तथा विवक्षितमिति भावः ।

एतेनेति । अर्थेन सहैव प्रकाश्यत इत्यत्रेति शेषः । वस्तुतो

द्या। सा च संशयाद्यात्मिका। कोटिद्वयानवधारणज्ञानं संशयः, स च बाह्यान्तरप्रकारवान्, न तु त्रिविधः पञ्चविधो वा लक्षणाभावात्। तत्र हि संशयमात्रं वा धर्मिविशेषो वा ?

न्यायलीलावतीकण्ठाभरणम्

विशेष्यावृत्तिप्रकारकं ज्ञानम्, व्यधिकरणप्रकारावच्छिन्नविषयताप्रतियोगिज्ञानं वा। विभागमाह सा चेति। संशयविपर्ययस्वप्नानध्यवसायलक्षणेत्यर्थः। केचित्तु द्येत्युपलक्षणम्, एकस्मिन् धर्म्मिणि विरोधिनानाप्रकारकं ज्ञानमित्यर्थः। बाह्यान्तरेति। बाह्यो यथा स्थाणुर्वा पुरुषो वेति, आन्तरः सम्यग्ज्ञानाम्यसम्यग् वा इत्याद्यात्मधर्मिकः। वार्त्तिकादिमतमाक्षिपति न त्रिविध इति। भाष्यमतमाक्षिपति न पंचविध इति। समानानेकधर्म्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्षः संशय इति गोतमीयस्य संशयलक्षणसूत्रस्य भाष्यकृता समानधर्म्मजत्वमसमानधर्म्मजत्वं विप्रतिपत्तिजत्वमुपलब्ध्यव्यवस्थाजत्वमनुपलब्ध्यव्यवस्थाजत्वं चेति पंचधा संशय इति व्याख्या कृता। वार्त्तिककारादिभिश्च उपलब्ध्यनुपलब्ध्यव्यवस्थयोः पूर्वपदविशेषणत्वेनाभिधानात् त्रिविधत्वमुक्तं तदुभयमप्यनुपपन्नमित्यर्थः।अ-

न्यायलीलावतीप्रकाशः

ज्ञानमिति। विशेष्यावृत्तिप्रकारकं ज्ञानमित्यर्थः। कोटिद्वयेत्युपलक्षणम्, लक्षणं च प्रतिपादितमधस्तात्। स चेति। मानसमात्रप्रत्यक्षविषयोधर्मी अन्तस्तदन्यद्बाह्यम्। त्रिविध इति। समानधर्मदर्शनजासमानधर्मदर्शनजविप्रतिपत्तिज इत्यर्थः। पंचविध इति। न्यायभाष्यकारोक्तोपलब्धिजानुपलब्धिजाभ्यां सह पूर्वोक्तस्त्रिविध इत्यर्थः। विशिष्योपस्थित एव धर्मिणि विशेषलक्षणप्रवृत्तेरित्यर्थः। संशयमात्रमित्यत्र यदि मात्र-

न्यायलीलावतीप्रकाशविवृतिः

बुद्धिप्रकाशपदद्वयवाच्यत्वमेव लक्षणम्, पिता नाम कुर्यादित्यत्र एकत्वस्य विवक्षितत्वेन शरीरविशेषे तथात्वाभावात्। यदि च प्रथमचरमाश्रमभेदेनापि नामभेदे ईश्वरसङ्केतस्तदा पदत्रयवाच्यत्वं लक्षणमिति रहस्यम्। मिथ्याज्ञानमित्यस्यालीकविषयकमित्यर्थकत्वभ्रमं निरासयति विशेष्येति। चतुष्कोटिकव्याप्तिभयादाह कोटिद्वयेति। मिथ इति। साधारणधर्मदर्शनजत्वादौ लक्षण इत्यर्थः।

नाद्यः । भागासिद्धेः[१] अभेदकत्वाच्च। नेतरः । तदनिरुक्तेः। उल्बणविधिकोटित्वं तथा निषेधकोटित्वं समकोटित्वं च विशेष इति परमन्यायाचार्या इति चेत् । न, वह्निमत्त्वभावाभावसन्दे-

न्यायलीलावतीकण्ठाभरणम्

नुपपत्तिमेवाह तत्र हीति । भागासिद्धेरिति । समानधर्म्मजत्वस्यासाधारणधर्म्मजसंशयभागेऽसिद्धेरित्यर्थः । अभेदकत्वाच्चेति । लक्षणं हि लक्ष्यस्य भेदकमितरव्यावृत्तत्वेन ज्ञापकं भवति, समानधर्म्मजत्वादिकं च संशयमात्रमितरेभ्यो न व्यावर्त्तयति किन्तु तद्विशेषमित्यर्थः । ननु विशेषलक्षणान्येव तानि सन्त्वित्यत आह नेतर इति । लक्ष्यतावच्छेदकानां विशेषाणामनिरुक्तेरित्यर्थः । उल्बणत्वं—प्रधानत्वं, तथाच विधिसाहचर्य्यात् समानो धर्म्मो विधिप्राधान्येनासाधारणश्च निषेध प्राधान्येन विप्रतिपत्तिस्तु विधिनिषेधोभयप्राधान्येन संशयविशेषं जनयतीत्यर्थः । परमन्यायाचार्य्याः—वाचस्पतिमिश्राः, टीकाकृतः ।

न्यायलीलावतीप्रकाशः

पदेन व्यक्तिविशेषो विवक्षितस्तत्राह भागासिद्धेरिति । अथ संशयत्वसामान्यं तदर्थस्तत्राह अभेदकत्वाच्चेति । संशयत्वस्य साधारण्येन त्रिविधः पंचविधो वेति विभागाबोधकत्वादित्यर्थः । उल्बणेति । साधारण धर्मस्योर्ध्वत्वादेः स्थाणुतदभावसाहचर्याविशेषेऽपि स्थाणुत्वाभावविशिष्टः पुरुषस्तदभावविशिष्टश्च स्थाणुः स्मर्यत इत्यभावस्य विधितैरश्चीन्येन विधेस्तत्प्राधान्येन संस्कारेणोपस्थापनम् , असाधारणधर्मजन्ये च संशये सजातीयविजातीयनिष्ठाभावप्रतियोगित्वमसाधारण्यमित्यभावस्य प्राधान्येन विधेरुपसर्जनतयोपस्थितिः, विप्रतिपत्तिजे तु शब्दो नित्यो नाऽनित्योऽनित्यो न नित्य इति विप्रतिपत्ते-

न्यायलीलावतीप्रकाशविवृतिः

भागासिद्धेरितीति । यदि व्यक्तिविशेष एव धर्मी लक्ष्यस्तदा तदन्यभागस्य लक्ष्यतयाऽसिद्धेस्तत्रातिव्याप्तिरित्यर्थः । संशयत्वस्येति । साधारणधर्मजत्वादौ लक्षणे संशयमात्रस्य लक्ष्यत्वे संशयत्वस्य सार्वत्रिकतया तस्यापि सार्वत्रिकत्वमन्यथा भागासिद्धेरिति कुतस्त्रैविध्यादिरित्यर्थः । साधारणेति । तथा च परव्यावृत्त-

(१) सिद्धत्वादि मु. पु. पाठः ।

हेऽतिरिक्तकोटेरसत्त्वात्[१]। तत्रैवोल्लणत्वानुल्लणत्वे इति चेत् । न । प्रमेयत्वादौ कस्यचिद्वह्निविरहसाहचर्यस्यैव भूयस उपलम्भात् हस्तसमाचरितत्वात् । विलक्षणकारणोपलक्षितेऽवान्तरजातिभेदोऽस्तीति चेत् । न, तस्य साक्षात्कारित्वादिना परापरभावाभावप्रतिक्षिप्तत्वात् । अवच्छेदकाभावादेव न घटाभावादिवदु-

न्यायलीलावतीकण्ठाभरणम्

इदं वह्निमन्नवेत्यत्र कोटिचतुष्टयाभावान्नोभयविधिप्राधान्यमित्यर्थः । तत्रैवेति । कोटिद्वय एवेत्यर्थः । वह्निभावाभावकोटिकसंशये प्रमेयत्वादिः साधारणो धर्मो वाच्यस्तत्र च साहचर्यबाहुल्यं पुरुषभेदेनानियतमिति संशयव्यवस्थापत्तिरित्याह प्रमेयत्वादाविति । ननु कारणव्यंग्यः संशये जातिभेदोऽस्तु प्रत्येकं लक्ष्यतावच्छेदक इत्याह विलक्षणेति । तस्येति । चाक्षुषत्वादिना परापरभावानुपपत्त्या नैवमित्यर्थः । साक्षात्त्वादित्यतद्गुणसंविज्ञानो बहुव्रीहिः, सत्प्रतिपक्षस्थले द्वाभ्यां हेतुभ्यां मिलित्वा संशयरूपानुमितिर्जन्यत इति मतमाश्रित्य वा । ननु घटाभावत्वं यथोपाधिसामान्यं तथा प्रकृतेऽपि सामान्यत्रयमस्तु लक्ष्यत्रयभेदकमित्यत आह अवच्छेदकेति । अवच्छेदकविशेषाभावे सा-

न्यायलीलावतीप्रकाशः

रूपस्थितयोर्विधिनिषेधयोः प्राधान्यमिति रूपान्तरेणोपस्थिते धर्मिविशेषे विशेषलक्षणविधानमित्यर्थः । तत्रैवेति । वह्निमत्त्वभावाभाव एवेत्यर्थः । विलक्षणेति । यद्विशिष्टे संशये समानधर्मदर्शनादेः कारणत्वं स जातिविशेषः कारणविशेषव्यङ्ग्योऽस्तीति तद्वानेव धर्मी संशयविशेषलक्षणेऽस्त्वित्यर्थः । तस्येति । साक्षात्कारित्वमत्र चाक्षुषत्वोपलक्षणं शब्दलिङ्गादेरसंशायकतया साक्षात्कारित्वव्याप्यत्वे जातिविशेषस्य दोषाभावात् । ननु जात्यात्मकसामान्याभावेऽपि उपाधिरूपसामान्यं घटाभावत्वादिवत्स्यादित्यत आह अवच्छेदकेति । यथा घटनिरूप्योऽ-

न्यायलीलावतीप्रकाशविवृतिः

मेव लक्ष्यतावच्छेदकमिति नोक्तदोष इति भावः । चाक्षुषत्वो-

(१) रभावात इति भा० पु. पाठः ।

पाधिसामान्यम् । तथापि समानधर्मादिदर्शनं कथं हेतुतया व्यवतिष्ठेतेति चेत्, सत्यम् । किन्तु कोटिद्वयाविज्ञाप्तिरस्य कारणम् । सा च स्मृतेर्वाक्याद्वा । स्मृतिश्च समाधर्मदर्शनादन्यतो वेति

न्यायलीलावतीकण्ठाभरणम्

ध्येऽवच्छेदसामान्याभावो हेतुरिति न साध्याविशिष्टत्वम्, उपाधिरव्य-वच्छेदको यदवच्छेदेन वर्त्तते तन्नास्तीति वाऽर्थः । नन्वन्वयविशेष-गम्यं साधारणधर्म्मदर्शनानामननुगमात् संशयकारणत्वं न स्याद्यदि कार्य्ये जातिविशेषो न स्यादित्याह तथापीति । कोटिस्मरणं च विशे षादर्शनं च संशयकारणं, तच्चानुगतमेव, साधारणधर्म्मदर्शनादि तु तत्रोपक्षीणमिति नाननुगम इत्याह सत्यमिति । ननु तृणादयो विशेषा

न्यायलीलावतीप्रकाशः

भावो घटाभावस्तथात्र निरूपको नास्तीत्यर्थः । नन्वत्रोपाध्यभावे साध्येऽवच्छेदकाभावादिति साध्याविशिष्टो हेतुः परम्परासम्बद्ध-स्यैवावच्छेदकत्वात् तस्यैवोपाधिपदार्थत्वात् । अत्राहुः । उपाधिप-देनात्र प्रवृत्तिनिमित्तरूपो विशेषो विवक्षितः, तथाच तस्यावच्छेदक विशेषस्याभावे साध्येऽवच्छेदकसामान्याभावो हेतुः । ननु यदि सं-शयेऽवान्तरविशेषो नास्ति तदा व्यभिचारात् सामानधर्मादिदर्शन-स्य तत्र कारणतापि न स्यादिति कारणविशेषव्यङ्ग्यो जातिविशेषः संशये मन्तव्य इत्याह तथापीति । साधारणधर्मदर्शनं न संशयहेतुः तस्य कोटिस्मरण एवोपक्षयात्, अत एव क्वचिददृष्टादपि कोटिस्म-स्मरणे संशय इत्याह किन्त्विति । अस्य संशयस्येत्यर्थः । असाधारण-धर्मोऽनध्यवसायमात्रजनकोऽत्र दर्शने संशयहेतुरेव न भवतीति भा-वः । यद्यपि स्मृतिरपि ज्ञप्तिरेव तथापि ज्ञप्तिसामान्ये तद्विशेषस्य हेतुत्वमभिप्रेत्याह सा चेति । अन्यतो वेति । न्यायदर्शनाभिप्रायेणो-क्तम्, असाधारणधर्मस्यात्र दर्शनेऽनध्यवसायमात्रजनकत्वात् । पर-म्परयेत्यन्वयव्यतिरेकानुविधानमपि समानधर्मदर्शनस्य समर्थितम् ।

न्यायलीलावतीप्रकाशविवृतिः

पलक्षणं चाक्षुषत्वाद्युपलक्षणमित्यर्थः । इतोपि संशयत्रैविध्यमयुक्त मित्याह असाधारणधर्म इति । हेतुद्वयमभिप्रेत्य उपचर्य, तथाच सुवर्णेन धनीतिवदौपचारिकः प्रयोग इत्यर्थः । असाधारणेति । विप्रतिपत्तिस्तु

परम्परया व्यवास्थितिः। न च विशेषा विशेषे व्यवतिष्ठन्ते। तस्यैव प्रतिक्षिप्तत्वात् कर्तृकार्यवत्। एककोट्यवलम्बि जाग्रतो मिथ्याज्ञानं विपर्ययः(१)। निद्राभिभूतज्ञानं स्वप्नः। किमिति-

न्यायलीलावतीकण्ठाभरणम्

यथा वह्निविशेषे व्यवतिष्ठन्ते तथा प्रकृतेऽपि स्यादित्यत आह नचेति। तत्राननुगतानां समानधर्म्मत्वादीनां कारणत्वमेव नास्ति तेन विशेषकल्पनापीत्याह तस्यैवेति। कर्तृकार्य्यवदिति। यथा कार्य्यत्वावच्छेदेनैव कर्तृजन्यत्वं तथा संशयत्वावच्छेदेनैव समानधर्म्मदर्शनजत्वं न तु विशेषकल्पनेत्यर्थः। असाधारणधर्म्मविप्रतिपत्त्योः संशयकारणत्वानभ्युपगमादिति भावः। एकेति। संशयस्वप्नज्ञानयोर्व्यवच्छेदाय विशेषणद्वयम्। निरिन्द्रियप्रदेशे मनसोऽवस्थानं निद्रा। तदनेन स्वप्नत्वं जातिमुपलक्षयति सा चाध्यक्षैव। किमिति। किमितिविशेषानुल्लिखि-

न्यायलीलावतीप्रकाशः

न च यत्रकोटिद्वये साक्षात्क्रियमाणे एव धर्म्यन्तरे समानधर्मदर्शनात्संशयस्तत्र समानधर्मदर्शनस्य न कोटिस्मारकत्वमिति पृथगेव तत्संशयकारणं स्यादिति वाच्यम्। तत्रापि विशेषादर्शनकोटिद्वयोपस्थित्योरेव संशयकारणत्वात्,क्वचिददृष्टादपि कोटिस्मरणे संशयदर्शनादुक्तप्रकारबहिर्भावापत्तेश्च। कर्तृकार्यवदिति। यथा कार्यत्वात्सकर्तृकत्वानुमाने कर्तृकार्ये घटादौ विशेष उपाधिरूपः प्रतिक्षिप्तस्तथा संशयेपीत्यर्थः। निद्रेति। अनुभवसिद्धज्ञानगतजातिविशेषोपलक्षणमिदम्। किमितीति। यद्यपि यथाश्रुतं नाविद्यात्वे प्रयोजकं तथाप्यनुल्लिखित-

न्यायलीलावतीप्रकाशविवृतिः

वाक्यपदेनैवोक्तेति भावः। वस्तुतो मूलेऽपि वाक्यादिति न्यायदर्शनाभिप्रायकविप्रतिपत्तिरपि वैशेषिकानां न संशयहेतुरिति प्रागावेदितत्वात्। तत्रापि-विशेषादर्शनेऽपि। न च तस्मिन्सत्यपि धर्मिनि यामिकत्वेन समानधर्मवद्धर्मिज्ञानस्य संशयकारणत्वमिति वाच्यम्। समानधर्मदर्शनस्य कोट्यनिश्चय एवोपक्षयात् कोट्यनिश्चयस्यैव नियामकत्वाददृष्टजन्यकोटिस्मृतिस्थले व्यभिचारेण समानदर्शनस्याकारणत्वादिति भावः। निद्रेतिलक्षणं कार्यतावच्छेदकजात्यपरिचये दुर्ज्ञेयमित्यत आह अनुभवसिद्धेति। अनुल्लिखितेति। विशेषतोऽनुल्लि-

(१) भ्रमइति प्रा. पु. पाठः।

वस्तुमात्रालोचनमनध्यवसायः ।

सत्यज्ञानं विद्या । तच्च स्मृत्यनुभवभेदि । तत्रान्त्यस्य प्रमात्वम् । सत्योऽनुभवः प्रमा । सत्यत्वं न ज्ञानजातिः, साक्षात्कारित्वेन परापरभावानुपपत्तेः । नच विषय[धर्म]भेदः, सर्वसाधारण्यात् । न ज्ञानवदुपाधिः, तदभावात् । न(च) वस्तुस्वरू-

न्यायलीलावतीकण्ठाभरणम्

तनानाकोटिकं ज्ञानमित्यर्थः ।

सत्यज्ञानमिति । विशेष्यावृत्त्यप्रकारकं ज्ञानं, व्यधिकरणप्रकारानवच्छिन्नं ज्ञानं वेत्यर्थः । तच्चेति । सत्यज्ञानमित्यर्थः । सत्योऽनुभव इति । यथार्थोऽनुभव इत्यर्थः । सत्यत्वमिति । प्रमात्वमित्यर्थः । साक्षात्त्वस्य व्यापकत्वेऽनुमितिः प्रमा न स्यात्, व्याप्यत्वे च भ्रमः प्रमा स्यादित्यर्थः । न च जातिरव्याप्यवृत्तिर्येन एकमेव ज्ञानं प्रमाऽप्रमा वा भवेदिति भावः । ननु विषयगतं सत्यत्वं धर्मो न उपाधिः स्यात्तत्र च परापरभावाभावो न दोषायेत्यत आह न चेति । सर्वसाधारण्यादिति । तर्हि चैत्रज्ञानसत्यत्वं मैत्रेणापि गृह्येत विषयगतस्य धर्मस्य साधारण्यादिति प्रसङ्गपरं, भ्रमसाधारण्यापत्तिर्वा । ननु यथाऽज्ञातो ज्ञानघटितोऽपि घटविषयक उपाधिरसाधारणस्तथा विषयगतोऽप्यसाधारण एव कश्चिद्धर्मः सत्यत्वं येन स्वतःप्रामाण्यं स्यादित्यत आह न च ज्ञानवदिति । तदभावादिति । विषये तादृशधर्माननुभवादित्यर्थः । पूर्वदोषं विस्मृत्य शङ्कते नचेति । ज्ञाने यत् सत्यत्वं तद्

न्यायलीलावतीप्रकाशः

नानाप्रकारकविरुद्धकोट्युल्लेखि ज्ञानमित्यत्र तात्पर्यम् ।

परापरेति । संशयादीनां धर्म्यंशेऽपि प्रमात्वाभावापत्तेः, जातेर्व्याप्यवृत्तित्वेनांशे तदवृत्तेरित्यपि मन्तव्यम् । न विषयेति । विषयस्य सत्यत्वं धर्मस्तद्विषयकत्वात् ज्ञानमपि सत्यमिति न, धर्मस्यापि तद्विषयत्वेन सत्यत्वप्रसङ्गादित्यर्थः । न ज्ञानवदिति । यथा ज्ञातो घट इति व्यवहारे ज्ञानमन्यधर्म एव घटेऽप्युपाधिस्तथात्र न सत्यत्व-

न्यायलीलावतीप्रकाशविवृतिः

खितनानाकोट्यवगाहिज्ञानं संशय इत्यर्थः ।

परापरभावानुपपत्तेरिति मूलम् । समानाधिकरणजात्योः परस्पराव्य-

पम् , स्वतःप्रामाण्यापत्तेः । अनन्यात्मत्वमन्यतादात्म्यनिषेध इति चेत् । न । नारजतमिति ज्ञप्तेः स्वतःप्रामाण्यापत्तेः । घटोऽयमिति ज्ञानादेः सत्यविषयतानुपपत्तेरसङ्गतमिति चेत् । न, परानात्म-

न्यायलीलावतीकण्ठाभरणम्

यदि विषयस्वरूपमेव तदा विषयस्वरूपग्राहकेण ज्ञानेन स्वस्य सत्यत्वं ज्ञातमेवेति स्वतःप्रामाण्यापत्तिरित्यर्थः । ननु नार्थस्वरूपं सत्यत्वं येन स्वतःप्रामाण्यं स्यात् , किन्तु अनन्यात्मकत्वं विषयधर्म्मः, न च सोऽनेन न गृह्यते येन स्वतःप्रामाण्यं स्यादित्याशङ्कते अनन्येति । तदनन्यं विवृणोति अन्यतादात्म्यनिषेध इति । एवं सत्यनन्यात्मकत्वग्राहिणो नारजतमिति ज्ञानस्य स्वतःप्रामाण्यं स्यादिति परिहरति नारजतमितीति । किञ्चान्यतादात्म्याविषयकं ज्ञानं प्रमा न स्यादित्याह घटोऽयमिति । असङ्गतमिति । सत्योऽनुभवः प्रमेति लक्षणमसङ्गतमित्यन्वयः । परानात्मकतयेति । परो विशेषादन्यो रजतादिस्तदनात्मकतयेत्यर्थः । तथाच विशेषादन्यत्र रजतादितदात्मतया शुक्त्यादेर्ज्ञानं भ्रमः

न्यायलीलावतीप्रकाशः

मित्यर्थः । तदभावात्—सत्यत्वस्यान्यधर्मस्याभावादित्यर्थः । स्वत इति । स्वतःप्रामाण्यं गृह्यतेत्यर्थः । अनन्यात्मत्वविवरणमन्यतादात्म्यनिषेधः । तदेव सत्यत्वमतो न स्वतःप्रामाण्यापत्तिः विषयस्वरूपावगाहिना ज्ञानेन तदग्रहादित्यर्थः । नारजतमितीति । तया विषयेऽन्यतादात्म्यनिषेधस्यावगाहनादित्यर्थः । घटोयमितीति । तस्यान्यतादात्म्यनिषेधाविषयत्वादित्यर्थः । असङ्गतं, सत्योऽनुभवः प्रमेति लक्षणमिति शेषः । परानात्मकतयेति । परात्मकत्वं परनिष्ठान्योन्याभावाप्रतियोगिता विषयस्य सा यत्र ज्ञाने न भासते तत्प्रमेत्यर्थः । न चैवं स्वतःप्रामाण्यापत्तिः, यदि हि प्रकाशमाना परानात्मकतोपाधिः स्यात् तदा स्वप्रकाशतापत्तिः, नचैवं स्वरूपसत्या एव तस्या उपाधिभा-

न्यायलीलावतीप्रकाशविवृतिः

न्ताभावसामानाधिकरण्यानुपपत्तेरित्यर्थः । परनिष्ठेति । पराभेदो विशेष्यभिन्नाभेद इति यावदित्यर्थः । परनिष्ठेति । एवञ्च स्वतःप्रामाण्यापत्तिर्नेति पराभेदाविषयत्वाभावस्य स्वरूपसत एव ज्ञानवृत्तेः प्रामाण्यशरीरत्वादित्याह नचैवमिति । नन्वेवं परानात्मकतयेति प्रकारवा-

कतयाऽनुभवस्य तादृशत्वात् । न च स्वतःप्रामाण्यापात्तिः, परात्मतानुभवसन्देहात् । न च सावधारणेन घट एवेत्यनेना-

न्यायलिलावतीकण्ठाभरणम्

तदन्यज्ञानं प्रमेति भावः । परानात्मकत्वमनुभवस्य प्रकार एव विव-क्षित इति भ्रान्तस्य शङ्कामपनयति नचेति । परात्मतया अनुभवात् भिन्नोऽयमनुभवो नवेति सन्देहसत्त्वात् कथं स्वतस्त्वमित्यर्थः । ननु घट एवायमित्यनुभवस्य नायमघट इत्याकारपर्य्यवसन्नस्यानुव्यव-सायेन प्रामाण्यग्रहे स्वतस्त्वं स्यादेवेत्यत आह नचेति । संशयान्यथा नुपपत्त्यैव तत्रापि प्रामाण्यनिश्चय इत्यर्थः । शङ्कितभ्रमबीजमाशंक्य

न्यायलालीवतीप्रकाशः

वात् । न च परानात्मकतयेति तृतीया प्रकारे, किन्तूपलक्षणे, तथा-च परात्मकतयोपलक्षितस्य वस्तुतोऽनुभवः प्रमा । न च घटपटा-विति समूहालम्बने घटादन्यः पटस्तदात्मतया पटस्य भासनाद्भ्र-मत्वापत्तिः, यत्र हि ज्ञाने परात्मना परस्य विशेषणं भासते स भ्रमो, न च समूहालम्बने पटात्मता घटस्य विशेषणं भासते पटात्मतया घटो ज्ञात इत्यनुव्यवसायाभावात् । वस्तुतो यत्र यदस्ति तत्र तस्य ज्ञानं प्रमेत्युक्तमिति न समूहालम्बनस्य भ्रमत्वमिति भावः। परात्मतेति । किमयं परात्मतया लक्षितो न वेति सन्देहादित्यर्थः । ननु यत्र घट एवायं नाघट इत्यनुभवस्तत्र घटस्य परानात्मकतया भासनात् स्वतः-

न्यायलीलावतीप्रकाशविवृतिः

चितृतीयानुपपत्तिरित्यत आह नच परेति । परानात्मकतयेति । परानात्म-कता च ज्ञानवृत्तिरेव परम्परया वस्तुलक्षणमतो न पूर्वविरोध इत्य-वधेयम् । यत्किञ्चिद्विशेष्यभिन्नादभेदः समूहालम्बनेऽपि भासत एवे-त्यभिप्रायेण शङ्कते न च घटपटाविति । तद्भिन्नाभेदविषयकत्वाभावः तदंशे न प्रामाण्यमित्यभिप्रायेण परिहरति यत्र हि ज्ञान इति । विशेषणं प्रतियोगित्वादिसम्बन्धनिरूपकं वैशिष्ट्यमिति यावत् । उक्तलक्षणं सं-सर्गारोपेऽतिव्याप्तमित्यरुचेराह वस्तुत इति । यत्र विशेष्ये यादृशं वैशि-ष्ट्यं तत्र तद्विषयकमित्यर्थः किमयमिति । स्वभिन्नाभेदविशिष्टोऽनुभ-वविषयोऽन्यादृशो वेति संशयाकारो द्रष्टव्यः । ननु यत्रेति । तत्र घट-

तिप्रसक्तिः । निश्चयानुपपत्तेः । न च परात्मताप्रतिषेधवत्तयाऽनुभवः सत्यत्वम् । घटोऽयमित्यव्याप्तेः । किन्तु परात्मतया-(१)नुपलम्भः । अत एव च प्रामाण्यनिश्चये तत्त्वव्यवस्थितिः तथा च तन्निश्चय इति निरस्तम् । प्रवृत्तिसामर्थ्यादेरेव तन्निश्चायकत्वात् । तत्साधकतमं च प्रमाणम् ।

न्यायलीलावतीकण्ठाभरणम्

निराकरोति नचेति । यदि प्रमायाः परानात्मकत्वं प्रकारः स्यात् तदा यत्र पटोऽयमित्यादौ स न प्रकारस्तत्र प्रमा स्यादित्यर्थः । किन्तु परात्मतयाऽनुपलम्भ इति । पर्युदासनञा परात्मतोपलम्भादन्य उपलम्भ इत्यर्थः । अत एवेति । यत एव परात्मत्वं वस्तुधर्म्ममभ्युपेत्य तत्प्रकारकं ज्ञानं प्रमेति नाचष्ट इत्यर्थः । तत्साधकतममिति । प्र-

न्यायलीलावतीप्रकाशः

प्रामाण्यापत्तिरित्यत आह नचेति । प्रथमतस्तादृशज्ञानसामग्र्यभावावादित्यर्थः । अव्याप्तिं परिहरति नचेति । किन्त्विति । वस्तुगत्या यः परात्मा तस्यानुपलम्भ इत्यर्थः । यथाश्रुते दोषस्योक्तत्वात् । ननु ज्ञानस्य प्रामाण्यनिश्चयादुक्तरूपतत्त्वविषयत्वनिश्चयस्तन्निश्चये च प्रामाण्यनिश्चय इत्यन्योन्याश्रय इत्यत आह अत एवेति । तत्साधकतममिति । कार्याव्यभिचारिव्यापारवत्त्वं तमबर्थः । यद्यपि व्यापाराद्यक्षणे चिरस्थिरत्वगिन्द्रियसंयोगे च सति फलाभावादिदमसिद्धं, तथापि कार्यसामग्रीव्याप्तव्यापारवत्त्वमर्थः । आद्यक्षणे व्यासङ्गे च फलाभावान्न

न्यायलीलावतीप्रकाशविवृतिः

भिन्नभिन्नत्वस्य विषयनिष्ठस्यानुव्यवसायेन ग्रहणान्नानुभवे घटभिन्नाभेदविषयत्वसन्देह इत्यर्थः । प्रथमत इति । उत्तरकालीनसंशयानुरोधेन स्वातन्त्र्येण घटभिन्नभिन्नत्वं विषयनिष्ठं नानुव्यवसायग्राह्यमिति कल्प्यत इति भावः । दोषस्योक्तत्वादिति । परानात्मकतया नानुभवस्येत्यादिमूलव्याख्यावसरेऽनुगत्येति शेषः । आद्यक्षण इति । कारणस्य कार्यपूर्ववर्त्तित्वनियमादिति भावः । चिरेति । व्यासङ्गात्फलाजनके इति शेषः । आशङ्कितदोषपरिहारायाह आद्यक्षण इति । तथा च य-

(१) त्मतानुपलंभ-इति प्रा० पु० पाठः ।

न्यायलीलावतीकण्ठाभरणम्

मासाधकतमत्वं प्रमारूपफलाव्यभिचारिव्यापारवत्त्वं, तच्च सामग्रीव्याप्यव्यापारवत्त्वं, तेन चिरस्थिरेन्द्रियसन्निकर्षे फलाभावे नासिद्धिः।

परामृष्यमाणस्येश्वरस्य श्रोत्रस्य च शब्दप्रागभावसाक्षात्कारकरणत्वमिति चायोगव्यवच्छेदेन सम्बन्धिकरणमित्याभिप्रेतम्।

न्यायलीलावतीप्रकाशः

सामग्री। न च हस्ताद्यव्याप्तिः, फलाव्यवहितपूर्वक्षणवर्त्तिज्यालानादिव्यापारवत्त्वस्य हस्ते भावात्। अनुमतौ तु लिङ्गपरामर्षजनकव्याप्तिस्मृतिः करणं, परामर्षस्तद्व्यापारः, व्यापारत्वं च तज्जजनकत्वे सति तज्जन्यत्वं, शब्दतद्ध्वंसप्रत्यक्षयोः शब्द एव श्रोत्रव्यापारः, शब्दप्रागभावप्रत्यक्षे तु कर्णशष्कुलीसंयोगो व्यापारः।

ननूक्तलक्षणान्नेश्वरस्य स्वज्ञानं प्रति करणत्वमित्याप्तप्रामाण्यादित्यादौ शास्त्रे कथं तस्य प्रमाणत्वव्यवहार इत्याशङ्क्याह

न्यायलीलावतीप्रकाशविवृतिः

स्यापि व्यापारस्याद्यक्षणे दैवात्सामग्री नास्ति तत्राप्युत्तरकाले सामग्र्यस्त्येवेति स्वाधिकरणकाले सामग्र्यावश्यकत्वरूपा सामग्रीव्याप्तिस्तत्रापि व्यापारे, एवं चिरस्थायित्वागिन्द्रियसंयोगेऽपीति, एवं चाद्यक्षणे व्यासङ्गे च न परं सामग्री तदव्यवधाने फलाभावादुत्तरकालं चास्त्येव सेत्यक्षरार्थः। न च यत्रोत्तरकालमपि दैवान्न सामग्री तदव्याप्तिः, फलोपहितस्यैव लक्ष्यतया दोषाभावात्। केचित्तु प्रतिबन्धकसत्त्वे परं न सामग्री, तथा च प्रतिबन्धकभावातिरिक्तकारणवर्गव्याप्तव्यापारत्वमेव लक्षणं, व्याप्तिश्च स्वाधिकरणकालावच्छेदेनावश्यकत्वमेवेति भाव इत्याहुः। फलाव्यवहितेति। न च स व्यापारः कर्त्रादेरपीत्यतिव्याप्तिरिति वाच्यम्। तेन रूपेण कारणव्यवहारस्य तत्रेष्टत्वादिति भावः। ननु व्यापारवत्त्वं करणलक्षणं साक्षात्कारकारण श्रोत्रेऽव्याप्तं इन्द्रियान्तरस्य हि सन्निकर्षो व्यापारः न चात्र तथा समवायात्मकसन्निकर्षत्वादत आह शब्दतद्ध्वंसेति। न च ध्वंससाक्षात्कारे शब्दो न व्यापारः प्रतियोगिध्वंसयोरेकत्राजनकत्वात् इति वाच्यम्। उक्तनियमस्याप्रयोजकत्वात्। घटतदत्यन्ताभावयोः समूहालम्बनजनकत्ववत् प्रतियोगिध्वंसयोरेकत्र जनकत्वसम्भवात्। कं

अन्ये त्वीश्वरप्रमाणत्वसङ्ग्रहार्थं कारकाकारकसाधारणं त-दयोगव्यवच्छेदं निमित्तमङ्गीकुर्वते। अनाद्यबाध्यप्रमाणशब्दवा-च्यता तूपेक्षणीया। प्रमिते(१)रपि तत्प्रवेशापत्तेः। आयाममाने

न्यायलीलावतीकण्ठाभरणम्

मासर्वमाचार्य्यसम्मतेत्याह(?) अन्ये त्विति। प्रमितेरपीति। प्रमाणभावव्यु-त्पत्तिमाश्रित्येति भावः। आयामेति। प्रादेशद्वयमित्यस्य प्रमाणं परि-कल्पितं 'प्रमाणे द्वयसज्'इत्यादौ परिमाणेऽपि तत्पदप्रयोगादित्यर्थः।

न्यायलीलावतीप्रकाशः

अन्ये त्विति। यद्यप्येतदिन्द्रियादावपि नास्ति उत्पत्तिकाले प्रमितेर-योगादित्यव्याप्तिरीश्वरप्रमापरम्परासम्बन्धः कालादावपीत्यतिव्या-प्तिश्च, तथापि स्वात्यन्ताभावासमानाधिकरणो यः प्रमितेः स्वकार-णेन सम्बन्धः तद्वत्त्वमेव करणत्वम्, अस्मदाद्यात्मना स्वकारणेन यः प्रमितेः समवायसम्बन्धः स एवेश्वरेणापीति तस्यापि प्रमाणत्वम्, का-लादौ च स नास्तीति नातिव्याप्तिः। इन्द्रियादिषु तु स्वात्यन्ताभा-वसमानाधिकरणप्रमितिसम्बन्धव्यतिरेकात्। प्रमितेरपीति। भावव्यु-त्पन्न(२)प्रमाणपदवाच्यत्वस्यापि तत्र सत्त्वादित्यर्थः। आयामेति। "प्र-

न्यायलीलावतीप्रकाशविवृतिः

च्चित्तु शब्दनाशक एव शब्दः पूर्वशब्दध्वंससाक्षात्कारव्यापारः तस्य ध्वंसद्वारा जनकत्वसम्भवादित्याहुः। तदयुक्तम्। तस्य ध्वंसेनान्य-थासिद्धतया तत्साक्षात्कारजनकत्वे मानाभावादन्यथा मुद्गरपातादे-रपि घटध्वंसप्रत्यक्षजनकतापत्तेरिति। वस्तुतः कर्णशष्कुलीसंयोगः श्रोत्रमनःसंयोगो वा सर्वत्र श्रोत्रजव्यापार इति रहस्यम्।

परम्परासम्बन्ध इत्युपलक्षणम्, विषयविषयिभावोऽपि द्रष्टव्यः। तथापीति। अत्राद्यं स्वपदं सम्बन्धपरं द्वितीयं प्रमापरं, तेनेन्द्रियादौ सम्बन्धान्तरावच्छिन्नप्रमात्यन्ताभावमादाय नातिव्याप्तिः। स एवेति। समवायस्यैकत्वादिति भावः। कालादौ च यद्यपि कारणत्वं समवायश्च काले वर्त्तत एव तथापि विशिष्टस्तत्र नास्ति तत्र तदत्यन्ताभावस्यापि विद्यमानत्वादित्याशयः। इन्द्रियादिष्विति। तत्र कारणतालक्षणसम्ब-

---

(१) प्रतीतेरिति प्रा० पु० पाठः, (२) करणव्युत्पन्नेति वि० संमतं पाठान्तरम्।

चातिप्रसक्तेः । वाच्यतयाऽयोगव्यवच्छेदोपलक्षणत्वे तु धन्ध-नापत्तेः । प्रमेयादौ च कथं साधकतमत्वाभावावधारणम् स्वप्रमायां परप्रमायां च निश्चेतुमशक्यत्वात् ।

न्यायलीलावतीकण्ठाभरणम्

यत्र प्रमाणपदवाच्यत्वस्यायोगव्यवच्छेदस्तत् प्रमाणं प्रमितौ माने च तदयोगोऽपि भावव्युत्पत्तिमजानतामित्याशङ्क्याह वाच्यतयेति । तत्राप्ययोगव्यवच्छेद एव प्रमाणपदवाच्यताया इति तद्व्यावर्त्तनं ध-न्धनमित्यर्थः। स्वप्रमायामिति । अस्यां प्रमायां प्रमेयं न करणमिति स्व-परप्रमयोर्ज्ञातुमशक्यमित्यर्थः । स्वप्रमा प्रमेयप्रमा तदन्यप्रमा वेति विकल्पार्थ इति केचित् ।

न्यायलीलावतीप्रकाशः

माणे द्वयसज्जद्घ्नञ्मात्रचः" इत्यादौ तस्यापि प्रमाणपदवाच्यत्वादि-त्यर्थः। धन्धनेति । तस्य साधारणत्वादित्यर्थः । स्वप्रमायामिति । स्वप्रमा-यां साधकतमत्वमिन्द्रियस्यापि नास्तीत्यव्याप्तिः, परप्रमासाधक-तमत्वं प्रमेयस्याप्यस्ति व्यापारबाहुल्यस्यैव तमबर्थत्वादित्यर्थः ।

न्यायलीलावतीप्रकाशविवृतिः

न्धस्य स्वात्यन्ताभावासामानाधिकरण्यादित्यर्थः । यद्यपि विष-यादावपि कारणतालक्षणसम्बन्धसत्त्वादतिव्याप्तिस्तेन रूपेण कार-णव्यवहारस्तत्रेष्ट एवोक्तमतानालम्बने तु कालादिवारणमप्ययुक्तं, तथापि स्वकारणत्वस्य स्ववृत्त्यनुभवत्वसाक्षाद्व्याप्यजात्याश्रयो या-वज्जन्यं तत्कारणेनेत्यर्थः, न च विषयस्तथा तस्य लौकिकसाक्षात्का-रमात्रकारणत्वात् । न च तथापि शरीरादावतिव्याप्तिः । शरीरेण जानीते इत्यादिप्रयोगदर्शनेन तस्य सङ्ग्राह्यत्वादिति । करणव्युत्पन्नेति । करणव्युत्पन्नप्रमाणशब्दवाच्यत्वविवक्षायामपि ईश्वरप्रमायामतिव्या-प्तेरित्यर्थः । तत्रापि व्यापारसम्भवादिति भावः । भावव्युत्पन्नेति तु पाठः सुगम एव । तस्य साधारणत्वादिति । प्रमाणशब्दवाच्यत्वायोगव्यव-च्छेदरूपलक्षणेऽपि पूर्वोक्तप्रसङ्ग एवेति भावः । केचित्तु अयोगव्यव-च्छेदोपलक्षणत्व इति मूलस्य प्रमायोगव्यवच्छेदोपलक्षणेत्यर्थ इति सत्त्वात्तस्य साधारणत्वात् कालादावतिप्रसक्तेरित्यर्थ इति व्याचक्ष-ते । स्वप्रमायामिति । स्वनिष्ठप्रमायामित्यर्थः । परप्रमेति । परनिष्ठप्रमा-

मैवम् । उक्तोत्तरत्वात् । लिङ्गस्य चास्मन्मतेऽकरणत्वात् । तच्चाध्यक्षमनुमानं च । साक्षात्कारिप्रमासाधकतममध्यक्षम् । तत्सविकल्पकादिभेदेन भिन्न(१)मित्युक्तम् । अनुमानं

न्यायलीलावतीकण्ठाभरणम्

उक्तोत्तरत्वादिति । इन्द्रियलिङ्गशब्दा नामयोगव्यवच्छेदेन सम्बन्धो न तु प्रमेयस्यापीति स्फुटमेवेति भावः । नन्वलिङ्गस्य धूमादेर्नायोगव्यवच्छेदेनानुमित्या सम्बन्ध इति लिङ्गं करणं स्यादित्यत आह—लिङ्गचेति(२) । स्वरूपसदिति शेषः । प्रमाणं लक्षयित्वा विभजते तच्चेति । साक्षात्करोमीत्यनुभवात् साक्षात्कारित्वं जातिः, सा चेश्वरप्रत्यक्षे धर्मिग्राहकमानसिद्धा । अविकल्पादीति । तदिति यदि साक्षात्कारिमात्रं

न्यायलीलावतीप्रकाशः

उक्तेति । अयोगव्यवच्छेदस्तमबर्थो न व्यापारबाहुल्यमिति न प्रमेयेतिव्याप्तिरित्यर्थः । नन्वेवमनुमितेः लिङ्गं करणं न स्यादित्यत आह लिङ्गस्य चेति । लिङ्गपरामर्षोऽनुमितिकरणं न लिङ्गं तत्र चोक्तनिमित्तमस्त्येवेत्यर्थः । साक्षात्कारीति । साक्षात्कारित्वं च साक्षात्करोमीत्यनुगतधीगम्यं सामान्यं चाक्षुषत्वादिव्यङ्ग्यम्, ईश्वरे च धर्मिग्राहकमानगम्यम् , न त्विन्द्रियजन्यत्वं साक्षात्कारिकारणस्यैवेन्द्रियतयाऽन्योन्याश्रयादीश्वरप्रत्यक्षाव्याप्तेश्च । अनुमानमनुमितेः करणमनुमितित्वं

न्यायलीलावतीप्रकाशविवृतिः

साधकतमत्वं प्रमेयस्यापि विषयरूपस्येत्यर्थः । यद्वा स्वप्रमायामित्यस्य स्वगोचरप्रमायामित्यर्थः । परगोचरप्रमाजनकत्वं प्रमेयस्यापि कालादेरित्यर्थः ।

अयोगेति । यद्यपि सर्वदा अयोगव्यवच्छेदो नेन्द्रियेऽपि कदाचिदयोगव्यवच्छेदः प्रत्ययेऽपि, तथापि स्वाधिकरणकालावच्छेदेन फलावश्यकत्वमेवायोगव्यवच्छेदः इन्द्रियसन्निकर्ष एव कारणमिति भावः । ननु स्मृत्यजनकज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वमिति नान्योन्याश्रय इत्यत आह ईश्वरेति । सामान्यलक्षणं विना न विशेषलक्षणावसर इत्यतः सामान्यलक्षणं पूरयति अनुमानमिति ।

(१) तच्चाविकल्पादिभेदाभिन्नमिति प्रा० पु० पाठः मिश्रसंमतश्च ।

(२) एतन्मतेनात्र लीलावत्यां लिङ्गञ्चास्म–णम्-इति पाठो द्रष्टव्यः ।

स्वार्थं परार्थं च । स्वार्थं व्याप्तिपक्षधर्मतासंवेदनम् । अनुमित्यौपयिकसमस्तरूपोपेतवस्तुवाचकं वाक्यं परार्थम् । वर्णपदा·

न्यायलीलावतीकण्ठाभरणम्

परामृष्यते तदाऽविकल्पकं सविकल्पकं चेति साक्षात्कारकतमपर्यन्तस्य तच्छब्देन परामर्शोऽविकल्पकादीत्यादिपदेनेन्द्रियसन्निकर्षयोरुपसंग्रहः । तत्र सविकल्पकं इत्यविकल्पकं तत्र चेन्द्रियामित्यर्थः । अनुमितीति । अनुमितिचरमकारणलिङ्गपरामर्षप्रयोजकशाब्दजनकवाक्यमित्यर्थः । समस्तरूपोपेतलिङ्गप्रतिपादकं वाक्यमिति वाऽर्थः । वस्तुवाचकमिति । लिङ्गप्रतिपादकमित्यर्थः । ननु न्यायः कथमनुमानं तस्यानुमित्यकरणत्वात् शब्दस्यानुमान एवान्तर्भावादिति चेत् । न,

न्यायलीलावतीप्रकाशः

च जातिविशेष इति सामान्यलक्षणमित्यभिप्रेत्य तत्र विभागमाह स्वार्थमिति । व्याप्तीति । पक्षधर्मस्य व्याप्तिविशिष्टज्ञानमित्यर्थः । अनुमितीति । अनुमितिचरमकारणीभूतलिङ्गपरामर्षप्रयोजकशाब्दज्ञानजनकं वाक्यं न्यायः, स एव परार्थानुमानमित्यर्थः । तथाहि प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते, तेन च विशिष्टवैशिष्ट्यावगाहि मानान्तरमुत्पाद्यते, तेन च चरमः परामर्ष उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य लिङ्गपरामर्षप्रयोजकता–वह्निव्याप्यवानयमिति वाक्यस्य लिङ्गपरामर्षप्रयोजकता, नतु तत्प्रयोजकशाब्दज्ञानप्रयोजकतेति न तत्रातिव्याप्तिः । एतेन वाक्यस्यानुमित्यजनकत्वात् कथमनुमानविशेषता । यदि च शब्दस्यानुमान एवान्तर्भावस्तदा घटमानयेत्याद्यपि वाक्यं परार्थानुमानं स्यात् । अथ परामर्षजनकतया लिङ्गस्यानुमानता परामर्षस्याव्यापारतया अनुमित्यकरणत्वात् वाक्यमपि तथेति तदप्यनुमानम्, तर्हीन्द्रियस्याप्यनुमानतापत्तिरित्यपास्तम् । वर्णेति । यया आकाङ्क्षया प्रतिज्ञादयः प्रयुज्यन्ते साऽऽकाङ्क्षा

न्यायलीलावतीप्रकाशविवृतिः

यद्यप्यनुमानं ज्ञानं न वाक्यविशेषात्मकम् , तथापि तादृशवाक्यप्रयोज्यपरामर्ष एव परार्थानुमानं, परत्वं च वाक्यप्रयोक्त्रपेक्षया । एतेनेति । न्यायप्रयोज्यपरामर्षपरपदार्थानुमानमिति तात्पर्यस्थलेत्यर्थः । परार्थानुमानं स्यादेति । वक्तृभिन्ननिष्ठपरामर्षजनकत्वाविशेषादिति भा·

तिरेकिण एकैकाकांक्षाविच्छेदकास्तदेकदेशा अवयवाः । पक्षवचनं प्रतिज्ञा । विशिष्टविभक्त्यन्तं लिङ्गवचनं हेतुः । दृष्टान्तवचनमु-

---

न्यायलीलावतीकण्ठाभरणम्

घटमानयेत्यादिवाक्यानामपि परार्थानुमानत्वापत्तेः । मैवम् । लिङ्गपरामर्शोऽनुमानं तत्प्रयोजकतया न्यायोऽपि अनुमानसङ्गतिपरप्रयोगात्। एकैकाकांक्षेति । पक्षसत्त्वसपक्षसत्त्वाद्याकाङ्क्षाविच्छेदात् हेत्वाकाङ्क्षाव्याप्त्याद्याकाङ्क्षाविच्छेदिका इति वार्थः । वस्तुपदयोरपि परम्परया तदस्तीति तत्रातिव्याप्तिः स्यादत उक्तं वर्णपदातिरेकिण इति । आकांक्षाविच्छेदकत्वं चावयवानां स्वस्वार्थप्रतिपादनद्वारा यद्यपि न्यायेऽप्येतदस्ति, तथाप्यनुमितिचरमकारणलिङ्गपरामर्षप्रयोजकशाब्दजनकवाक्यत्वमवयवत्वम् , प्रतिज्ञादिभिः प्रत्येकं स्वस्वार्थविशिष्टज्ञाने जनिते ततः पक्षसत्त्वं सपक्षसन् विपक्षासन्नबाधितोऽसत्प्रतिपक्षश्चेति विश्वस्यार्थं स्वयं मनसा परिच्छिनत्ति, एतदेव विशिष्टवैशिष्ट्यावगाहि मानमुच्यते, ततो वह्निव्याप्यधूमवानयमिति पक्षविशेष्यकश्चरमलिङ्गपरामर्ष उत्पद्यते इति भावः । पक्षवचनमिति । न च पक्ष इति पदेऽतिव्याप्तिः, हेत्वाविषयत्वे सति साध्यविषयन्यायावयवत्वस्य उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकन्यायावयवत्वस्य वा विवक्षितत्वात् । विशिष्टेति । पञ्चम्यन्तन्यायावयवत्वस्य साध्यविशेष्यकन्यायावयवत्वस्य वा विवक्षितत्वात् । दृष्टान्तेति । अन्वयव्यतिरेकान्यतरव्याप्त्युपदर्शकन्यायाव-

न्यायलीलावतीप्रकाशः

निश्चयजननद्वारा तैर्निराक्रियते इति तन्निश्चयजनकत्वमवयवत्वमित्यर्थः । तद्वर्णपदयोरप्यस्तीत्यत उक्तं वर्णपदेति । यद्यप्याकाङ्क्षाविच्छेदकत्वं न्यायस्याप्यस्ति तत्तदाकाङ्क्षाया अननुगतत्वात् तद्विच्छेदकत्वं चाननुगतम्, तथाप्यनुमितिचरमकारणलिङ्गपरामर्षप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकं वाक्यमवयवः, अत एव वह्निव्याप्यवानयमिति वाक्यावयवे नातिव्याप्तिः तदवयवेन परामर्षजनकस्य जननात् । पक्षेति । यद्यप्येतत् पक्षशब्दे निगमने चातिव्यापकम्, तथाऽवयवविभागावसरे निरुक्तं प्रतिज्ञालक्षणं द्रष्टव्यम् । विशिष्टेति । हेतु-

न्यायलीलावतीप्रकाशविवृतिः

वः । तथेति । परामर्षजनकत्वमित्यर्थः तन्निश्चयेति । तत्तदाकाङ्क्षानिव-

दाहरणम् । तस्य साध्ये उपसंहारः उपनयः । पुनः पक्षवचनं निगमनम् । वादादिकमन्यत्र । सुखादिपञ्चकस्य स्वस्वसामान्ययोगः । पतनासमवायिनिदानं गुरुत्वम् । द्रवत्वादीनां त्रयाणां

न्यायलीलावतीकण्ठाभरणम्

यवत्वं साध्यप्रतियोगिकसाधनानधिष्ठव्याप्त्युपदर्शकन्यायावयवत्वमन्वय्युदाहरणं, साधनाभावप्रतियोगिकसाध्याभाववन्निष्ठव्याप्त्युपदर्शकन्यायावयवत्वं व्यतिरेकोदाहरणत्वम्, तेन दृष्टान्तपदे नातिव्याप्तिः । दृष्टान्तवचनस्य सामयिकत्वेन तद्धीनोदाहरणे च नातिव्याप्तिः । तस्येति । हेतोरित्यर्थः । चरमलिङ्गपरामर्षान्यूनानतिरिक्तविषयकज्ञानजनकन्यायावयवत्वमुपनयत्वमित्यर्थः । पुनरिति । उपसंहृतहेतुप्रयुक्तत्वेन पक्षे साध्यवैशिष्ट्योपदर्शकन्यायावयवत्वं निगमनत्वम् । वादादिविलक्षणप्रणयने हेतुमाह—वादादिकमिति । समानतन्त्रमेव तद्ग्राह्यमित्यर्थः । सुखदुःखेच्छाद्वेषप्रयत्नानां सुखत्वादिकमेव लक्षणमित्याह—सुखादीति । द्रवत्वादीनामिति । द्रवत्वस्नेहसंस्काराणामि-

न्यायलीलावतीप्रकाशः

त्वप्रतिपादकेत्यर्थः । यथाश्रुतं घटात् रूपमित्यत्रातिव्याप्तमिति पूर्वनिरुक्तमेव हेतुलक्षणं ग्राह्यम् । एवमुदाहरणलक्षणं दृष्टान्तपदे न्यायं विना दृष्टान्ताभिधाने चातिव्याप्तमिति तदप्युक्तमेव ग्राह्यम् । तस्येति । साध्यव्याप्यसाध्याभावव्यापकाभावप्रतियोगिनोरन्यतरस्येत्यर्थः । तल्लक्षणमपि प्रागेव निरुक्तम् । पुनरिति । येन रूपेण प्रतिज्ञागतस्य साध्यभागस्य पूर्वमुपस्थितिस्तेनैव रूपेण तस्य पुनर्वचनमित्यर्थः । यथाश्रुतस्य स्वरूपासिद्धेः,तस्मादनित्य इत्यत्र निगमने पक्षस्य पुनरभिधानात् । वादादिकमिति । अन्यत्र न्यायनये व्युत्पादितमिति शेषः ।

न्यायलीलावतीप्रकाशविवृतिः

त्वकनिश्चयेत्यर्थः । व्यतिरेकिसाधारण्यार्थमाह साध्यव्याप्येति । तस्मादनित्य इति । यद्यप्यनित्य इति विशेषणं विशेष्यं विनाऽनन्वितमिति विशेष्यवचनमावश्यकं, तथाप्युपनयस्थनैवायमितिपदेनान्वयसम्भवान्न तद्वचनमपीति कथकसम्प्रदाय इति भावः । यथाश्रुतं सुखेति-

स्वस्वसामान्ययोगः । विधिभावनाहेतुक आत्मविशेषगुणो धर्मः । निषिद्धभावनाहेतुकश्चाधर्मः । श्रोत्रग्राह्योऽर्थः शब्दः । शास्त्र एव चैवमादि सुप्रसिद्धमित्यास्ताम् ॥

इति श्रीन्यायलीलावत्यां वैधर्म्यपरिच्छेदः समाप्तः ॥

न्यायलीलावतीकण्ठाभरणम्

त्यर्थः । विधिभावनेति । विहितयागादिगोचरः प्रयत्नो विधिभावना, एवं निषिद्धकलञ्जभक्षणादिगोचरः प्रयत्नो निषिद्धभावना, सुखासाधारणकारणत्वं धर्मत्वं, दुःखासाधारणात्मगुणत्वमधर्मत्वम् । श्रोत्रेति । श्रोत्रग्राह्यत्वं शब्दत्वादावतिव्याप्तमत अर्थ इति । वैशेषिकसमयेनार्थपदवाच्य इत्यर्थः । न चान्त्यशब्दाव्याप्तिः, श्रोत्रमात्रग्राह्यजातिमत्त्वस्य विवक्षितत्वात् । वैधर्म्यान्तरानभिधाने हेतुमाह शास्त्र एवेति । कणाहरदस्ये वादिविनोदे च लक्षणान्युक्तान्यतोऽत्रास्माभिरनुक्तानि ।

न्यायलीलावतीप्रकाशः

विधिभावनेति । गुणत्वव्याप्यातीन्द्रियजातिमत् सुखसाधनं धर्मः । एतदेव सुखपदस्थले दुःखपदप्रक्षेपेणाधर्मलक्षणम् । श्रोत्रेति । श्रोत्रमात्रग्राह्यजातिमानित्यर्थः । अतो न सत्तागुणत्वयोरतिव्याप्तिः, अन्त्यशब्दे च नाव्याप्तिः । उक्तवैधर्म्याणामनुपादाने हेतुमाह शास्त्र एवेति ॥

न्यायलालीवतीप्रकाशविवृतिः

व्याप्तमित्यन्यथा व्याचष्ट गुणत्वेति । अत्र मनस्यतिव्याप्तिवारणाय गुणत्वव्याप्येति, गुणत्वसमानाधिकरणेत्यर्थः । शब्दातिव्याप्तिवारणायातीन्द्रियेति । अन्यतरत्वमादाय मनस्येवातिव्याप्तिरिति जातिपदम् । भावनायामतिव्याप्तिरिति सुखसाधनमिति । न च सुखसाधनीभूत गुरुत्वेऽतिव्याप्तिस्तदन्यत्वेनापि विशेषणात्, लीलावतीकारमते तु तस्य त्वगिन्द्रियग्राह्यत्वादतीन्द्रियपदेनैव निरासः । एतदेवेति । अत्रापि गुरुत्ववारणं पूर्ववदेव । श्रोत्रमात्रेति । सत्तामादायातिव्याप्तिवारणाय मात्रपदं ग्राह्यान्तं च जातिविशेषणमन्यथाऽन्त्यशब्दाव्याप्तेस्तथाचास्तित्वशङ्कायोग्यमपि न भवतीति भावः ।

साधर्म्यस्यान्वयिहेतुत्वेनात्मतत्त्वावबोधकत्वात्तत्परिच्छेदोऽयमारभ्यते । षण्णामस्तित्वम् । किं तत् ? अस्तिशब्द(१)वाच्यत्वमिति चेन्न । अभावेऽपि तुल्यत्वात् । भावत्वे सतीति चेन्न ।

न्यायलीलावतीकण्ठाभरणम्

साधर्म्येति । इच्छा द्रव्याश्रिता गुणत्वादिति चतुर्विंशतेर्गुणानां गुणत्वं साधर्म्यमात्मसाधकम्, एवं वाक्यगतं वाक्यत्वं साधर्म्यं वेदपौरुषेयत्वसाधकम्, कार्य्यत्वं च क्षित्यादिसकर्तृकत्वसाधकम् । वैधर्म्यमपि कतिपयापेक्षया साधर्म्यं तदपि चात्मसाधकं, साधर्म्यान्तरस्य प्रसङ्गात् निरूपणपरम्परात्मसाधकतया वेति द्रष्टव्यम् । तत्र षण्णामस्तित्वमभिधेयत्वं चेति भाष्यमाक्षिपति किन्तदिति । यदपि पदार्था अस्तिपदवाच्या इति तत्पदवाच्यत्वमेवास्तित्वमित्याह अभावेऽपीति । अभावोऽस्तीति प्रयोगदर्शनादिति भावः । यदपि नैतदभाववैधर्म्यमपि तु षण्णां साधर्म्यमन्यथा

न्यायलीलावतीप्रकाशः

आत्मतत्त्वस्येति । यद्यप्यात्मविषयकानुमानस्यैव साधर्म्यस्यात्मतत्त्वज्ञानोपयोगित्वं न सर्वस्य, तथापि साक्षात्परम्परया च सर्वेषामेव तथात्वम् । अस्तिशब्देति । नन्वास्तिपदवाच्यत्वमस्तित्वस्य नार्थः त्वप्रत्ययस्य प्रवृत्तिनिमित्तस्यावाचकत्वात्, अस्तिशब्दवाच्यत्वस्य वाऽस्तिशब्दाप्रवृत्तिनिमित्तत्वात् । अत्राहुः । यद्यस्तिपदेनास्तिपदवाच्यत्वं लक्षणयोच्यते तदास्य पक्षस्य सम्भवः । अभावेऽपीति । भूतले घटाभावोस्तीत्यनुभवादित्यर्थः । यद्यपि षण्णामिदं साधर्म्यं न त्वभावापेक्षया वैधर्म्यम् अन्यथाऽभियत्वज्ञेयत्वयोरप्यस्य दोषस्यापत्तेः, षण्णामस्तित्वाऽभिधेयत्वज्ञेयत्वानीति त्रयाणां तुल्यवत्साधर्म्यरूपत्वेनाऽभिधानात्, तथाप्यभिधेयत्वज्ञेयत्वाभ्याम-

न्यायलीलावतीप्रकाशविवृतिः

सम्भव इति । प्रकृतिजन्य प्रतीतिप्रकारस्यैव त्वप्रत्ययवाच्यत्वादन्यथा दण्डत्वादावगतेरितिभावः । भूतल इति । अस्तीत्येवमाकारकस्याभिलापस्यानुभवादित्यर्थः । तथापीति । तथाचाभिधेय-

---

(१) अस्तीति शब्देति प्रा० पु० पाठः ।

तस्याप्यसिद्धेः । भावोऽयमितिबुद्धिविषयत्वं तदिति चेन्न । तस्याप्यनुगतस्यासिद्धेः(१), ज्ञातो भाव इत्यप्रत्ययाच्च । अभावव्यावृत्तत्वमस्तित्वमिति चेन्न । स्वरूपस्य व्यावृत्तत्वात् । तदभावयोगित्वस्य परस्पराभावरूपताऽनुवृत्त्वात् । एतेन विरोधित्वमपा·

न्यायलीलावतीकण्ठाभरणम्

अभिधेयत्वज्ञेयत्वाभ्यां सामानाधिकरण्यं न स्यात्, तथापि तयोरभाववैधर्म्यपरत्वेन व्याख्येयत्वादिति भावः । तस्यापीति । भावत्वस्यापीत्यर्थः । ज्ञात इति । यदि ज्ञानघटितं भावत्वं तदा ज्ञातो भाव इति सह प्रयोगो न स्यादित्यर्थः । स्वरूपस्येति । अभावव्यावृत्तत्वं यदि भावानां प्रत्येकं स्वरूपमेव तदाऽननुगम इत्यर्थः । व्यावृत्तत्वमननुगतत्वम् । तदभावेति । अभावाभावयोगित्वं यदि भावत्वं तदा भाववृत्तिरभावः स्यान्न तु भाव एव, तथाच भावाभावयोः परस्पराभावरूपता व्याहन्येतेत्यर्थः । एतेनेति । विरोधित्वस्य स्वरूपत्वेऽननुगमोऽभावाभावत्वे च परस्पराभावरूपताव्याघात इत्यर्थः । किञ्च भावत्वमपि

न्यायलीलावतीप्रकाशः

स्तित्वाभावासमानाधिकरणाभिधानविषयत्वज्ञानविषयत्वयोरत्र विवक्षेति मन्तव्यम् । भावत्वमात्रमेवाभावव्यावृत्तं साधर्म्यमिति व्यर्थविशेष्यत्वमिति दूषणे सत्येवाह तस्यापीति । तस्यापीति । ज्ञानार्थयोः स्वरूपातिरिक्तसम्बन्धाभावात्तयोश्चाननुगतत्वादित्यर्थः । बुद्धिविषयत्वान्तर्भावेण भावत्वे भावत्वग्रहे बुद्धिविषयत्वग्रहानियमात् सहप्रयोगः पृथक्धर्मद्वयानुभवश्च न स्यादित्याह ज्ञात इति । अभावव्यावृत्तत्वं घटादेः स्वरूपमननुगतमभावाभावस्य भावानतिरेकादित्याह स्वरूपस्येति । व्यावृत्तत्वादननुगतत्वादित्यर्थः । यदि चाभावाभावयोगित्वं भावत्वं तदा भावाभावाभ्यामतिरिक्तमभावाभाववत्त्वमुक्तं स्यात्, तथाच मिथोविरहरूपत्वं तयोर्व्याहन्येतेत्याह तदभावेति ।

न्यायलीलावतीप्रकाशविवृतिः

त्वज्ञेयत्वयोरप्यभावव्यावृत्तयोरेवात्र विवक्षेत्यस्तित्वेऽपि तद्व्यावृत्तिरावश्यकीति भावः । भावत्वमात्रमेवेत्यादिफक्किका द्वितीयस्य तस्यापीति मूलस्याभासः । अभावाभावस्येति । अभावान्यो·

---

(१) स्याभावात्-प्रा० पु० पाठः ।

स्तम् । अन्योन्याश्रयात्, तादात्म्याभावे तदभावाच्च । अन्यतायाः स्वरूपानतिरेकात् । अभावत्वस्य चानिरुक्तेः । नास्तितिबुद्धि(१)वेद्यत्वं तदिति चेत् । न । तस्या(अ)नुगतनिमित्तं विना

न्यायलीलावतीकण्ठाभरणम्

स्वाभावविरोधित्वं वाच्यं, तच्च तादात्म्याभावे विरोधिनिरूपके नास्ति तेन समं भावस्य सामानाधिकरण्यादित्याह तादात्म्येति । यद्वा यदि तादात्म्याभावे भावविरोधित्वं भवेत्तदा तत्प्रतियोगिनः सकलस्वाभावविरोधित्वं भवेत्तदेव तु नास्तीत्यर्थः । अभावान्यत्वमपि न भावत्वम्, अननुगमादित्याह अन्यताया इति । नन्वभावत्वावच्छिन्नप्रतियोगिकाऽन्योन्याभाववत्त्वमेव भावत्वं, तथाच नाननुगम इत्यत आह अभावत्वस्य चेति । यद्वा अभावविरोधित्वमप्यभावनिरूप्यं तदेव दुर्वचमित्यर्थः । यद्वा भावविरोधित्वं यद्यभावत्वं तदाऽन्योन्याश्रयः स्यात् प्रकारान्तरेणैवाभावत्वं निर्वाच्यमित्यत आह अभावत्वस्य चेति । अभावत्वं न दुर्वचमित्याह नास्तीति । विषयविशेषमन्तरेण बुद्धिविशेषोऽपि दुर्निरूप एवेत्याह नेति । नास्तीतिबुद्धिवेद्यत्वे-

न्यायलीलावतीप्रकाशः

विरोधित्वस्याप्यनुगतस्य निर्वक्तुमशक्यत्वेनाभावविरोधित्वं भावत्वमिति नेत्यर्थः । अभावविरोधित्वं यदि यत्किञ्चिदभावविरोधित्वं तत्राह अन्येन्येति । अभावनिरूपणाधीनतद्विरोधित्वरूपभावस्य प्रतियोगिदेशसमानकालतया न तेन यावदभावविरोधो निरूप्यत इत्यर्थः । ननु चाभावान्यतामात्रं भावत्वं न तु विरोधित्वं सतीत्यत आह अन्यताया इति । अभावादन्येषां घटादिस्वरूपाणामननुगमादनुगतभावव्यवहारानुपपत्तिरित्यर्थः । ननु न भावविरोधित्वमभावत्वं येनान्योन्याश्रयः स्यात्, किन्त्वन्यथा निर्वाच्यमत आह अभावत्वस्य चेति । तदितीति । अभावत्वमित्यर्थः । तस्या इति । बुद्धेरपि विशेषो विषयाधीन

न्यायलीलावतीप्रकाशविवृतिः

न्याभावस्याधिकरणात्मकत्वादित्यर्थः । यदि चेति । यद्यभावान्योन्याभावो भिन्नः स्वीकार्यस्तदा घटाभावान्योन्याभावोपि भिन्न इति भावाभावयोः परस्परविरहरूपताभङ्ग इत्यर्थः । तदान्योन्याभाव इति(१) ।

(१) नास्तीतिबुद्धि-प्रा० पाठः

असिद्धेः, ज्ञातत्वेनानुभवाच्च । नापि पारतन्त्र्येण निरूप्यत्वम् । सम्बन्धस्याभावत्वापत्तेः । नापि निषेध्यनिरूप्यत्वम् । अभाव-प्रतिपक्षस्य निषेध्यस्याभावनिरुक्तिं विनाऽनिरुक्तेः । स्वरूपसत्त्वस्य षष्ठीप्रथमाभ्यां विवेकानुपपत्तेः । सति(१)बुद्धि-

न्यायलीलावतीकण्ठाभरणम्

दभावत्वं तदा ज्ञातत्वेनैवानुभूयेतेत्याह ज्ञातत्वेनेति । ज्ञातोऽभाव इति सहप्रयोगो न स्यादिति वार्थः । सम्बन्धस्येति । संयोगस्य समवायस्य चेत्यर्थः । ज्ञानस्य चेत्यपि द्रष्टव्यम् । अन्योन्याश्रयमाह अभावेति । स्वरूपसत्त्वमेवास्तित्वमित्याशंक्याह स्वरूपेति । स्वरूपस्य सत्त्वं सत्तायोगित्वमिति षष्ठी, स्वरूपमेव सत्त्वमिति प्रथमा वा ? आद्ये सामान्यादावव्याप्तिः, अन्त्येऽननुगम इति नाभावादिदमपि विवेचकम् । प्रथमपक्षेऽप्यभावेऽतिव्याप्तिरित्यपि द्रष्टव्यम् । सदितिबुद्धिवेद्यत्वं

न्यायलीलावतीप्रकाशः

इत्यन्योन्याश्रयः, घटो नास्तीतिबुद्धिविषयत्वं घटेऽप्यस्तीत्यतिव्याप्तिश्चेत्यपि द्रष्टव्यम् । उक्तेनैवाभिप्रायेणाह ज्ञातत्वेनेति । स्वरूपसत्त्वं भावत्वमिति पूर्वं दूषितेऽपि दूषणान्तरमाह स्वरूपेति । स्वरूपस्य सत्त्वं सत्तायोगित्वमिति षष्ठी, स्वरूपमेव सत्त्वमिति प्रथमा वा ? आद्ये सामान्यादीनां सत्तायोगित्वाभावादव्याप्तेः, विवेकानुपपत्तिरभावाद्भेदानुपपत्तिः, अन्त्ये चाभावेऽपि गतत्वात्ततो भावानां व्यावृत्तधर्मो न स्यादित्यर्थः । यद्वा यदि भावत्वं स्वरूपमेव तदा घटस्य भावत्वमिति षष्ठीप्रथमे न स्यातामित्यर्थः । ननु सदितिधीवेद्यत्वं भावत्वमित्यत आह सदितीति । सत्ताजातिमत्त्वस्य विवक्षितत्वे सामान्याद्यव्याप्तिरिति स्वरूपसत्त्वं वाच्यं तच्चाभावेऽप्यस्तीत्यर्थः । ननु सत्ताजाति

न्यायलीलावतीप्रकाशविवृतिः

वक्ष्यमाणदोषालग्नकतया विकल्प्य योजयति यत्किञ्चिदिति । यावदभावविरोध इति । भावस्य यावताऽभावेन विरोधस्तेनापि निरूप्यो न सोऽत्रास्तीति योजना । उक्तेनैवेति । सहप्रयोगानुपपत्त्यादिनेत्यर्थः । अभावाद्भेदानुपपत्तिरिति । सत्ताजातियोगित्वं भावत्वमिति तदभावात् सामान्या-

(१) सदिति-प्रकाशकृतां मतोऽत्र पाठो बोध्यः ।

वेद्यताया अभावेऽपि सत्वात् । तस्य भावविरुद्धस्वभावत्वाद-नारोप इति चेत् । न । समवायेऽप्यनारोपापत्तेः । तस्य स्वतोऽपि भावत्वमिति चेन्न । स्वरूपस्याभावेऽपि तुल्यत्वात्(१) । सत्तासामान्यविरहस्योभय(त्र)समत्वात् । एतेनाभिधेयत्वादयो निरस्ताः ।

ज्ञेयत्वं च न ज्ञानसम्बन्धः, तत्रैव तदभावात् । नापि

न्यायलीलावतीकण्ठाभरणम्

यदि तदा अभावातिव्याप्तिरित्यत आह तस्येति । अभिधेयत्वादय इति मूलग्रन्थाभिप्रायस्तु धर्म्मत्वधर्मित्वविशेषणत्वविशेष्यत्वादय इत्यादिपदग्राह्याः, अत एव बहुवचनोपपत्तिरपि, अन्यथा ज्ञेयत्वमात्रसङ्ग्रहे बहुवचनं नोपपद्येत ज्ञेयत्वस्य स्वातन्त्र्येणैवाग्रे दूष्यत्वाच्चेति ।

तत्रैवेति । ज्ञेयत्वे ज्ञेयत्ववृत्तावात्माश्रयापत्तेरित्यर्थः । यद्वा (तज्) ज्ञान-एव तज्ज्ञानसम्बन्धाभावाज् ज्ञानान्तरसम्बन्धे चानवस्थेति भावः ।

न्यायलीलावतीप्रकाशः

सत्तया प्रतीयमानत्वमेव सत्त्वं सामान्यादावारोपरूपा तत्प्रतीतिरस्तीति नाव्याप्तिः, अभावे त्वारोपरूपापि सा नास्ति तस्य सद्विरुद्धस्वभावत्वादित्याह तस्येति । तथासति समवायेऽपि तदारोपो न स्यात् अभावस्येव तस्यापि सत्ताविरोधित्वादित्याह समवायेऽपीति । स्वरूपस्येति । स्वरूपातिरिक्तं भावत्वं दुर्वचमिति भावः । एतेनेति । अभावस्याप्यभिधेयादित्वेन षण्णामेव तत्साधर्म्यमित्यनुपपन्नमित्यर्थः । यद्यपि मूलग्रन्थे ज्ञेयत्वमात्रस्यादिपदग्राह्यत्वाद्बहुवचनग्राह्यं नास्ति, तथापि तत्रानुक्तस्याप्येवंविधसाधर्म्यस्य बहुवचनेनोपसङ्ग्रहः ।

तत्रैवेति । ज्ञान एव ज्ञानसम्बन्धाभावात्तस्य भेदाधिष्ठानत्वादि-

न्यायलीलावतीप्रकाशविवृतिः

देरभावत्वापत्तिरित्यर्थः । यद्यपि मूलग्रन्थे इति । षण्णामस्तित्वाभिधेयत्वज्ञेयत्वानीति भाष्यग्रन्थस्य ज्ञेयत्वमात्रस्यात्रादिपदग्राह्यत्वेन तृतीयाभावादभिधेयत्वादय इति बहुवचनं विरुद्धमिति शङ्कार्थः ।

---

(१) सत्त्वात्—प्रा० पु० पाठः ।

ज्ञानावभासेऽवश्यज्ञेयत्वम् । उत्तरप्रश्नसाधारण्यात् । नापि तदुन्नेयः स्वभावभेदः । तस्य परस्परव्यावृत्तत्वेनैव स्वीकारात् ।

नाप्याश्रितत्वमन्यसमवायित्वम्, अन्यतन्त्रतया वोपलब्धिस्तद्योग्यता वा । समवायशब्दयोस्तन्निरुक्तिप्रतिषेधात् । येन

न्यायलीलावतीकण्ठाभरणम्

उत्तरप्रश्नेति । तर्हि ज्ञेयत्वमेव ज्ञेयत्वमित्युक्तं स्यात् तच्चाद्याप्यनिरुक्तमेवेत्यर्थः । नापीति । ज्ञानोन्नेयो विशेष्यनिष्ठविषयतालक्षणः स्वभावविशेषोऽपि न ज्ञेयत्वमित्यर्थः । तस्येति । प्रतिविशेष्यं तस्य व्यावृत्तत्वेनाननुगमादित्यर्थः । ज्ञातताविशेषो वा भट्टाभिमत इत्यर्थः । दोषस्तुल्य एव ।

'आश्रितत्वं चान्यत्र नित्यद्रव्येभ्य' इति मूलोक्तं साधर्म्यमेव न ज्ञातमित्याह येन चेति । अस्तित्वाभिधेयत्वज्ञेयत्वाद्यव्येवं प्रतिपक्षे तुल्यमिति भावः । द्रव्यत्वादीनां त्रयाणामपि सत्तासम्बन्धसामान्यविशेषवत्त्वं स्वसमयार्थशब्दाभिधेयत्वं धर्माधर्मक-

न्यायलीलावतीप्रकाशः

त्यर्थः । उत्तरेति । यथा प्रश्नवाक्ये ज्ञेयपदमज्ञानार्थं तथोत्तरवाक्येपीति न तेनैव तन्निर्वचनमित्यर्थः । तदुन्नेयः—ज्ञेयत्वव्यवहारोन्नेय इत्यर्थः । तस्येति । तत्तत्स्वभावविशेषस्याननुगमादनुगतव्यवहारो न स्यादित्यर्थः । वस्तुतो व्यवहारेऽपि विशेषो व्यवहर्त्तव्याधीन एवेत्यन्योन्याश्रय इति भावः ।

'आश्रितत्वं चान्यत्र नित्यद्रव्येभ्य' इत्याक्षिपति नापीति । समवायेति । समवायस्यासमवेतत्वाच्छब्दस्याश्रितत्वेनाप्रतीतेः, अत एव (१)योग्यताया अभावः कदाचित्तयोरतथाभावादित्यर्थः । साधर्म्यपदस्यार्थं दूषयति येन चेति । येन धर्मेण ज्ञेयत्वादिना स-

न्यायलीलावतीप्रकाशविवृतिः

आश्रितत्वेनेति । अन्यतन्त्रतयाऽन्यविशेषणत्वेनानुपलब्धेरित्यर्थः । तद्योग्यताया इति । स्वतन्त्रतया उपलब्धियोग्यताया इत्यर्थः । अतथाभावात्-शब्दाकाशयोर्विशेषणविशेष्यत्वप्रत्ययाभावादित्यर्थः ।

(१) तद्योग्यताया—इति विवृतिकारसम्मतः पाठोत्र द्रष्टव्यः ।

च यत्समानं तयोरेव समानता किं तेन अन्येन वा ? नाद्यः । स्वात्मन्यवृत्तेः । नेतरोऽनवस्थितेः । एतेनैव(१) षण्णामिति व्याघातः । धर्माधर्महेतुत्वञ्च जातेरप्यन्वयव्यतिरेकात् । न च व्य-

---

न्यायलीलावतीकण्ठाभरणम्

क्तृत्वं चेति साधर्म्यमाक्षिपति धर्मेति । गान्दद्यादित्यत्र व्यक्तेर्जातेश्च धर्मकर्तृत्वं सममेवेत्यतिव्याप्तिरित्यर्थः । ननु व्यक्तेरवच्छेदकत्वं

न्यायलीलावतीप्रकाशः

धर्मो धर्मी तयोर्धर्मधर्मिणोर्यदि न ज्ञेयत्वं तदा केवलान्वयित्वव्याघात इति तयोरपि साधर्म्यमेषितव्यं, तथाच किन्तेनैव ज्ञेयत्वेन तदन्येन वेत्यर्थः । स्वात्मनीति । सधर्मणो भावः साधर्म्यमिति विशिष्ट स्ववृत्तावंशत आत्माश्रय इत्यर्थः । अनवस्थितेरिति । तत्रापि धर्मान्तरेण सधर्मत्वादित्यर्थः । एतच्च योग्यतया केवलान्वयिसाधर्म्यपरम् , अन्यषां स्वात्मन्यवृत्तेः । एतेनैवेति । साधर्म्यपदार्थखण्डनेनैवेत्यर्थः । ज्ञेयत्वादेर्निःप्रतियोगिकत्वेनाभावात्मकत्वाद्भावत्वनियमे तत्रैव तद्वृत्तेश्च षड्बहिर्भावसिद्धेरिति भावः ।

द्रव्यादीनां त्रयाणामेवादृष्टजनकत्वमित्याक्षिपति धर्माधर्म-

न्यायलीलावतीप्रकाशविवृतिः

तयोर्धर्मधर्मिणोरिति । धर्मो ज्ञेयत्वम्, धर्मी ज्ञेयत्वविशिष्टः । साधर्म्यं ज्ञेयत्वरूपं तदन्येन वा ज्ञेयत्वेनेत्यर्थः । अंशत इति । ज्ञेयत्वविशिष्टज्ञेयत्ववृत्तेरिति भावः । ज्ञेयत्वे तद्वृत्त्या शुद्धात्माश्रयोऽपि द्रष्टव्यः । तत्रापि धर्मान्तरेणेति । यद्यपि ज्ञेयत्वान्तरं तद्विशिष्टेऽपि तस्य वृत्तावेवात्माश्रय इति ज्ञेयत्वान्तरं केवलान्वयि वाच्यमेव तत्रापीत्यर्थः । ननु साधर्म्यमात्रे नेदं दूषणं स्वविशिष्टे स्वस्मिन्वा स्ववृत्त्यभावेऽपि क्षत्यभावादत आह एतच्चेति । इयं च व्याख्या केवलान्वयिसाधर्म्यस्य सन्निहितत्वात्तथाक्षेपपरत्वमेव मूलस्येत्यभिप्रायेण प्रकाशकृता कृता । वस्तुतः साधर्म्यं समानधर्मणो भाव इति यत्किञ्चिदेव साधर्म्यं तद्धर्मविशिष्टे धर्मान्तरविशिष्टे वा ? आद्ये आत्माश्रयः, द्वितीयेऽधिकरणतावच्छेदकीभूत धर्मस्यापि साधर्म्यतया तदनुरोधेनापि धर्मान्तरस्वीकारेऽनवस्थितिरिति मूलार्थ इति प्रतिभाति । ज्ञेयत्वादेरिति । भावरूपं यदेव साधर्म्यं

---

(१) एवकारो नास्ति प्रा० पुस्तके ।

क्त्ववच्छेदेन कृतार्थता, विपरीतापत्तेः। न च व्यक्तिप्राशस्त्याभिधानाद्व्यक्तिरित्येतदेव प्राप्तम्, जातेरप्यभिधानात्।

सामान्यादेश्च सत्तायोगित्वान्न सामान्यत्वम्(१)। सामान्ये च सामान्यत्वम्। नित्यत्वे सति अनेकसमवेतत्वं तदिति चेन्न। द्रव्येऽपि गुणवत्त्वसत्त्वाद्द्रव्यत्वापलापात्। मनसि च न मन·

न्यायलीलावतीकण्ठाभरणम्

जातेर्नतु धर्म्महेतुत्वमित्यत आह नचेति। जातिरेव धर्म्महेतुर्व्यक्तिस्तत्रावच्छेदिकेत्येव किं न स्यादित्यर्थः। ननु घटोऽन्नीदाने फलाधिक्यश्रवणात् व्यक्तिरेव तन्त्रमित्यत आह नचेति। तत्रापि जातिभानावश्यकतया नेदमपि नियामकमित्यर्थः।

सामान्यादीनां त्रयाणामसामान्यविशेषवत्त्वं यत् साधर्म्यमुक्तं तदाक्षिपति सामान्यादेश्चेति। किञ्च सामान्यमिदं सामान्यमिदमित्यनुगतप्रत्ययानुरोधात् सामान्यमपि सामान्ये जातिरस्तीत्याह सामान्ये चेति। सामान्यत्वं न जातिः किन्तूपाधिसामान्यमित्यत आह नित्यत्वे सतीति। तर्हि द्रव्यत्वमपि जातिर्न स्यात् गुणवत्त्वेनैवाऽन्यथासिद्धेरित्याह द्रव्येऽपीति। पृथिव्युदकदहनपवनमनसामनेकत्वापरजातिमत्त्वे इत्याक्षिपति मनसि चेति। यद्वा उपाधिना अन्यथासिद्धिश्चे·

न्यायलीलावतीप्रकाशः

कर्तृत्वं चेति। जातिविशिष्टस्य द्रव्यादेरदृष्टजनकत्वश्रवणाद्विशिष्टजनकत्वे च विशेषकतया व्यक्तेरपि तथात्वापत्तेरित्यर्थः। जातेरपीति। विशिष्टाभिधाने विशेषणस्याप्यभिधानादित्यर्थः।

जात्यादित्रयस्यासामान्यवत्त्वमित्याक्षिपति सामान्यादेरिति। सदितिप्रतीतेरविशेषादित्यर्थः। सामान्ये चेति। इदं सामान्यमिदं सामान्यमित्यनुगतप्रतीतेरविशेषादित्यर्थः। नित्यत्वे सतीति। उपाधिभिरेव प्रतीतेरन्यथासिद्धत्वादित्यर्थः। उपाधिसत्त्वेन जातेर्निराकरणे दोषान्तरमाह मनसि चेति। न च वेगवत्त्वमित्यत्र मनसीत्यनुषज्यते। अदृष्टेति। अदृष्टवदात्मसंयोगस्य दहनादौ क्रियाजनकत्वावधारणादित्यर्थः।

(१) नासामान्यवत्त्वमिति पाठोऽत्रोचितः किन्तु पुस्तकद्वयेऽस्यैवोलम्भादयमेव मुद्रितः कथंचिद्योजनीयः।

स्त्वं, सुखाद्युपलब्धीन्द्रियत्वेनैवान्यथासिद्धेः । न च वेगवत्त्वम्, अदृष्टसम्बन्धेनैव क्रियोपपत्तेः । (अन्यथा स्पर्शस्याप्यनुमानापत्तेः(१) ।) परत्वापरत्वे च द्रव्यत्वान्नित्ये गगनादावपि । भूतत्वं च गुणत्ववत्सामान्यम् । न च व्यञ्जकाभावः, बाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्तायास्तत्त्वात् । न चैवं मूर्तत्वसिद्धौ जातिसङ्करापत्तौ तुल्ययोगक्षेमयोर्द्वयोरप्यभावः । गुणत्वस्यापलापापत्तेः ।

न्यायलीलावतीकण्ठाभरणम्

तत्राह नचेति । क्षितिजलज्योतिरनिलमनसां क्रियावत्त्वमूर्त्तत्वपरापरत्ववेगवत्त्वादीत्यत्र मनसि वेगवत्त्वं साधर्म्यमाक्षिपति न च वेगवत्त्वमिति । मनसीत्यनुषज्यते । अन्यथा मूर्त्तत्वेन मनसि स्पर्शवत्त्वमपि स्यादित्याह अन्यथेति । परत्वापरत्वस्यातिव्यापकत्वमाह परत्वेति । यद्यपि संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वबुद्धिर्दैशिकयोर्बहुतरतपनपरिस्पन्दान्तरितजन्मत्वबुद्धिश्च कालिकयोः परत्वापरत्वयोर्जनिका, तथाच पवनादौ तदसम्भवः, तथापि परिमाणवत्त्वात्तदापादनं यथाकथञ्चित् इति द्रष्टव्यम् । पृथिव्यादीनां पञ्चानां भूतत्वेन्द्रियप्रकृतित्वबाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वानीति यदुक्तं तत्राह भूतत्वमिति । सामान्यमिति । जातिरित्यर्थः । गुणत्वस्येति । संयोगासमवायिकारणतया

न्यायलीलावतीप्रकाशः

अन्यथेति । स्पर्शसमानाधिकरणस्यैव वेगस्यान्यत्र क्रियाजनकत्वावधारणात् स्पर्शोऽपि मनसि सिध्येदिति भावः । परत्वेति । अन्यथा परिमाणाद्यपि तत्र न सिध्येदिति भावः । ग्राह्येति । ग्राह्यजातीयविशेषगुणवत्ताया इत्यर्थः । मूर्त्तत्वेति । क्रियावत्त्वस्यावच्छिन्नपरिमाणवत्त्वस्य वा तद्व्यञ्जकस्य सत्त्वादित्यर्थः । गुणत्वस्येति । मूर्त्तत्वं विना भूतत्वमाकाशे भूतत्वं च विना मूर्त्तत्वं मनसीति परस्परात्यन्ताभावसमाना-

न्यायलीलावतीप्रकाशविवृतिः

तद्यदि षडन्तर्गतं तदात्माश्रयभयेन तत्रैव तद्वृत्तेः षण्णामिदं साधर्म्यमिति व्याघात इति भावः ।

---

(१) ( ) चिह्नान्तर्गतः पाठो प्रा० पु० नास्ति ।

न चाकाशं न द्रव्यत्वातिरिक्तापरसामान्यसम्बन्धि, एकत्वात् दिगादिवदिति वाच्यम् । व्यावर्त्यद्रव्यत्ववत्तत्सिद्धौ बाधात्, अन्यथा तु तद्व्यवच्छेदवैयर्थ्यात् । अव्यवच्छेदे द्रव्यत्वासिद्धौ सिद्धान्त(१)विरोधात् ।

दिक्कालयोश्च न सर्वनिमित्तकारणत्वम्, उपाधेरेवान्वयव्यतिरेकित्वात्, तदवच्छेदकत्वस्य गगनादिसाम्यात् । सुखा-

---

न्यायलीलावतीकण्ठाभरणम्

कर्म्मणि संयोगे च या जातिस्तया परापरभावानुपपत्त्या गुणत्वमपि न सिध्येत, तां जातिं विना गुणत्वं गुणादौ सा च गुणत्वं विना कर्म्मणि संयोगे च द्वयोः साङ्कर्य्यमित्यर्थः । भूतत्वस्य जातित्वे बाधकं मन्वानः शङ्कते नचेति । व्यावर्त्येति । द्रव्यत्ववत् विभुत्वमपि प्रमाणसिद्धमाकाशे तथाच तदभावसाधने बाध इत्यर्थः । अन्यथा त्विति । द्रव्यत्वासिद्धाविव्यर्थः । अव्यवच्छेद इति । द्रव्यत्वातिरिक्तेति विशेषणादान इत्यर्थः ।

दिक्कालयोः पञ्चगुणत्वं सर्वोत्पत्तिमन्निमित्तकारणत्वं चेति साधर्म्यमाक्षिपति दिक्कालयोरिति । उपाधेरेवेति । नित्यविभुतया न तयोरन्वयव्यतिरेकाविति तदुपाधिवर्त्तमानत्वप्राचीत्वादीनामेव ताविति तेषामेव कारणत्वमित्यर्थः । ननु तदुपाधेरवच्छेदकतया तयोरेव कारणत्वं पर्य्यवस्येदित्यत आह तदवच्छेदकत्वस्येति । तथाच गगनस्यापि

न्यायलीलावतीप्रकाशः

धिकरणजात्योरेकत्र पृथिव्यादौ सङ्करः स्यादिति विनिगमकाभावादुभयोरप्युपाधित्वमिति यदि, तदा संयोगासमवायिकारणत्वेन कर्मसंयोगवृत्त्येकजातिसिद्धौ गुणत्वेन परापरभावाऽनुपपत्त्या विनिगमकाभावाद्गुणत्वमपि न सिद्ध्येदित्यर्थः ।

उपाधेरेवेति । अन्वयव्यतिरेकगम्यं हि कारणत्वं दिक्कालयोश्च विभुत्वनित्यत्वाभ्यां न दैशिकः सामयिकश्चाभाव इति न तयोः कारणत्वं, किन्तु तदवच्छेदकानामुपाधीनामेव तदित्यर्थः । नन्ववच्छेदकान्वयव्यतिरेकाभ्यामेवावच्छेद्यस्य कारणत्वं ग्राहिष्यते, न चातिप्रसङ्गो-

---

(१) अव्यवच्छेदभेदे सिद्धान्तेति प्रा० पु० पाठः ।

दिष्वात्मादिबन्दीग्रहस्यात्यन्ताभावव्यतिरेकमुपादायैवोन्मोच-
नात् । सामग्रीकादाचित्कत्वस्य पूर्वपूर्वसामग्र्यनुविधानात् । आ-

---

न्यायलीलावतीकण्ठाभरणम्

कारणत्वादित्यर्थः . ननु नित्यविभुतया चेन्नान्वयव्यतिरेकौ तदा सु-
खादिकं प्रति नात्मनोऽपि कारणत्वं स्यादित्याह सुखादिष्विति । आत्मै-
वात्यन्ताभावव्यतिरेकस्तथाच धर्म्मिग्राहकमानासिद्धमेव सुखादिकं
प्रत्यात्मनः कारणत्वमिति न तदवच्छेदेन शरीरादिनाऽन्यथासिद्धि-
रिति भावः । दिक्कालयोस्तु धर्म्मिग्राहकमानेन परत्वापरत्वेऽपि
सर्वोत्पत्तिनिमित्तकारणत्वमिति भावः । आत्मभिन्ने न सुखादिकं कि-
न्त्वात्मनीति समवायिकारणता अन्योऽन्याभावरूपव्यतिरेकगम्यैव ।
नन्वेवं सुखादीनां कादाचित्कत्वं प्रादेशिकत्वं च भज्येत आत्मनो
नित्यविभुत्वादित्यत आह सामग्रीति । सामग्रीकादाचित्कत्वादेव सु
खादीनां कादाचित्कत्वमित्यर्थः । सामग्रीकादाचित्कत्वमपीतरसाम-

न्यायलीलावतीप्रकाशः

ऽवच्छेद्यावच्छेदकभावस्य नियामकत्वादित्यत आह तदवच्छेदकत्वस्येति ।
तथासति गगनाद्यवच्छेदकदण्डान्वयव्यतिरेकाभ्यां अवच्छेद्यस्य ग-
गनस्य कारणत्वापत्तेरित्यर्थः। नन्वेवमात्मनोऽपि ज्ञानादावकारणता-
यामुपाधेरेव शरीरादेः कारणत्वं स्यादत आह आत्मादीति । अत्यन्ताभावा
व्यतिरेको धर्मिस्वरूपम्, तथाच धर्मिग्राहकमानेनैवात्मनो ज्ञानकार-
णत्वमित्यर्थः । वस्तुतस्तु समवायिकारणत्वं न संसर्गाभावात्मकव्य-
तिरेकगम्यं निमित्तकारणसाधारण्यात्, किन्त्वन्योन्याभावात्मक-
व्यतिरेकगम्यं, स चात्र सुलभ एवेति तत्त्वम् । ननु ज्ञानादावात्मनः
कारणत्वे कादाचित्कत्वं न स्यात्, न च सामग्रीकादाचित्कत्वात्त-
था, तस्या अपि कादाचित्कत्वेऽनुयोगतावदवस्थ्यादित्यत आह
सामग्रीति । सामग्र्यधीनं कार्यं, तस्याश्च कादाचित्कत्वं सामग्री-

न्यायलीलावतीप्रकाशविवृतिः

परमाण्वादावतिव्याप्तिभयादाह प्राच्येति । तथाच धर्मिग्राहकेति ।
दिक्कालयोः परत्वापरत्वकारणतया सिद्धेर्न धर्मिग्राहकमानसिद्धं
सर्वकारणत्वमिति भावः । ननु अन्वयव्यतिरेकाभावेऽपि चे-

धारत्वस्य सम्बन्धभेदत्वेनाऽन्यथासिद्धत्वात्, निमित्ततप्रवेशे तु तद्भेदकमानाभावेन व्यवहारानुपपत्तेः । आधारत्वात्तदनुमानस्याऽन्यथासिद्धिशङ्कादूषितत्वात् । पटादौ च पीठाद्याधारत्वे नि-

न्यायलीलावतीकण्ठाभरणम्

श्रीकादाचित्कत्वाधीनेति प्रामाणिकीयमनवस्थेति भावः । नन्विहेदानीं जात इति दिक्कालयोरधिकरणत्वं गृह्यतेऽधिकरणं च कारकमेवेत्यत आह आधारत्वस्येति । निमित्ततेति । आधारत्वस्य निमित्तकारणतागर्भत्वे मानाभावादित्यर्थः। नन्वाधारत्वादेर्निमित्तत्वं तयोरर्थसास्यत इत्यत आह आधारत्वादिति । सम्बन्धितामात्रेणैवाधारत्वसिद्धौ निमित्तताया अतन्त्रत्वादित्यर्थः । व्यभिचारमप्याह पटादाविति । आधारत्वमप्युपाधीनामेव न तु तयोरपीति भावः । नवानां परिमाणवत्त्वं संख्यावत्त्वं च साधर्म्यमाक्षिपति गगनादौ चेति । हस्तवितस्त्याद्यवच्छेद-

न्यायलीलावतीप्रकाशः

कादाचित्कत्वात्, न चानवस्था अनादित्वादित्यर्थः । नन्विहेदानीं जात इत्याधारत्वं दिक्कालयोः प्रतीयते, तच्च कारणत्वगर्भमत आह आधारत्वस्येति । निमित्ततेति । दिक्कालवृत्त्याधारताया निमित्तविशेषत्वे मानाभावात् सर्वनिमित्ततान्यवहारानुपपत्तेरित्यर्थः । नन्विह तन्तुषु पट इत्याधारस्य निमित्तत्वाद्दिक्कालयोरपि तथात्वमनुमेयमित्यत आह आधारत्वादिति । विपक्षे बाधकाभावात्साध्यं विनापि पक्षे हेतुसम्भवादित्यर्थः । अनैकान्तिकत्वमाह पटादाविति । पक्षातिरिक्ते साध्यं विना हेतोः सत्त्वादित्यर्थः । वस्तुत उपाधीनामेवाधारत्वं प्रती-

न्यायलीलावतीप्रकाशविवृतिः

दात्मनः कारणत्वं तदा बाधकाभावादिहेदानीं जात इति प्रतीतेस्तयोः कारणत्वं सिद्ध्येदेवेत्यरुचेराह वस्तुतस्त्विति । सर्वनिमित्तेति । निमित्ततावघटितसर्वाधारताव्यवहारानुपपत्तेरित्यर्थः । पक्षे हेतुसम्भवादिति । उपाधिवदप्रयोजकत्वेनाप्यभिहितस्य व्यभिचारसंशयस्य पक्षीयस्यादोषत्वादिति भावः । अनैकान्तिकत्वं—निश्चितानैकान्तिकत्वम्, अत एवाह पक्षातिरिक्त इति । आधारत्वप्रतीतेरपि न कारणत्वमित्युक्तमधुना तु प्रतीतिरेव तादृशी नेत्याह वस्तुत इति ।

मित्तनिमित्तिभावाभावात् । गगनादौ च न महत्त्वम् , अवच्छे-
दोपहितव्यक्तिव्यङ्ग्यत्वात्परिमाणत्वस्य, गगनमपरिमितमिति व्य-
वहाराच्च । न चैकत्वम् , स्वरूपाभेदेनाप्युपपत्तेः । न च संस्का-
रत्वम्, मानाभावात् । गोशब्दवाच्यनानाजातीयवस्तुवदनुगत-
प्रत्ययासिद्धेः, अभिधानस्यापि तथैवोपपत्तेः, अन्यथा तत्रा-
प्यनुमानापत्तेः । न च तत्र व्यवस्थापकाभावोऽत्र तूत्पादकस-

न्यायलीलावतीकण्ठाभरणम्

व्यङ्गत्वात् परिमाणत्वजातेरित्यर्थः । द्रव्यत्वाच्च न तदनुमानमप्रयो-
जकत्वादिति भावः । न चैकत्वमिति । गगनादावित्यनुषज्यते ।
वेगस्थितिस्थापकभावनासु संस्कारत्वं न जातिरित्याह नचेति । जा-
तिरिति शेषः । गोशब्दवाच्येषु यथा नानुगतप्रत्ययस्तथात्रापीत्यर्थः ।
संस्कारशब्दप्रयोगस्त्रिषु कथमित्यत आह अभिधानस्येति । अभिधानत-
न्त्रं यद्येकजातीयत्वं तदा वागादिष्वपि गोत्वमेवं स्यादित्याह—अन्य-
थेति । ननु कर्म्मवतः जनितो वेगः कर्म्मवदेव शरीरं जनयति
यद्देशसंयुक्तेन तदन्तशृङ्गशाखादिना जनितः स्थितिस्थापकस्तद्दे-
शसंयोगवन्तमेव तं करोति ज्ञानवता आत्मना जनिता भावना तादृ-
शमेवात्मानं जनयत्युत्पादसजातीयावस्थोत्पादकत्वमिह यथा व्य-
वस्थापकं न तथा वागादिष्वपि गोत्वस्येत्यत आह नचेति । तर्हि

न्यायलीलावतीप्रकाशः

यते न दिक्कालयोः । गगनादाविति । न च द्रव्यत्वेन परिमाणानुमानं,
विपक्षे बाधकाभावादिति भावः । न चैकत्वमित्यत्र गगनादावित्यनुष-
ज्यते । स्वरूपाभेदेनेति । अत एव गुणादावप्येकत्वव्यवहार इति भावः ।
वेगादिषु संस्कारत्वं जातिरिति दूषयति नचेति । गोशब्देति । गोशब्द-
वाच्येषु गवादिषु यथाऽनुगतप्रत्ययाभावः तद्वदत्रापीति भावः ।
अभिधानस्येति । वेगादिषु संस्कारपदप्रयोगस्य नानार्थत्वेनाप्युपपत्तेरि-
त्यर्थः । उत्पादकेति । यदवस्थेन धर्म्मिणा वेगादयो जन्यन्ते तदवस्थमेव
धर्म्मिणं ते जनयन्ति, तद्यथा कर्मवता जनितो वेगः कर्मवन्तमेव धर्म्मिणं

जातीयावस्थोत्पादकत्वमिति वाच्यम्। शब्देऽपि तत्सत्त्वात्। न चायं नियमोऽपि(१), ज्ञाने तदभावात्। विषयप्रवणत्वमिति चेन्न। इच्छादावपि तत्सत्त्वात्। स्वाभाविकमिति चेत्। न। स्मृतावभावात्(२)।

न्यायलीलावतीकण्ठाभरणम्

शब्दमादाय सा जातिः सिध्येदित्याह शब्देऽपीति। न चायमिति। जातौ व्यवस्थापकनियमोऽपि नास्तीत्यर्थः। व्यभिचारमाह ज्ञान इति। व्यवस्थापकमन्तरेणैव ज्ञानत्वजात्यभ्युपगमादित्यर्थः। तत्रापि व्यवस्थापकमस्त्येवेति न व्यभिचार इत्याह विषयप्रवणत्व इति। एवंसति इच्छापि ज्ञानं स्यादित्याह इच्छादावपीति। इच्छादौ ज्ञानोपाधिकत्वं विषयप्रवणत्वं न तु स्वाभाविकं तादृशं च विवक्षितमिति शङ्कते स्वाभाविकमिति। तर्हि स्मृतिरपि ज्ञानं न स्यात् स्मृतेः पूर्वानुभवोपाधिकविषयप्रवणत्वादित्याह—स्मृताविति। अपरव्याख्यानमन्यत्।

न्यायलीलावतीप्रकाशः

जनयति, विशिष्टज्ञानवता जनितः संस्कारः स्मृत्यात्मकविशिष्टज्ञानवन्तमेवात्मानं जनयति, तद्देशसंयुक्तेन जनितः स्थितिस्थापकः पुनस्तद्देशविशिष्टमेव धर्मिणं जनयतीत्यर्थः। शब्देपीति। शब्दवता आकाशेन जनितः शब्दः पुनः शब्दवन्तमेवाकाशं कुरुत इत्यर्थः। न चायमिति। संस्कारे उत्पादकसजातीयावस्थोत्पादकत्वनियमो नास्ति अनुभववता धर्मिणा जनिता भावना, न च साऽनुभववन्तमेव कुरुत इत्यर्थः। विषयेति। विषयनिरूप्यधर्मवता जनिता भावना तादृक्स्मृतिमन्तं कुरुत इत्यर्थः। इच्छादावपीति। तादृशेन जनितेच्छापि तादृशीति तत्साधारणी सा जातिः स्यादित्यर्थः। स्वाभाविकमिति।

न्यायलीलावतीप्रकाशविवृतिः

शब्दवताकाशेनेति। तथाचोक्तनियामकबलेन संस्कारत्वस्य सर्वसाधारण्यापत्तिरित्यर्थः। अनुभववताधर्मिणेति। न च ज्ञानत्वमादाय साजात्यमस्त्येवेति वाच्यम्। प्रमेयत्वादिकमादाय सर्वत्र तस्य वक्तुं सुकरत्वादिति भावः। तादृशीति। विषयप्रवणज्ञानरूपधर्मवत्ताजनितेच्छा वि-

---

(१) अपिशब्दो नास्ति प्रा० पुस्तके।

(२) स्मृतेरप्यभावात् इति प्रकाशसंमतोत्र पाठो द्रष्टव्यः।

अदृष्टत्वं च संस्कारत्ववत् । धर्माधर्मौ नोभयवृत्तिसामान्यवन्तौ विरोधिगुणत्वात् सुखदुःखवदिति चेन्न । सत्तागुणत्वादिसत्त्वे बाधात् । उभयमात्रवृत्तिसामान्यनिषेधे च गन्धेन व्यभिचारात् । शब्दादौ चैकत्वम् । न च गुणत्वात्तद्बाधः, अध्यक्षस्यानन्यथासिद्धेः द्रव्ये द्रव्यवत् । अत एव नानवस्थितिः, अ-

---

न्यायलीलावतीकण्ठाभरणम्

अदृष्टत्वं च जातिः स्यादिति शेषः । उभयवृत्तीति । उभयवृत्तिजातिमन्तावित्यर्थः । गन्धेनेति । सौरभासौरभमात्रवृत्तिगन्धत्वजातिमता गन्धेनेत्यर्थः । एकत्वसंख्यां शब्दादावापादयति शब्दादाविति । ननु गुणत्वात्तत्र संख्याविरहः साधनीय इत्यत आह नचेति । अनन्यथासिद्धप्रत्यक्षादनुमानमेव बाधितमित्याह अध्यक्षस्येति । किञ्च यथा द्रव्ये द्रव्यं तथा गुणे गुणः स्यात्, अन्यथा न द्रव्यवत् द्रव्यत्वादिवद् गगनवदित्यपि स्यात् प्रत्यक्षमुभयत्र समानमिति भावः । ननु गुणे गुणाङ्गीकारे तत्र तत्रापीत्यनवस्था स्यादित्यत आह अत एवेति । द्रव्यदृष्टान्तादेवेत्यर्थः । रूपादीनामेव विशेषगुणत्वमित्यतिव्याप्त्या

न्यायलीलावतीप्रकाशः

इच्छायां तु कारणज्ञानोपाधिकं तदित्यर्थः । स्मृतेरिति । स्मृतेरपि विषयप्रवणत्वं न स्वाभाविकमिति तत्राप्युक्तं निमित्तं नेति तद्धेतौ भावनायामपि जातिर्न स्यादित्यर्थः ।

अदृष्टत्वं चेति । सामान्यं स्वीकर्त्तव्यं तुल्ययुक्तिकयेति शेषः । गन्धेनेति । सुरभ्यसुरभिगन्धमात्रवृत्तिगन्धत्वाक्रान्तेन सुरभ्यसुरभिगन्धेनेत्यर्थः । धर्माधर्मोभयमात्रवृत्तिसामान्यनिषेधे साध्ये चाप्रसिद्धविशेषणत्वमिति भावः । शब्दादाविति । द्रव्यवदेकत्वप्रतीत्यविशेषादित्य-

न्यायलीलावतीप्रकाशविवृतिः

षयप्रवणप्रयत्नवज्ज्ञानिकेति तत्साधारणी जातिः स्यादित्यर्थः । इच्छायान्त्विति । यद्यपि स्वजनकस्वजन्ययोः सादृश्यं प्रकृतमिति प्रयत्नस्येति युज्यते, तथापीच्छायास्तथात्वे यत्नस्यापि तथात्वमित्यभिसन्धायैतदुक्तम् । न स्वाभाविकमिति । जनकीभूतज्ञानोपाधिकत्वादिति भावः ।

वस्थितिदर्शनात् । परत्वापरत्वगुरुत्ववेगनैमित्तिकद्रवत्वादीनां च रूपरसगन्धस्पर्शस्वाभाविकद्रवत्ववत् किं न विशेषगुणत्वम् । परामृष्यमाणलिङ्गवत् सुखमपि सुखं जनयतु । स्पर्शश्च शीतः कम्पस्य कारणम् । असमवायिकारणत्वं चादृष्टस्य सुखदुःखे प्रति, समस्तात्मविशेषगुणोत्पत्तावसामर्थ्येऽपि विशेषव्यवस्थितिसम्भ-

---

न्यायलीलावतीकण्ठाभरणम्

आक्षिपति परत्वेति । विशेषगुणेषु व्यावर्त्तकलक्षणाभावादित्यर्थः । सुखस्य सजातीयारम्भकत्वमाक्षिपति सुखमपीति । पुत्रसुखज्ञानाद् यद्यपि पितरि सुखं तथापि ज्ञायमानात् सुखादेव तत् स्यादित्यर्थः । उष्णेतरस्पर्शस्य सजातीयमात्रारम्भकत्वमाक्षिपति स्पर्शश्चेति । अदृष्टं निमित्तकारणमात्रमित्याक्षिपति असमवायीति । कार्य्यैकार्थसमवायात् सुखदुःखे प्रति तयोरसमवायिकारणत्वं स्यात् । प्रत्यासत्त्यविशेषेऽपि यथा ज्ञानादिकं प्रति नासाधारणनिमित्तकारणत्वं तथाऽसमवायिकारणत्वमपि न स्यादित्याह समस्तेति ।

न्यायलीलावतीप्रकाशः

र्थः । अतएवेति । अनवस्थायां च प्रमाणाभावो मूलमित्यर्थः । परत्वेति । परत्वादिव्यावृत्तविशेषगुणलक्षणाभावादित्यर्थः । सुखं न सजातीयारम्भकमित्याक्षिपति सुखमपीति । ज्ञायमानमिति शेषः । अदृष्टं सर्वोत्पत्तिमन्निमित्तकारणमित्याक्षिपति असमवायीति । समवायिकारणप्रत्यासन्नमसमवायिकारणं तथाभूतं चादृष्टमिति भावः । नन्वेवमशेषगुणापेक्षया तस्य तथात्वापत्तिरत आह समस्तेति । प्रत्यासत्त्यविशे-

न्यायलीलावतीप्रकाशविवृतिः

सत्तागुणत्वादिसत्त्व इति मूलम् । सत्तागुणत्वे ये आदी व्यापके रूपत्वाद्यपेक्षयेत्यर्थः । अन्यथादिपदसङ्ग्राह्याभावात् । अनवस्थायां चेति । तथाच गुणे गुणावस्थानं न दोषाय प्रयोगिकत्वादिति भावः । अदृष्टं सर्वोत्पत्तीति । निमित्तकारणताया असमवायिकारणान्यत्वघटितत्वादिति भावः । नन्वेवमशेषेति । समवायिकारणप्रत्यासत्त्यविशेषे पूर्ववर्त्यदृष्टव्यक्तीनां सर्वान्प्रत्यसमवायिकारणत्वापत्तिरित्यर्थः । प्रत्यासत्त्यविशेषेपीति । सत्यां कारणतायामसमवायिकारणत्वं तस्यां

वान्निमित्ततावदिति सर्वं समाकुलमिति चेत् ।

नैवम् । सत्तासम्बन्धबुद्धि(१)स्तावन्नाभाव इत्यध्यक्षसिद्धम् । न चेयमनारोपिता, समवाये तदभावात् , तथा चैवंविधारो-

---

न्यायलीलावतीकण्ठाभरणम्

अस्तित्वमुपपादयति सत्तेति । नचेयमिति । अनारोपितत्वेन न विशेषणीया किन्तु बुद्धिमात्रमभिमतमित्यर्थः । अनारोपितत्वेऽनिष्टमाह समवाय इति । सामान्यविशेषयोः सत्तासामानाधिकरण्यादपि तद्बुद्धिसम्भवात समवायमात्रग्रहणम् ; उपल

न्यायलीलावतीप्रकाशः

षेऽपि असमवायिकरणत्वे स्वभाव एव नियामक इत्यर्थः ।

सत्तासम्बन्धेति । ननु सत्तासम्बन्धबुद्धेः परकीयायाः स्वबुद्धेरप्यतीतानागताया अभावे अभावग्रहे योग्यानुपलम्भो नास्ति, न च वर्त्तमाना स्वकीया या तादृशी बुद्धिस्तदभावो विवक्षितः, भावेऽपि क्वचित्तदभावात सर्वस्य भावस्य सर्वैरज्ञानात् । नैवम्, तत्रैव सद्बुद्धिर्यद्विषयत्वेन साऽनुव्यवसीयते अभावविषयत्वेन च सा नानुव्यवसीयत इत्यर्थात् । इयं— सत्तासम्बन्धबुद्धिः । समवाय इत्युपलक्षणम् , सामान्यविशेषयोरपीति द्रष्टव्यम् । तदभावात्—अनारोपितसत्तासम्बन्धबुद्ध्यभा-

न्यायलीलावतीप्रकाशविवृतिः

च स्वभाव एव नियामक इत्यर्थः ।

अभावविषयत्वेन चेति । यद्यपि परकीया बुद्धिरभावविषयत्वेन परेणानुव्यवसीयत इत्यपि नाध्यक्षसिद्धं, स्वीया बुद्धिश्च किञ्चिद्भावविषयत्वेनापि नानुव्यवसीयत इत्यव्याप्तिः, तथापि स न प्रमेय इत्यादिसामान्यप्रकारकबुद्धिर्यथा सकलभावविषयत्वेनानुव्यवसीयते न तथा भावादिसमतया तस्य बुद्धिस्वरूपत्वादित्याशयः । एवञ्च यद्यपि सत्तासम्बन्धबुद्धिविषयत्वमिति यथाश्रुतमूलमेव सम्यक्, तथापि तत्रैव प्रमाणत्वेनानुव्यवसायपर्यन्तमुक्तम् । न चेयमनारोपितेति मूलम् । अनारोपितरूपा प्रकृते न विवक्षितेत्यर्थः । अनारोपिते-

---

(१) बुद्धिविषयत्वं तावदिति विवृतिकारानुमतः पाठोऽत्र द्रष्टव्यः ।

पस्याभावो विरोध्येव, न यत्रैतादृशसंवेदनं(१) तत्रैवान्वय-

न्यायलीलावतीकण्ठाभरणम्

क्षणतया वा। कथं विरोधीत्यत आह न यत्रेति। विरोधाभावे तद्-

न्यायलीलावतीप्रकाशः

वात्। एतावता यत्सिद्धं तदाह तथाचेति। न यत्रेति। यत्राभावे एता-दृशं सत्तासम्बन्धविषयकं सम्वेदनं नास्ति सोऽभावः सत्तासम्बन्ध-धीविरोध्येव। अन्वयेति। ननु भावनिष्ठारोपेऽभावनिष्ठानारोपे वा अनु-गतभावत्वाभावत्वधर्मग्रहं विना अन्वयव्यतिरेकयोः कथमवगमः। मैवम्। तृणारणिमणिन्यायेन व्यक्तावन्वयव्यतिरेकग्रहसम्भवात्। तेन सत्तासम्बन्धज्ञानविरोधिप्रकारशून्यत्वं भावत्वम्, यन्निष्ठतया यस्मिन् धर्मे भासमाने यन्निष्ठा सत्ताप्रकारिका विषयता न भवति स सत्ता-ज्ञानविरोधी प्रकारः। यद्वा सत्ताविशेष्यत्वं भावत्वम्, यथात्मनि ज्ञानं समवायेन विशेषणं विषये च स्वरूपेण, तथा द्रव्यादित्रिके समवायेन सत्ता विशेषणं सामान्यादौ स्वरूपेण सत्प्रत्ययस्योभयत्र तुल्यत्वात्, सामान्यादौ सत्तासमवाये बाधकादिति सम्प्रदायविदः। समवायवृ-त्तिरेव भावत्वम्, सा द्रव्यादित्रिके आधारतारूपा सामान्यविशेषयोः प्रतियोगित्वरूपा समवाये च स्वरूपमेव। नचैवमननुगमः, वृत्तीनां भेदेपि समवायस्यैकत्वात्। यद्यपि यथाकथञ्चिदभावेऽपि समवाय-

न्यायलीलावतीप्रकाशविवृतिः

ति। अनारोपितसत्तासम्बन्धबुद्धीत्यर्थः। विरोधित्वं सत्ताविरहव्या-प्यत्वेन ज्ञायमानस्य वा विवक्षितं, स्वरूपेणैव वा ज्ञायमानस्य? आद्ये सामान्यादावतिव्याप्तिरन्त्येऽसम्भवः, तमः सदितिप्रतीति-दशायामपि प्रागभावादिज्ञानसत्त्वादित्यरुचेराह सत्तेति। परम्परा-सम्बन्धविषयत्वेन भ्रमत्वेन वा सामान्यादौ सत्प्रत्ययस्योपप-त्तेर्न स्वरूपसम्बन्धे समानमन्यथा तमः सदितिप्रतीत्यऽभावेऽपि सत्तायाः स्वरूपसम्बन्धकल्पनेऽतिप्रसङ्गतादवस्थ्यादित्यरुचिमावि-ष्करोति सम्प्रदायविद इति। आधारत्वप्रतियोगित्वाभेदात्मकान्यतमस-म्बधेनेति शेषः। अत्रापि सम्बन्धानामन्यान्यत्वेनानुगमे द्रव्यादीना-

---

(१) यत्रैवं संवेदनामिति प्रा० पु० पाठः।

व्यतिरेकसिद्धेः । तथा चैतदेव साधर्म्यं सैव च बुद्धिस्तदालम्बनसंवेदिका, विरोधात् । न च बुद्ध्यन्तरेण व्यवस्था,

---

न्यायलीलावतीकण्ठाभरणम्

बुद्धेरभावप्रसङ्गात् । एतदेवेति । सत्तासम्बन्धाद् विषयत्वं सत्ताप्रकारकज्ञानविषयत्वम्, सत्ताबुद्धिविरोधिप्रकारानवच्छिन्नत्वं वा भावत्वं तदेवास्तित्वमित्यर्थः । यद्वा सत्ताविशेष्यत्वं भावत्वं समवाय एवानुगतभावत्वं, स च द्रव्यादित्रये आधेयतया सामान्यविशेषयोः प्रतियोगितया । ननु न सा बुद्धिः स्वस्य गोचरयति बुद्ध्यन्तरेण च तद्ग्रहेऽनवस्थेति कथं तमादायैतत्साधर्म्यं स्यादित्यत आह नचेति । प्रमेयं वाच्यमितिव्याप्तिग्रहे यथा सामान्यलक्षणया स्वस्यापि वाच्यत्वं

न्यायलीलावतीप्रकाशः

सम्बन्धोऽस्ति. तथाप्युक्तक्रमेण नियमः । यद्वा द्रव्यादिषडन्यतमत्वं भावत्वम् । यद्वा स्वभावभेद एव भावत्वम्, स च वैधर्म्यभेदः, वैधर्म्यं चाभावावृत्तिर्द्रव्यत्वघटत्वादिधर्म इति वयम् । साधर्म्यमिति । षण्णामिति शेषः । नन्वस्तीतिबुद्धिः स्वस्यापि अस्तीतिबुद्धिविषयत्वं न गोचरयति अनवस्थापत्तेः, तथाच तस्याः बुद्धेः कथमेतत्साधर्म्यमित्याह सैव चेति । यथा प्रमेयत्ववाच्यत्वव्याप्तिग्राहकं प्रमाणं स्वस्यापि प्रमेयत्ववाच्यत्वे गृह्णाति, तथाऽस्तीतिबुद्धिविषयत्वग्राहकं सामान्येऽपि

न्यायलीलावतीप्रकाशविवृतिः

मेव तथाऽनुगमोऽस्त्वित्यरुचेस्तथैव सिद्धान्तयति यद्वा द्रव्यादीति । द्रव्यादिषडन्योन्याभावभिन्नत्वमेव भावत्वमित्यर्थः । अन्योन्याभावात्मकवैधर्म्यविशेषोपदानेऽपरितुष्यन् सामान्यत एवाह यद्वा स्वभावभेद एवेति । तथाचाभावावृत्तिधर्मवत्त्वमेव भावत्वम्, अभावत्वं च द्रव्यादिषडन्यत्वमेव, वैधर्म्याणां चाभावावृत्तित्वमेवानुगमकमिति भावः । वयं तु प्रागभावत्वादिकं स्वरूपेणैव सत्ताभानविरोधि, न च तमः सदिति प्रत्ययानुपपत्तिः, दोषप्राबल्येन ज्ञानमवधूयापि प्रमोत्पत्तेरत एवान्यत्र प्रागभावादिज्ञाने न सत्ताज्ञानमिति सत्ताभानविरोधितावच्छेदकरूपवत्त्वमेव भावत्वमिति प्रागुक्तमेव सम्यगिति पश्यामः । अस्तीतिबुद्धिरिति । अस्तीतिबुद्धिविषयकत्वग्राहकं प्रमाण-

सर्वासामस्मदादिभिरवेदनात् । योग्यतायाः व्यावृत्तरूपानतिरेकादिति चेत् । न । प्रमेयत्ववाच्यत्वानियमसम्वेदनवत् सामान्येनास्यापि स्फुरणात् । ज्ञेयत्वे च ज्ञानजातीयं तावेदकम् । तेन यदुपहितं तदपि तादृगेव, अन्यथा तत्रानुगतवेदनानुपपत्तेः । स च सम्बन्धं विनेत्यनुवृत्तिव्यावृत्त्योस्तुल्यम् । ज्ञेयोऽयमिति

न्यायलीलावतीकण्ठाभरणम्

प्रमेयत्वं परिच्छिनत्ति तथा घटादौ सद्बुद्धिविषयत्वं परिच्छिनत्ति प्रमाणं तस्या अपि बुद्धेस्तत्परिच्छिनत्ति सामान्यलक्षणया च स्वप्रकाशमिष्यत एवेत्याह प्रमेयत्वेति । ज्ञेयत्वमपि परम्परासम्बद्धं ज्ञानत्वमेवानुगतमित्याह ज्ञेयत्व इति । तेनेति । ज्ञानजातीयेन यदुपहितं तदपि तादृगेवानुगतमित्यर्थः । तथाच विषयत्वानुगमकृतो न दोष इति भावः । अनुगतवेदनेति । ज्ञातोऽयं ज्ञातोऽयमित्यनुगतवेदनानुपपत्तेरित्यर्थः । ननु विषयेषु सम्बन्धं विना ज्ञानत्वमुपाधिः कथं स्यादित्यत आह स चेति । ज्ञानत्वलक्षण उपाधिः सम्बन्धं समवायं विनापि विषयेषु परम्परासम्बन्धेन दाण्डिषु दण्डत्ववदनुगतं सत् यत्रानुभवस्मृतिसंशयविपर्ययादिषु तदनुवृत्तिर्यत्र च घटापटादिषु तस्य व्यावृत्तिस्तत्र तुल्यमेव साधर्म्यमित्यर्थः । अपरव्याख्यानमन्यत् । यद्वा यथा सद्बुद्धिविषयत्वं भावत्वमेवास्तित्वम्, तथा ज्ञेयत्वमपि ज्ञेयोऽयमितिबुद्धिविषयत्वमेवेत्याह ज्ञेयोऽयमिति । अत्रापि सामान्यतस्तत्रास्या

न्यायलीलावतीप्रकाशः

तथात्वं विषयीकरोतीत्याह प्रमेयत्वेति । अतएव ज्ञेयत्वे साधर्म्यं तत्रैव तदभावादिति दूषणमपास्तम् । भावत्वाभावासामानाधिकरणज्ञानविषयत्वं ज्ञेयत्वमभावव्यावृत्तं कथमनुगतमुपधायकज्ञानव्यक्तीनामननुगमादित्यत्र समाधानमाह ज्ञेयत्वे चेति । तेन-ज्ञानत्वविशिष्टज्ञानजातीयेन, तादृगेव-अनुगतमेव, परम्परासम्बद्धज्ञानत्वेनैवानुगम इत्यर्थः । अन्यथेति । ज्ञातोऽयं ज्ञातोऽयमित्यनुगतवेदनानुपपत्तेरित्यर्थः। स चेति । स च ज्ञानलक्षण उपाधिः व्यावृत्तावभावे विशिष्टव्यवहारे ज्ञा-

न्यायलीलावतीप्रकाशविवृतिः

मित्यर्थः । क्वचित्पाठ एव तथा । स चेति । सत्तालक्षण उपाधिर-

बुद्धिवेद्यत्वं वा । एतेनाश्रितत्वं व्याख्यातम् । येन च यत्समानमिति च प्रमाणलक्षणवद्वाचकः शब्द इतिवच्चोपपद्यते ।

न्यायलीलावतीकण्ठाभरणम्

अपि बुद्धेर्ज्ञेयत्वमिति न स्वप्रकाशानवस्थेति भावः। एवमभिधेयत्वमप्युपपाद्यमित्युपेक्षितवान् । एतेनेति । ज्ञानवत् समवायस्यापि स्वरूपसम्बन्धेनैवाश्रितत्वमिति नाव्याप्तिरित्यर्थः । यद्वा इह तन्तुषु पटसमवाय इति धीर्न तथा नित्यद्रव्येष्वपीति भावः । समवेतसमवायाद्यन्यतरत्वमाश्रितत्वमिति तु तत्त्वम् । आश्रितत्वेऽपि आश्रितत्वं साधर्म्यमुपपादयितुमाह येनेति । प्रमाणलक्षणवदिति । यथा प्रमाणेषु

न्यायलीलावतीप्रकाशः

नाभावादिरूपे यथा तथाऽत्रापीत्यर्थः । अथवा न ज्ञानत्वेनैवानुगमः, किन्तु अयं पदार्थो ज्ञात इति ज्ञानविशेषणैवानुगम इत्याह ज्ञेयोयमिति । न च ज्ञानाविशेषाप्रतिसन्धाने ज्ञेयत्वव्यवहारानुपपत्तिः, सामान्येनापि रूपेण ज्ञानविशेषप्रतिसन्धानात् ज्ञेयत्वतुल्ययोगत्वाच्चाभिधेयत्वं न पृथक् समाहितम् । एतेनेति । ज्ञानवत्समवायस्यापि स्वभावप्रत्यासन्नत्वेनेत्यर्थः । तथा च भावत्वे सति संयोगाभिन्नप्रत्यासत्त्या(१) आधेयत्वमाश्रितत्वमित्यर्थः। साधर्म्यपदार्थदूषणं समाधत्ते येन चेति । यथा विवादपदं प्रमाणं यथार्थानुभवकरणत्वादिति प्रमाणमात्मनोऽपि प्रमाणत्वं बोधयति, यथा च वाचकः शब्द इति शब्दः स्वस्यापि वाचकत्वमाचष्ट तथा तेनैव धर्मेण विशिष्टे स धर्मो वर्त्तते,

न्यायलीलावतीप्रकाशविवृतिः

तिरिक्तसम्बन्धं विनैव यथा ज्ञानाभावज्ञानसादृश्यादिरूपे व्यावृत्तव्यवहारे प्रयोजकस्तथा साधर्म्यव्यवहारे प्रकृतेऽपीत्यर्थः । ज्ञेयोयमिति । ज्ञेयत्वप्रकारकबुद्धिरेवानुगमिकेत्यर्थः । वस्तुत ईश्वरबुद्धिरेव तथेति द्रष्टव्यम् । ज्ञेयत्वतुल्येति । भावत्वाभावसमानाधिकरणाभिधानं सम्बन्धित्वं षण्णामनुगतं तदिति भावः । तथाच भावत्वे सतीति । स्वरूपसम्बन्धेनाधेयेऽभावेऽतिव्याप्तिरिति सत्यन्तम् । नित्यद्रव्येऽतिव्याप्तिरिति संयोगान्यवृत्त्येति । न च कालाधेये आकाशेऽतिव्याप्तिरसाधारण्येनेति वृत्तिविशेषणात् । तेनैव धर्मेण विशिष्ट इति । प्रामाणिकत्वाद·

---

(१) संयोगान्यवृत्त्येत्यत्र विवृतिकृत्संमतः पाठो बोध्यः ।

धर्मादिहेतुत्वं च व्यक्तेरेव। तस्या एव सफलदेशकालस्वभावनियमोपपादकत्वात्। ताश्च विप्रकीर्णदेशकालतया नान्वयव्यतिरेकग्राहकप्रत्यक्षविषय(१)मापद्यन्त इति जातिरपि हेतुफल-

---

न्यायलीलावतीकण्ठाभरणम्

लक्षणस्वरूपं प्रामाण्यं स्वमनन्तर्भाव्य वर्त्तते तथा प्रमाणकरणत्वस्यापि लक्षणस्य व्यतिरेकिलिङ्गतया प्रमाकरणत्वात्। वाचकः शब्द इति। स्वस्यापि शब्दो वाचकत्वं विधत्ते तथा प्रकृतेऽपीत्यर्थः। एवं षण्णां साधर्म्यान्तरं तदपि स्वमनन्तर्भाव्य उपपादनीयं प्रमाणबलात् स्वस्मिन्नपि स्ववृत्त्यभ्युपगमात्।

द्रव्यादीनां त्रयाणां धर्माधर्म्मकर्त्तृकत्वं साधर्म्यमुपपादयति धर्मादीति। फलेन दोहनादिना देशकालाभ्यां चावच्छिन्नाभ्यां व्यक्तेरेव स्वप्रतिबन्धात् गां दद्यादित्यादौ व्यक्तेरेव कर्म्मजनकत्वम्। तर्हि जातीनां कथमुपयोग इत्यत आह ताश्चेति। व्यक्तय इत्यर्थः। अवच्छेदकतामात्रे-

न्यायलीलावतीप्रकाशः

तादृशश्चात्माश्रय इष्यत एवेत्यर्थः।

सफलेति। क्वचिद्देशे काले च कार्यमित्यत्र नियामकत्वं न जातीनां तासां सार्वदिकत्वात्सार्वत्रिकत्वादिति व्यक्तेरेव तथात्वाददृष्टनिमित्तत्वमिति भावः। तत्किं सर्वथानुपयोगिन्येव कार्ये जातिर्नेत्याह ताश्चेति। एतच्च यत्रान्वयव्यतिरेकाभ्यां कारणत्वं गृह्यते तत्परं, नतु सर्वत्र यागादेः स्वर्गजनकत्वानुपपत्त्या व्यापारत्वेनापूर्वकल्पनात नान्वयव्यतिरेकाभ्यामिति विशेषात्। ननु जातेर्भावनाविषयत्वेन यद्यपि अदृष्टं प्रति नोपयोगः, तथापि भावनाविषयतावच्छेदकत्वेनोपयोगः

न्यायलीलावतीप्रकाशविवृतिः

यमात्माश्रयो न दोषायेति भावः। न च योऽपि व्यतिरेकी धर्मः सोऽपि यदि समानधर्मविशिष्टे वर्त्तेत तदा साधर्म्यपदवाच्यः स्यात्तथाचानवस्थितिरिति प्राग्व्याख्यातमूलानुसारेण दोष एवमपहृत एवेति वाच्यम्। तद्धर्मोपलक्षितवृत्त्यैव साधर्म्यपदवाच्यत्वादित्यर्थः।

इतिविशेषादिति । अन्वयव्यतिरेकावच्छेदकत्वं जातेर्न यागादौ

---

(१) प्रत्यक्षलक्ष्यभावमा–प्रा० पु० पाठः।

भावनिश्चयार्थमुपादीयते । न च जातिरपि हेतुः, तस्याः स्वतोऽन्वयव्यतिरेकाभावात्, व्यक्त्युपादानेनाऽन्यथासिद्धेः । जातित्वं

न्यायलीलावतीकण्ठाभरणम्

ण जातीनामुपयोग इत्यर्थः । अन्वयव्यतिरेकाभावादिति । यद्यपि नान्वयव्यतिरेकगम्यं धर्मस्य करणत्वं कल्प्यते, तथापि यत्रान्वयव्यतिरेकगम्यं कारणत्वं तत्परमिति तर्हि । सामान्यादित्रयाणां नित्यसामान्यत्वमुपपादयितुमाह जातित्वञ्चेति । पूर्वमनाशङ्कितमपि जातित्वं शा·

न्यायलीलावतीप्रकाशः

स्यादित्यत आह न चेति । ज्ञानावच्छेदकत्वेन विषयस्य कारणत्वं न सि ध्यति तस्य ज्ञान एवोपक्षयादित्यर्थः । अदृष्टजनकत्वं श्रुत्येकगम्यं, सा चासिद्धस्य क्रियमाणस्येष्टसाधनत्वं सिद्धस्य तु व्यापारभागित्वेन त थात्वं बोधयति, क्वचित्प्रसक्तस्य निवृत्तिं तथात्वेन बोधयति जाति· र्न स्वरूपतः कार्यानित्यत्वात्, नापि व्यापारभागितया जन्यधर्मा· नाश्रयत्वात्, न च जातेर्नित्यतया निवृत्तिरिति न तस्या अदृष्टज· नकत्वमिति भावः । जातित्वं चेति । यद्यपि जातित्वं न पूर्वं शङ्कितं किन्तु सत्तायाः सामान्यवृत्तित्वं, न च सामान्यत्वं जातिः स्यादित्यत्र शङ्कितेऽयं परीहारः, न च सामान्यत्वमित्यनेन पौनरु क्त्यप्रसङ्गात् । तथापि सत्तावत्त्वं सत्ताभिन्नजातिमत एवेति निय· मात् सामान्यस्य सत्तावत्त्वं तदैव स्याद्यदि सत्ताभिन्नसामान्यवत्त्वं

न्यायलीलावतीप्रकाशविवृतिः

कारणतावच्छेदकत्वं तत्राप्यन्यथानियमनिरूपणानुपपत्तेरिति ध्ये· यम् । ज्ञानावच्छेदकत्वेनेति । यद्यपि भावनाविषयतावच्छेदकत्वं प्रागा· शङ्कितं, तथापि ज्ञानावच्छेदकत्वमपि तस्यास्तीति तदप्युक्तम् । ननु विशिष्टकारणताग्राहकं प्रमाणं विशेषणस्यापि कारणतां गृह्णातीत्यनु· शयादाह अदृष्टजनकत्वमिति । जातेर्व्यक्तिपरिचयार्थमुपादानान्न श्रुतिर्जा· तिविशिष्टस्य कारणतां बोधयतीति भावः । यथा सत्प्रत्ययः सत्तायां भ्रान्तस्तथा सत्तादिषु जातित्वप्रत्ययः स्यादिति न सत्ताविरोधिजा· तित्वजातिसिद्धिरित्येवं यद्यपि सुगमं मूलं, तथाप्यात्माश्रयभ· येन सत्तानङ्गीकारेऽपि जातित्वाङ्गीकारो बाधकाभावेन स्या

७१ ब्रह्मसूत्रशाङ्करभाष्यम्। चतुःसूत्र्यन्त पूर्णानन्दीय व्याख्या सहितया श्रीगोविन्दानन्द प्रणीतया रत्नप्रभया समन्वितम्। सम्पूर्णम्। [वेदान्तविभागे ९] रु० ६—०

७२ सिद्धान्तशिरोमणिः। श्रीभास्कराचार्य विरचितः। वासनाभाष्य सहितः ज्योतिषाचार्य म०म० श्री ६ बापूदेवशास्त्रिकृतटिप्पणी सहितः। "गणिताध्यायः"। रु० २—० "गोलाध्यायः"। रु० २—० [ज्यो० वि० ४] सम्पूर्ण रु० ४—०

७३ काकचण्डीश्वरकल्पतन्त्रम्। पण्डित रामकृष्ण शर्म्मणा सम्पादितम्। पण्डित बटुकनाथ शर्म्मा एम. ए. साहित्योपाध्याय इत्येतेन लिखितया प्रस्तावनया सनाथीकृतम्। [आयुर्वेद शास्त्रविभागे १] रु० ०—८

७४ किरातार्जुनीयम्। श्रीमत्कविकुलचूडामणिभारविविरचितम् मल्लिनाथसूरिकृतया घण्टापथसमाख्यव्याख्यया तथा पं० श्रीगङ्गाधरशर्मणा कृतया सुधाऽऽख्यव्याख्यया समलङ्कृतम्। [सर्गत्रयमात्रम्]। [काव्य वि० १०] रु० ०—१२

७५ चन्द्रालोकः। पीयूषवर्षश्रीजयदेवकवि प्रणीतः। श्रीमत्पद्मनाभमिश्रापराभिधान प्रद्योतनभट्टाचार्य विरचितया चन्द्रालोकप्रकाशापराख्य 'शरदागम' टीकया सङ्कलितः। साहित्याचार्येण खिस्ते इत्युपाख्यनारायणशास्त्रिणा भूमिकादिभिः समुपस्य सम्पादितः। [अलङ्कार वि० ३] रु० ०—१०

७६ किरातार्जुनीयम्। श्रीमत्कविकुलचूडामणिभारविविरचितम्। मल्लिनाथसूरिकृतया घण्टापथसमाख्यया तथा पं० श्रीकनकलालशर्मणा कृतया भावार्थदीपिनीव्याख्यया समलङ्कृतम्। [सर्गत्रयमात्रम्] [काव्य वि० ११] रु० ०—६

७७ शक्तिवादः, श्रीगदाधरभट्टाचार्यप्रणीतः, पण्डितप्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचितविवृतिसहितः। [न्यायविभागे १०] रु० ३—०

७८ माथुरीपञ्चलक्षणी। पं श्रीउमानाथज्यौतिकृतव्याख्या सहिता तथा माथुरीसिद्धव्याप्तिलक्षणम्। पं० श्रीहरिरामशुक्ल विरचितया व्याख्यया सहितं तथा पं० श्रीहरिहरशास्त्रि सङ्कलित माथुरीपञ्चलक्षणी क्रोडपत्रेण च। [न्याय वि० ११] रु० ०—६

७९ रसाध्यायः। टीकया संवलितः। [आयुर्वेदशास्त्र वि० २] रु० ०—१०

८० (१) पाणिनिव्याकरणे वादरत्नम्। न्यायव्याकरणाचार्य मीमांसक शिरोमणि पं० सूर्यनारायणशुक्लेन विरचितम्। (तत्र च न्यास परिष्कारपरिशिष्ट भेदेन प्रकरणत्रयम् यत्र पञ्चन्यून सार्धशतसूत्रेषु १४५ महताटोपेन न्यासाविचारताः तत्र प्रथमं प्रकरणं मुद्रितं प्रथमो भागः। [व्या० वि १०] रु० १—८

८० (२) पाणिनीव्याकरणे वादरत्नम्। द्वितीयोभागः [न्या० वि०] रु० १—४

८१ गणितकौमुदी। [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितगणितसंग्रहपुस्तकम्। [गणितविभागे १] रु० ०—६

८२ छन्दः कौमुदी। [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितछन्दसंग्रहपुस्तकम्। [छन्दोविभागे ३] रु० ०—६

८३ योगदर्शनम। महर्षिप्रवरपतञ्जलिप्रणीतम्। तत्र (१) भोजवृत्तिः, [२] भावागणेशवृत्तिः, [३] नागोजीभट्टवृत्तिः, [४] मणिप्रभा, [५] योगचन्द्रिका, [६] योगसुधाकराख्य टीका षट्कसमेतम्। सटिप्पण। [योग० विभागे १] रु० २—०

८४ रघुवंशमहाकाव्यम्। श्रीकालिदासविरचितम्। म० म० मल्लिनाथकृत सञ्जीविनीटीका तथा परीक्षोपयोगि सुधाऽऽख्यव्याख्या सहितः। १ से ४ सर्गः मूल्यम् रु० १-४-० तथा १ से ५ सर्गः रु० १—८ तथा ६ से १० सर्गः। रु० १—८

८५ योगदर्शनम्। पं० श्रीबलदेवमिश्रकृत योगसूत्रप्रदीपिकाख्यव्याख्यया सहितम्। सटिप्पण। [योग वि० २] १—०

८६ काव्यमीमांसा। राजशेखरविरचिता। साहित्याचार्य पं० श्रीनारायणशास्त्रि खिस्ते कृत काव्यमीमांसा—चन्द्रिका टीका सहित [१ से ५ अध्याय] प्रथमोभागः। [काव्यविभागे १३] रु० ०—८

८७ नागानन्दनाटकम् । श्रीहर्षदेवप्रणीतम् । काशीविश्वविद्यालयाध्यापकेन एम० ए० साहित्याचार्य पण्डित श्री बलदेव उपाध्यायेन स्वप्रणीतया भावार्थदीपिकाख्यया व्याख्यया समलङ्कृत्य बृहत् भूमिका हिन्दीभाषानुवादादिभिः सनाथीकृत्य सम्पादितम् । [नाटक विभागे १] रु० १—४

८८ मेघदूतकाव्यम् । महाकवि श्रीकालीदास विरचितम् । मल्लिनाथकृत सञ्जीविन्या, चारित्रवर्द्धनाचार्य विरचित चारित्रवर्द्धिन्या तथा साहित्याचार्य पं० श्री नारायण-शास्त्री खिस्तेकृत भावप्रबोधिनीव्याख्यया टिप्पण्या च सहितम् । [काव्य० १४] रु० ०—८

८९ जागदीशीव्यधिकरणम् । न्यायाचार्यश्रीशिवदत्तमिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितम् । (न्यायविभागे १२) रु० २—०

९० काव्यकल्पलतावृत्तिः । श्रीअमरचन्द्रयतिनिर्मिता अरिसिंहकृतसूत्रसहिता । (अलङ्कारविभागे ४) रु० १—४

९१ वैयाकरणसिद्धान्तचन्द्रिका । श्रीरामाश्रमप्रणीता । श्रीसदानन्दकृत-सुबोधिन्या, श्रीलोकेशकरकृत-तत्त्वदीपिकया व्याख्यया च सहिता । पं० श्रीनवकिशोर-शास्त्रिणानिर्मितया चक्रधराख्य महत्या टिप्पण्या अव्ययार्थमालया लिङ्गानुशास-नप्रक्रियया उणादिकोषेण च सहिता । (व्या० वि० ११) पूर्वार्द्धम् । रु० २—८
उत्तरार्द्धं । रु० २—८

९२ त्रिपुरारहस्यम् (महात्म्यखण्डम्) साङ्ख्ययोगशास्त्राचार्य श्रीमुकुन्दलाल शास्त्रिणा संशोधितम् । साहित्याचार्य खिस्ते-इत्युपाख्य पं० श्रीनारायणशास्त्रिणा निबद्धाभ्यां भूमिकाऽध्यायानुक्रमणिकाभ्यां च सहितम् । (पुराणेतिहास वि०१) रु० ६—०

९३ आपस्तम्बधर्मसूत्रम् । श्रीमद्धरदत्तमिश्र विरचितया उज्ज्वलाख्यया वृत्त्या संवलितम् । (कर्मकाण्डविभागे ७) रु० ४—०

९४ अवच्छेदकत्वनिरुक्तिः । श्रीजगदीशतर्कालङ्कारकृताः । न्यायाचार्य श्रीशिवदत्त-मिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितः । (न्याय वि० १३) रु० १—४

९५ संस्कारदीपकः । गणेशपूजादिग्रहयागान्त-पूर्वाङ्ग-निरूपणात्मकः प्रथमो भागः । म० म० पण्डित श्रीनित्यानन्दपन्त पर्वतीयविरचितः । (कर्मकाण्ड वि० ८) रु० २—०

९६ वर्षकृत्यदीपकः । कालनिर्णयव्रतोद्यापनसहितः । म० म० पं० नित्यानन्दपन्त पर्वतीय विरचितः । (कर्मकाण्ड वि० ९) रु० ३—८

९७ श्रौतसूत्रम् । श्रीमन्महर्षि-लाट्यायनप्रणीतमग्निष्टोमान्तम् । (कर्म० वि० १०) रु० २—०

९८ नलचम्पूः अथवा दमयन्ताकथा महाकविश्रीत्रिविक्रमभट्टविरचिता । विषमपद प्रकाशाख्यव्याख्यया सहिता । भावबोधिनी टिप्पणी सहिता । (का० वि०१५) रु० १-४

९९ श्रीब्रह्मसूत्रम् । श्रीभगवन्निम्बार्क महामुनीन्द्रविरचित वेदान्तपारिजात सौरभा-ख्यसूत्रवाक्यार्थेन श्रीश्रीनिवासाचार्यचरणप्रणीत श्रीवेदान्तकौस्तुभभाष्येन च सनाथीकृतम् । (श्रीनिम्बार्कभाष्यम्) (वेदान्त वि० १०) रु० ३—०

१०० वाग्वल्लभः । सर्वथाऽपि नवीनोऽपूर्वः प्रौढः परमोपयोगितया नियतमुपादेयतमश्छ-न्दोनिबन्धः, श्रीमता दैवज्ञाग्रेसरेणागममार्मिकेण कविपुङ्गवेन दुःखभञ्जनविदुषा विरचितः, तत्सुतेन बहुशास्त्रपारगेण कविचक्रवर्तिना महामहोपाध्यायेन देवीप्रसाद पण्डितप्रवरेण कृतया वरवर्णिन्या टीकयोपस्कृतः । (छन्दः शास्त्र वि० ४) रु०

१०१ सिद्धान्तलक्षणम् । श्रीजगदीशतर्कालङ्कारकृतम् । न्यायाचार्य श्रीशिवदत्तमिश्र-विरचित गंगाख्यव्याख्या टिप्पणी सहितम् । (न्याय विभागे) रु० १—८

प्राप्तिस्थानम्--चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी ।